हा० ६५

सारग्रीवः दृढकंधरः ६८ महाजन्तुः जन्तुरत्नकंदस्कंधयोरखीस्थि ६९ अलोलः ७० महोषधः ब्रीहियवरूपः ७२ सिद्धार्थकारी ७२ सिद्धार्थः सर्वपक्षनिरस
योनिष्पन्नोर्थः समिद्धार्थउच्यते स एव सिद्धान्त इति प्रसिद्धः तस्यैव विशेषणं छंदोव्याकरणोत्तर इति वेदव्याख्यानोपयुक्तं हितं तस्यार्थः १३ ११२ सिंहनादः ७४ सिंहदं
ष्ट्रः ७५ सिंहगः सिंहारूढः ७६ सिंहवाहनः सिंहयुक्तवाहनं रथोस्य ७७ प्रभावात्मा प्रकृष्टोभावः सत्तातद्रूपस्तस्यार्थः प्राणावैसत्यं तेषामेषसत्यमितिश्रुतेः स
त्यस्य सत्यस्तस्यार्थः ७८ जगतः कालः अस्य कर्तृत्वाज्जगत्कालः स एवस्थानो लोभोजनपात्रं यस्य ७९ लोकहितः ८० तरुत्तारकः ८१ ११३ सारंगः पक्षिविशे
षः ८२ नवचक्रांगो हंसः नवचक्रांगः ८३ केतुरिव केतुः शिवांतपामालतेशोभते इति केतुमाली मयूरकुक्कुटादिपक्षिरूपः ८४ सभायामपि ग्रीष्म्यातं
त

सारग्रीवो महाजंतुरलोलश्च महोषधः सिद्धार्थकारी सिद्धार्थश्छंदोव्याकरणोत्तरः ११ सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवा
हनः प्रभावात्मा जगत्कालस्थानो लोकहितस्तरुः ११२ सारंगो नवचक्रांगः केतुमाली सभावनः भूतालयो भूतपतिरहोरात्रम
निंदितः १३ वाहिता सर्वभूतानां निलयश्च विभुर्भवः अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः १४ धृतिमान्मतिमानदक्षः
सत्कृतश्च युगाधिपः गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरिः ११५ ॥ ॥:

वतीति सभावनः ८५ भूतालयः ८६ भूतपः ८७ अ
होरात्रम् ८८ अनिंदितः ८९ ११३ वाहिता वोढा सर्वभूतानां नित्यभयत्रसंवध्यते सर्वभूतानांचाहिते तेनेकं नाम ९० सर्वभूतानां निलयः सतत्त्विम्पपरं ९१
विभुः विगतं भुर्भवनं यस्मादितितन्मामावार्थोपूर्ववत् भवते ईः ९१ भवः अस्तीति भावः अलेः पचाद्यविभभावः ९३ अमोघः तेषाञ्यरहितः ९४ संयतः धा
रणाध्यानसमाधिमान् ९५ अश्वउच्चैःश्रवादिरूपः ९६ भोजयतीति भोजनोऽन्नदाता ९७ अत एव प्राणधारणः ९८ ११४ धृतिमान ९९ मतिमा
न ७०० इति नाम्नां सप्तमं शतं दक्षः उत्साही १ सत्कृतः आदृतः २ युगाधिपः युगशब्देन धर्माधर्मौ लक्ष्येते तयोः फलप्रदः ३ गोपालिः इंद्रियाणां पालयिता ४ गोप

गोपतिः गोपतिः सर्वांगिः ५ ज्ञानः समः ६ गोवर्मवसनः १६ ॥ ॥ ॥ ॥
ः इन्द्रियस्थानां इः लक्षितिहरिः ८

सम० ६५

४१ गयायांगयांतर्गते॥ अश्वपृष्ठे प्रेतशिलायां एकां ब्रह्महत्यांव्यपोह्य अविंदोः लोभोयत्रतस्मिन्मुरवगंधहीनेप्रेतपर्वते द्वितीयां ब्रह्महत्यां निरस्य क्रौंचपादीतिसर्वेषां विष्णुपदादीनामुपचक्षणानि पुन

मतंगवाप्यांयः स्नायादेकरात्रेण सिध्यति विगाहति ह्यनालंबमंधकंवैसनातनं ३१ नैमिषेस्वर्गतीर्थेचउपविश्य जितेंद्रियः फलंपुरुषमे
धस्यलभेन्मासंकृतोदकः ३२ गंगाह्रदउपस्पृश्य तथाचैवोत्पलावने अश्वमेधमवाप्नोति तत्रमासंकृतोदकः ३४ गंगायमुनयोस्तीर्थे
तथाकालंजरेगिरौ दशाश्वमेधानाप्नोति तत्रमासंकृतोदकः ३५ षष्टिह्रदउपस्पृश्य चान्नदानाद्विशिष्यते दशतीर्थसहस्राणि तिस्रः
कोट्यस्तथापराः ३६ समागच्छंति माघ्यांतु प्रयागे भरतर्षभ माघमासंप्रयागेतु नियतः संशितव्रतः ३७ स्नात्वातु भरतश्रेष्ठ निर्मलः स्वर्ग
माप्नुयात् महद्भुणउपस्पृश्य पितृणामाश्रमे शुचिः ३८ वैवस्वतस्यतीर्थेच तीर्थभूतो भवेन्नरः तथाब्रह्मसरोगत्वा भागीरथ्यांकृतोदकः
३९ एकमासंनिराहारः सोमलोकमवाप्नुयात् उत्पातकेनरः स्नात्वा अष्टावक्रेकृतोदकः द्वादशाहं निराहारो नरमेधफलंलभेत् ४१
अश्वपृष्ठे गयायांच निरविंदेच पर्वते तृतीयांक्रौंचपद्यांच ब्रह्महत्यां विशुध्यते ४२ कलविंकउपस्पृश्य विपाशेचबहुशो जले अग्नेःपुरेन
रः स्नात्वा अग्निकन्यापुरेवसेत् ४३ करवीरपुरेस्नात्वा विशालायांकृतोदकः देवह्रदउपस्पृश्य ब्रह्मभूतो विराजते ४४ पुनरावर्त्त
नंदांच महानंदांचसेव्यवै नंदनेसेव्यतेदांतस्त्वप्सरोभिरहिंसकः ४५ उर्वशीकृत्तिकायोगे गत्वाचैवसमाहितः लोहित्ये विधिवत्स्नात्वा
पुंडरीकफलंलभेत् ४६ ॥

तीर्थांब्रह्महत्यासकृद्गयांगतएवविशुध्यते हत्वानाशफित्वापूतोभवति ४५ उर्वशी उर्वशीतीर्थे कृत्तिकायोगे कार्त्तिक्यांपौर्णमास्यां ४६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रा०
६६

नित्यश्चात्मसहायश्चेत्येकं नाम। नित्यश्चासावात्मसहायश्चेति समासे विभक्त्यलोपश्चार्षः ३५ देवासुरपतिः ३६ पतिर्योन्तर्वस्य ३७ युक्तः सन्नद्धः संग्रामाय ३८ युक्तबा
बाहुः शत्रुमर्दनयोग्यौ बाहू यस्य देवो दिविस्थपर्वावैः दिविस्थोगेयः स्वपर्वो इंद्रसंज्ञो महानतस्य देवश्चाराधनीयः ४० आषाढः साहयते: कर्णीरिति शत्रूनासमंतात्सर्वसाह
पतिसहनं कारयतीत्याषाढः सर्वसहनसामर्थ्यप्रदत्यर्थः ४१ सुषाढरेवत्कां प्रभुर्वोक्तं यसास्तषाढः ४२ ध्रुवः स्थिरचलः हीराः धूतः स्थद्दत्यर्थः ४४ हाः हंतीति हा
स्वलः तं राति आदत्ते स हरः हंते: कर्तृ क्विप नत्स्वेतरागते आतो नुपसर्गे क इति कः हरस्थलीत्यर्थः ४५ १२० वपुः वपुः परात्तानावर्त्तमानेभ्यः स्वर्गच्युतेभ्यः वपतीति पा
५१

आषाढश्च सुषाढश्च ध्रुवोथ हरिणो हर ५१

नित्यश्चात्मसहायश्च देवासुरपतिः पतिः युक्तश्च युक्तबाहुश्च देवो दिविसुपर्वणः २० वपुरावर्त्तमानेभ्यो वसुश्रेष्ठो महापथः शिरोहारी विम
र्षश्च सर्वलक्षणलक्षितः २१ अक्षश्च रथयोगी च सर्वयोगी महाबलः समाम्नायो ऽसमाम्नायस्तीर्थदेवो महारथः २१ ॥ ॥

३१ ५१

देशेभ्यो धनवर्षणत्यर्थः ४६ वसुश्रेष्ठः धनादिभ्यधिकः श्रेयो विज्ञादिति श्रुतेः ४७ महापथः शिष्टाचारस्तपः ४८ १२१ शिरोहारी ब्रह्मणः शिरश्छेत्ता विमर्षः विशेषेण
विचारवान् विवेकेनैव ब्रह्मशिरश्छिन्नं न तु क्रोधमात्रेणेति भावः यद्वा द्व्यात्मकं एकं नाम ४९ सर्वलक्षणलक्षितः सामुद्रिकोक्तशुभलक्षणयुक्तः सर्वाणि लक्ष्यं
ते ज्ञायंते र्थ्यैस्तेरिति प्रमाणानि लक्षणानि अचंतेतैर्लक्ष्यते न तत्साक्षात्कर्त्यर्थः ५० ५१ अक्षः रथसंधानदारुः अक्षं तत् एव रथयोगी रथेन संबद्धः ५१ सर्वयोगी सर्वैर्मे
सर्शी विभुत्वात् ५२ महाबलः महश्चासौ बलश्च महाबलः बलशब्दात्मत्वर्थीयोः अभ्राद्यच् बलवृद्धिरित्यर्थः ५३ समाम्नायो वेदः ५४ असमाम्नायः स्वतन्त्रः स्मृतीति
हासपुराणागमादिः ५५ तीर्थदेवः ५६ महारथः पृथ्वीसंदनः ५७ २२ ॥ ॥ ॥ ॥ रा०
६६

निर्जीवश्चचेतनं प्रपंचात्मा ५८ जीवनः अचेतनस्यापि देहादेश्चैतन्यप्रदानात् ५९ मंत्रः प्रणवादिर्मृतसंजीवनो वा ६० शुभाक्षः शांतदृष्टिः ६१ बहुकर्कशः संहर्तृत्वा
त् ६२ रत्नप्रभूतः प्रभूतानि बहूनि रत्नानि उत्तमवस्तूनि यस्मिन् रत्नप्रभूतः आहिताग्न्यादित्वात्पूर्वनिपातः ६३ रक्तांगः ६४ महार्णवनिपानवित् निपानं कूपाद्बहिः
पश्वादीनां पानार्थं कृतं कुंडं महार्णवास्तु सर्वे यस्य निपानभूतास्तान् शोषणीयान् विंदति लभते इति ६५ २३ मूलं संसारतरोरधिष्ठानं ६६ विशालः अनंतशोभमानः ६७
अमृतः सुधारूपः ६८ व्यक्ताव्यक्तः कार्यकारणात्मा ६९ तपोनिधिर्महामुनिः ७० आरोहणः परं पदं आरुरुक्षुः ७१ अधिरोहः तदेवाधिरूढः ७२ शी

निर्जीवो जीवनो मंत्रः शुभाक्षो बहुकर्कशः रत्नप्रभूतो रक्तांगो महार्णवनिपानवित् २३ मूलं विशालो ह्यमृतो व्यक्ताव्यक्तस्तपो
निधिः आरोहणोधिरोहश्च शीलधारी महायशाः २४ सेनाकल्पो महाकल्पो योगो युगकरो हरिः युगरूपो महारूपो महानाग
हनो वधः २५ न्यायनिर्वपणः पादः पंडितो ह्यचलोपमः बहुमालो महामालः शशी हरसुलोचनः २६ ॥ ॥

लधो सदाचारः ७३ महायशाः उरुपकीर्तिः ७४ सेनाकल्पः सेनायै आकल्पो अलंकारः पराक्रमद्स्पर्धी ७५ महाकल्पः दिव्यभूषणः २६ योगः चित्तवृत्तिनिरोधः ७७
युगानि कल्पादीनि करोति यस्य कल्पादिप्रदः ७८ हरति शरीरं देशाद्देशांतरं प्रति नयतीति हरिः पापाभिमानिनी देवतां त्रिविक्रमद्स्पर्धी ७९ युगरूपः धर्माधर्मतत्त्वकर्म
पः ८० महारूपः महांश्चासौ अरूपश्चेति तथा ८१ महानागहनः गजासुरघ्नः ८२ वधः मृत्युः ८३ २५ न्यायनिर्वपणः न्याययुक्तं निर्वपणं दानं यस्य यथाधर्ममनो
रथप्रदः ८४ पादः पद्यत इति गम्यः ८५ पंडितः परोक्षज्ञानी ८६ अचलोपमो निश्चलः तत्त्वज्ञानी स्थर्यः ८७ बहुनि रत्नाधिमाल तेशोभते इति अनंतलीलः ८८ म
हामालः महती आयार्द्रले विनी अम्लानत्वादि गुणयुक्ता वा माला यस्य शशी चंद्रः सुरवहर सुलोचनः महादेवस्य शांतदृष्टिरूपः ९० २६ पत्र ०

रा० ६०

विस्तारोलवणाः कूपः विशिष्टस्तारस्त्राच्छादनंयस्मसोतिविस्तीर्णः लवणाः क्षाररसः तादृशः कूपइवकूपः महाकूपस्तल्पः क्षारसमुद्ररूपीसर्थः त्रिपदमेकंनाम ९१ त्रियुगः कलिवर्हिर्भूतः ४२ अतस्वसफलोदयः ९३ १२७ त्रिनेत्रः श्रीणिशास्त्राचार्यध्यानानिलोचनानीलोचनानिदर्शनसाधनानियस्यत्रिलोचनः ९४ विर्षणांगः विशेषणासन्नाश्रीवयमुच्छिन्नाः अंगाख्यासम्पादयोः श्रेष्ठमूर्तेयोयस्मत्रस्तैहिस्त्ररूपेणामज्ञीनामन्वयोस्तितेजोप्ययमंतरंगः श्रुद्धोस्मेत्यर्थः ९५ मणिविद्धः मणिपिधानार्थकर्णदेशेविद्धः ह्रातच्छिद्रः कुंडलीत्यर्थः ९६ जटाधरः ९७ विंदुरनुस्वारः ९८ विसर्गः विसर्जनीयः ९९ समुखः व्यक्तवर्णः १०० शरः वाणः १ सर्वायुधः २ सहः सर्वसहतेमर्षयतिसहः ३ १२८ निवेदनः निहीनंसर्वव्रह्मपरमेणवेदनंज्ञानंयस्य ४ सुखाजातः सुखरूपेणआजातहृतिविलग्नेमतिदिनसंसंतेच्चा वि

विस्तारोलवणः कूपस्त्रियुगः सफलोदयः २७ त्रिनेत्रश्चविषणांगोमणिविद्धोजटाधरः विंदुर्विसर्गः समुखः शरः सर्वायुधः सहः १२८ निवेदनः सुखाजातः सुगंधारोमहाधनुः गंधपालीचभगवानुत्थानः सर्वकर्मणां २९ मंथानोवहुलोवायुः सकलः सर्वलोचनः तलस्तालः करस्थालीउर्ध्वसंहननोमहान् १३० ॥ ॥ ॥ ॥ ॥

स्या१

भूतः ५ सुगंधारः शोभनोगंधारदेशोद्भवः ६ महाधनुः पिनाकधन्वा ७ गंधपालीगंधाः लेशाः सूक्ष्मांशपंचवासनाः ताः पालयतीतिगंधपालीसर्वप्राणिधीवासनामपइसर्थः सएवभगवानईश्वरः एकंनाम ८ उ[illegible]नः सर्वकर्मणांउत्तिष्ठंत्यस्मादित्युत्थानः ९ १२९ मंथानोविश्वविलोडनः समर्थोवहुलोनिरवधिवीर्यः सहास्वलयानिलइत्येकंनामत्रिपदं १० सकलः पूर्णः ११ सर्वलोचनः सर्वद्रष्टा १२ तलस्तालः कांस्यलोत्थस्वनालनानायविशेषः २३ करावेस्थालाभोजनभाजनंतस्यास्तीतिकरस्थाली ५ उर्ध्वसहननो श्रेष्ठोदृढशरीरश्चेत्यर्थः २५ महानत्रत्स्वः १९ ३० ॥ ॥ ॥ ॥ रा०

६१

छन्नं ७ स्वच्छन्नः १८ विख्यातोलोकः प्राणिभ्न्मात्रप्रसिद्धः प्रकाशः १९ सर्वाश्रयः क्रमः सर्वस्याश्रयः आधारभूतः क्रमः पादविक्षेपः त्रि
विक्रमेणात्येण पादाक्रांतत्रैलोक्यत्वार्थः २० मुंडः मुंडः मुंडितशिराः २१ अनरूपविरूपः विकटरूपः २२ विकृतः सर्वोविक्रियोपाधमः २३ दंडि २४

छन्नस्वच्छन्नोविख्यातोलोकः सर्वाश्रयः क्रमः मुंडोविरूपोविकृतोदंडीकुंडीविकुर्वणः १३१ हर्यक्षः ककु
भोवज्रीशतजिह्वः सहस्रपात सहस्रमूर्द्धादेवेंद्रः सर्वदेवमयोगुरुः १३२ सहस्रबाहुः सर्वांगः शरण्यः सर्वलोक
कृत ॥ ॥

दंडि २४ कुंडि २५ विकुर्वणः करोतिकुर्वीविगतः कुर्वायस्मातविकुर्वणः कर्माप्राप्यइत्यर्थः २६ १३२ हर्यक्षः सिंहाः २७ ककुभः सर्वदिग्रूपः २८ वज्री २९ श
तजिह्वः ३० सहस्रपात ३१ सहस्रमूर्द्धा ३२ देवेंद्रः ३३ सर्वदेवमयः ३४ गुरुः ३५ १३२ सहस्रबाहुः ३६ सर्वांग. सर्वांगः सर्वत्रगतिप्राप्नोतीतिसर्वांङ्गः
३७ शरण्यः शरणायसाधुः ३८ सर्वलोककृत ३९ ॥ ॥ ॥ ॥ ॥ ॥

रा० पवित्रंपावनस्तीर्थादिरूपः त्रिककुन्मंत्रः त्रीणि ककुदीव ककुदि उन्नतस्थानानि बीजशक्तिकीलकानि यस्य तादृशो मंत्रः ४१ कनिष्टः त्र्यादित्रिपुत्राणां मध्ये यः कनिष्टो वामनरूपी विष्णुः
६८ स्तद्रूपः ४२ कृष्णपिंगलः हरिहरमूर्त्तिः विष्णुर्नारायणः कृष्ण इति कृष्णशब्दस्य हरो निबिभेदकपोत ह्रीं पिंगलः कपिलेश्वर दितिमानार्थकोशात्पिंगलशब्दस्य हरे वप्रसिद्धिदर्शनात् पु
रुषं कृष्णपिंगलं हरिरुद्रं नीललोहितेत्यादिश्रुतेऽप्ययमेवार्थः नीलग्रीवो विलोहित इति लोहिताश्च नीललोहितपदेन रुद्रस्यापि ग्रहणात् यदि तु नीललोहितत्वं तद्रूपस्य एवोहितः पर्वन्नी
ल इतिकालभेदेन वा कंठे नीलः सर्वांगे लोहित इति वा मांगे नीलो दक्षिणांगे लोहित इति देशभेदेन वा त्र्यावरकपक्षस्पर्शेन नीलत्वस्व वर्तिकपक्षस्पर्शेन लोहित इति गुणभे
देन वा परस्परेन तद्गुणावाविनी शर्ष्टी क्ष्ययाचित्रं तद्दूलावत्तेस्कदेशवाचित्वमिति विपक्ष कृष्टार्थकल्पनात्त्वास्माकं तु विलोहित कृष्णपदयोः मुख्यहत्सैव शिवकेश ववाचि

नां१ ह्रीं१

पवित्रं त्रिककुन्मंत्रः कनिष्टः कृष्णपिंगलः १३३ ॥

(ह्रीं१)

त्वं हर्षेतेन तत्पर्यायश्च नीलपिंगलपदयोरपि हरी हरवाचित्वं वक्तुं युज्यते तत्रापि च कृष्णपिंगलशब्देन नीललोहितपदेन वा हरिहरावेव व्यासो निरणीतार्थकपदांतरसमभिव्याहारसाम
र्थ्यादनिर्णीतार्थकस्यापि यदस्यार्थो व्यवस्थाप्यते तं शक्य एवेति पक्षस्तु तत्र श्यामः पर्यायिस्वीयायुक्तो ध्यथार्थेषु कर्षका शबलं च नेन किंचित्समाणं उन्नेतुं शक्यं तथापि कृष्णत्वमा
गेण सिद्ध्यत्स्यैवक्केण साधुनायोगात् शिवविष्णुनाम्नामन्यान्यस्मिन्योगदर्शनात् कृष्णयोरेकस्मैवसहृदयात्मात्वाच्च इदमेव व्याख्यानमिष्टं न चैवमिंद्राग्निपदवत् द्विवचनेना
यं तत्पुरुषादिपदे विवक्षायामपि पिंगलश्चेत्यभेदेनैव पदयोरन्वयोपपत्तौ भेदे स्वचकादि वचनायोगात् हरिहरयोरभेदभावस्यागेव प्रतिपादितत्वादिति कृतं नरयं संग्रहे १३३ ॥ रा०

५१ ६८

ब्रह्मदंडनिर्माता ४३ शतघ्नीपाशशक्तिमान् ४४ पद्मगर्भोब्रह्मा ४५ महागर्भोमहानपर्भोऽतरवकाशोयस्य ४ स्वब्रह्मगर्भोविरगर्भितः ४७ जलोद्भवः जलेसलि
लसको ऽ सृष्टेनिर्ह्रकार्णावेउद्भवत्राविर्भावोयस्यमायावीत्यर्थः ४८ १३४ गभस्तिः रश्मिमान् ४९ ब्रह्मकृतवेदकर्ता ५० ब्रह्मीवेदाध्यायी ५२ ब्रह्मवित्वेदा
र्थवित् ५२ ब्राह्मणः ब्रह्मिष्ठः ५३ गतिः ब्रह्मीष्टानामेवपरायणं अनंतरूपमस्यमोनंतरूपः ५५ अतएवनैकात्मा अनेकशरीरधारी ५६ तिग्मतेजाः स्वयंभुः
ब्रह्मणोदृष्टःतिग्मतेजाः उः सहपराक्रमः स्वशिरश्छेदकत्वात्तः ५७ १३५ ऊर्ध्वगात्माउपाधित्रयादुपरिगतआत्मास्वरूपंस्य सम्भविंसर्वतोहूत्वाऽ स्तुतिष्टश्शा

ब्रह्मदंडविनिर्माताशतघ्नीपाशशक्तिमान् पद्मगर्भोमहागर्भोब्रह्मगर्भोजलोद्भवः ३४ गभस्तिर्ब्रह्मकृद्ब्रह्मीब्रह्मविद्ब्राह्मणोगतिः अ
नंतरूपोनैकात्मातिग्मतेजाः स्वयंभुवः ३५ ऊर्द्धगात्मापशुपतिर्वातरंहामनोजवः चंदनीपद्मनालाग्रः सुरभ्युत्तरणोनरः ३६ ॥

स१

गुणमिमिषुने: ५८ पशुपतिः जीवानामीश्वरः ५९ वातरंहाः ६० मनोजवः ६१ चंदनीचंदनालि[illegible]गात्रः ६२ ६ पद्मनालाग्रः पद्मनालमस्याग्रेस्तीतितथा कदाचि
द्ब्रह्मावाश्रयभूतेपद्मनालस्यांतंद्रष्टुंइतिउद्यानालमार्गेणा छिन्नतदादिनपाश्नवानअतोर्वाचीनस्यापिनाम्नस्यांतोनदृष्टः दिष्टतनालकृतेत्रसामस्थानीयस्येतिभावः ६३
सुरभ्युत्तरणः कदाचिद्धिसुस्पर्द्धयाब्रह्माशिवस्यशिरोदेशोमयादृष्टस्तत्रसाक्षीमसाक्ष्यंदेवमितिकामधेनुमुक्तवानसाचब्रह्मभयादन्नमसाक्ष्यंदत्तेव ततोमहादेवेनशप्ताऽत्र
मेध्याशिनीतिसंततिर्भविष्यतीतितदिदमुक्तंसुरभिंकामधेनुंकुर्धपदादधउत्तारयतीतिसुरभ्युत्तारणः ६४ एवंमतीतिहृदयस्पर्श्यंनोपेननदृष्टः सोप्ययमेवेत्याहनरइतिनातिवा
दत्तेपासोत्पंतमितिनरः अतोनुपसर्गेकः ६५ १३६ ॥ तीर

टी० ६७ कर्णिकारपुष्पमयीमहतीमालातद्वान्कर्णिकारमहास्रग्वी ६६ नीलमौलिः नीलमणिमयंकिरीटंमौलौयस्य ६७ पिनाकधृक् पितृः पाशः नाकोर्ध्वे येन स पिनाकः पिगतावित्सनो
निशांतस्यलोपः त्रिपुरासुरेणाल्हतः स्वर्गादैश्वर्यहृत्वास्मात्सत्स्महादेवस्यशैलेंद्रत्संधनुः पिनाकस्तस्यधर्त्तापिनाकधृक् युधानमुचिंकोनैननिघ्नंतइंद्रस्यफेनेयथावज्रप्रवेशएवंश
शैलेपिपिनाकप्रवेशात्सोपिपिनीकइत्यर्थः ६८ उमाब्रह्मविधातस्याः पतिर्यद्वेष्टविनियोगात्स्वामी ६९ उमयात्तर्यैब्रह्मविषयाकांतः कामितः प्रकाशीकृतः ७० जाह्नवी

कर्णिकारमहास्रग्वीनीलमौलिः पिनाकधृक् उमापतिरुमाकांतोजाह्नवीधृगुमाधवः १२७ वरोवराहोवरदो
वरेण्यः सुमहास्वनः महाप्रसादोदमनः शत्रुहाश्वेतपिंगलः १२८ ॥ ॥ ॥ ॥

धृक् ७४ उमायाःशैलपुत्र्याःधवोभर्त्ताउमाधवः ७२ १२७ वरोवराहः सुघोमस्मेस्वत्नपित्रत्पीवाराहः ७२ वौश्रेष्टेहृपैःदयतेलोवनोरैर्जगत्पालयतीतिवादः ७४ सु
नएववरेण्यः वरणीयः ७५ सुमहास्वनः वेदगर्जितोहयग्रीवः ७६ महाप्रसादः ७७ मदनइवसरमित्वाद्दमनः तत्स्वरूपत्वाद्वा ७८ शत्रूनकामाद्दीनहंतीतिशत्रुहा
७९ श्वेतपिंगलः अर्द्धनारीनटेश्वरोदक्षिणार्द्धेकर्पूरगौरः वामार्द्धेकनकपिंगलः येनश्वेतपिंगलपदस्यार्थःकृत्स्नपिंगलदेनन्नुवनेतेश्वेतमपिकृत्स्नीकर्तुंसमर्थामहांतोभवंति ८० १२८ राम० ६७

पीतात्मा सुवर्णवर्णशरीरः य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्ण इति श्रुतेः ८१ परमात्मा च अन्नमयप्राणमयमनोमयविज्ञानमयानंदमयेभ्यः पंचभ्यः परमः आत्मभ्यः षष्ठ आनंदमात्रस्वरूपः ८२ प्रयतात्मा शुद्धचित्तः ८३ प्रधानधृक् त्रिगुणात्मकं जगत्कारणं प्रधानं बिभर्ति ज्ञानेन तदधिष्ठानभूतः ८४ सर्वपार्श्वमुखः चतसृषु दिक्षु ऊर्ध्वं च मुखं यस्येति पंचवक्त्र उक्तः ८५ त्र्यक्षः त्रीणि सोमसूर्याग्निरूपाणि अक्षाणि नेत्राणि यस्य ८६ धर्मसाधारणो वरः धर्मसाधारणो वरः परमात्मा ८७ १३९ चराचरात्मा स्थावरजङ्गमात्मकः चलाचलात्मा दिवि यं थाश्चलाचल इति श्रुतेः सूक्ष्मात्मा योऽस्य हृत्पुनरादर्शिमार्गप्रद्रूपः स्वरूपः चरात्मा

पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृक् सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ३९ चराचरात्मा सूक्ष्मात्मा अमृतो गो
वृषेश्वरः साध्यर्षिर्वसुरादित्यो विवस्वान्सविताऽमृतः ४० ४० ४० ४० ४०

कर्मानुरूपः प्रसादे[illegible]नुरूपो भागो यस्य येवेति नाम सत्यार्थः ८८ सूक्ष्मात्मा मार्गे ह्यगोचरस्वरूपः ८९ अमृतो मरणवर्जितो निष्कामः गोवृषः पृथिवीपतिर्धर्मः तस्य ई-
श्वरः निष्कामधर्मस्य मम जन्मोत्कृष्टरूपं फलं दातुं समर्थः ९० साध्या ये देवानामपि देवाः तेषाम् पितृ ऋषिः आचार्यः साध्यर्षिः ९१ वसुः देवताविशेषः उपाविस्य
रज्ञो व्याहृत्यर्थेन सैव विशेषणं आदित्य इति च अदितेः पुत्रो वहर्नामेसमर्थः ९२ विवस्वान् विशेषेण वासते आच्छादयत्यनेन भुवनानीति विवः चंद्र ज्वालं तद्वान् तत्पतये इति
सविता कृतो बहुलमिति वा त्विकाल्कर्मणि तच वाहुलकात् यज्ञे भिक्षुपमाणाः अमृतः सोमः अमरश्रेष्ठे देवसोमेति मंत्रलिंगात् अपाम सोमममृतात्र्यमृमेति अमृतत्वसाधनत
स्तुतेश्च सोमस्य विवस्वत्त्वममृतत्वं च ज्ञेयं तेन त्रिपदमेकं नाम ९३ १५० ॥ ॥

द्वा०
७०

व्यासः पुराणेतिहासादेः स्वश ९४ सर्गः १ तमेवसज्जंपुराणादिव्यासविशेषणोसंक्षेपोविस्तारइतिचसत्वादिरूपोभाष्यादिरूपइत्यर्थः इदमपित्रिपदंनामपर्वमत्रिहोमेएकंकंनाम
जपेत् सर्वमंत्रजत्यः ॐसर्गायसंक्षेपायस्वाहेति ॐनमः सर्गायसंक्षेपायविस्तरायेतिचमरग्रपेपृथिव्यैचमहतेचस्वाहेतिवदनेकमहावतोप्येकनामत्वंज्ञेयं ९५ पर्ययोनरःप
तितः अपतेव्यासोतीतिपर्ययः सचनरोजीवः समष्टिजातोवैश्वानरइत्यर्थः ९६ ऋतः ९७ संवत्सरः ९८ मासः ९ ९ पक्षः ९०० इतिनाम्नानवमंशतं संख्या

व्यासः सर्गः ससंक्षेपो विस्तरः पर्ययोनरः ऋतः संवत्सरोमासः पक्षः संख्यासमायनः ४१ कालाकाष्ठालवामात्रा
मुहूर्त्ताहः क्षणाः क्षणाः विश्वक्षेत्रंप्रजावीजंलिंगमाद्यस्तुनिर्गमः ४२ सदसद्व्यक्तमव्यक्तंपितामातापितामहः
स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंत्रिविष्टपं ४३ ॥ ॥ ॥ ॥

समायनः अल्पादिसंख्यासमासिरूपः संक्रांतिदर्शपूर्णमासादिरूपः १ ४१ काला २ काष्ठा ३ लवाः ४ मात्रा ५ मर्हूत्तोहः क्षपाइतिसमस्तंनाम ६ क्षणाः अल्पाद्या
: कालावयवाः स्पष्टार्थाः ७ विश्वक्षेत्रब्रह्मांडरूक्षसालवालंचिन्मात्रं ८ प्रजावीजंमायाविशिष्टचैतन्यरूपमव्यक्तं ९ लिंगंमहत्तत्वं १० आद्योनिर्गमः अंकुररूपीअह
मितिप्रथमोध्यायः ११ १४२ सत्कार्यं १२ असत्कारणं १३ व्यक्तंइंद्रियग्राह्यं १४ अव्यक्तंअहंनजानामीत्यनुभवैकगम्यमज्ञानं १५ पिता १६ माता १७ पि
तामहः १८ स्वर्गद्वारंतपः १९ प्रजाद्वारं रागः २० मोक्षद्वारंवैराग्यं २१ त्रिविष्टपं स्वर्गं २२ ॥ ॥ ॥ एम०
पै२
७०
१

निर्वाणं मोक्षः २३ ह्लादनः आनंदयिता एष ह्येवानंदयातीति श्रुतेः २४ ब्रह्मलोकः सत्यलोकः २५ परागतिः ततोप्यधिका गतिर्गन्तव्यः २६ देवासुरविनिर्माता २७ देवासुरपरा
पराः पुरुषमार्थ २८ १४४ देवासुरगुरुः बृहस्पतिशुक्ररूपः २९ देवो विजिगीषुः ३० देवासुरनमस्कृतः ३१ देवासुरमहामात्रः मात्रः श्रेष्ठः ३२ देवासुरगणाश्रयः आश्र
यणीयः ३३ १४५ देवासुरगणाध्यक्षः इंद्रविरोचनादिरूपः ३४ देवासुरगणाग्रणीः स्वामिकार्तिकेय[?]दिदैत्यरूपः ३५ देवातिदेवः इंद्रियाण्यतिक्रम्य स्वयमेव प्रकाशमान

निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परागतिः देवासुरविनिर्माता देवासुरपरायणः ४४ देवासुरगुरुर्देवो देवासुरनम
स्कृतः देवासुरमहामात्रो देवासुरगणाश्रयः ४५ देवासुरगणाध्यक्षो देवासुरगणाग्रणीः देवातिदेवो देवर्षिर्देवा
सुरवरप्रदः ४६ देवासुरेश्वरो विश्वो देवासुरमहेश्वरः सर्वदेवमयोऽचिंत्यो देवतात्मात्मसंभवः ४७

स्त्र१

: ३६ देवर्षिर्नारदादिरूपः ३७ देवासुरवरदो ब्रह्मरुद्रादिरूपेण ३८ १४६ देवासुरेश्वरस्तेषामंतर्यामी ३९ विश्वः विशत्यस्मिन्निति विश्वः जागन्नभेशयः ४० देवासुरमहे
श्वरः अंतर्यामिणा ईश्वरस्याप्यधिष्ठानं अतो महेश्वरः ४१ सर्वदेवमयः अग्निर्मः हरिविरूपीवंद्रसूर्याविन्यादिरूपत्वेः ४२ अचिंत्यः नास्ति चिंत्योऽन्योयस्मयस्मात् ४३ देवतात्मा
देवतानामंतरात्मा आत्मस्वरूपः ४४ आत्मसंभवः स्वतः सिद्धः ४५ १४७ ॥ ॥ ॥ ॥

पत्तादिकं १

उद्भितस्तद्भिष्णुप्रादुर्भवनीतिवाफलंउद्भिन्नीतिवास्मांस्यात्परहृरूपोवा ४६ त्रिविक्रमः त्रीणिभुवनादिक्रमनइतिवामनः ४७ वैद्योविद्यावान् ४८ विरजः निर्मलः ४९ नीरजः
रजोगुणहीनः ५० अमरः विनाशहीनः ५१ इड्यः स्तुत्यः ५१ हस्तीश्वरः कालहस्तीश्वराख्योवायव्यलिंगरूपः ५३ व्याघ्रोव्याघ्रेश्वराख्यामकलिंगरूपः ५४ देवसिंहः देवेषु
पराक्रमी ५५ नरर्षभः नरेष्वपिश्रेष्ठः ५६ १५८ विबुधः विशेषेणप्राज्ञः ५७ अग्रवरः अग्रेग्रहणोतियज्ञभागादिकमित्यर्थः ५८ सूक्ष्मः दुर्लक्ष्यः ५९ सर्व
देवः तत्तद्देवतात्मकात्तेनपीतमासः ६० तपोमयः तपःप्रधानः ६१ सुयुक्तः सततंयुक्तः सन्नद्धः ६२ शोभनः कल्याणः ६३ वज्रीवज्रायुधः ६४ ग्रामाणांश्च

उद्भित्त्रिविक्रमोवैद्योविरजोनीरजोमरः ईड्योहस्तीश्वरोव्याघ्रोदेवसिंहोनरर्षभः ४८ विबुधोग्रवरः सूक्ष्मः सर्वदेवस्तपो
मयः सुयुक्तः शोभनोवज्रीप्राणानांप्रभवोऽव्ययः ४९ गुहः कांतोनिजः सर्गः पवित्रंसर्वपावनः शृंगीशृंगप्रियोबभ्रू
राजराजोनिरामयः ५० ॥ ॥ ॥ ॥ ॥ ॥

प्रधविशेषाणांप्रभवउत्पत्तिस्थानं ६५ अव्ययः नविविधेनरूपेणव्रतिष्ठासोन्येनसाध्यै स्मयः एकाग्रचित्तेनग्राह्यः एरवंप्रत्ययं तोयं ६६ ४९ गुहः कुमारः ६७ कां
तः कस्मसखस्यत्रंतः मीमांस्यानंदस्यपराकाष्ठेत्यर्थः ६८ निजः सर्गः सृजनइतिसर्गतः सविशेषणंनिजः स्मस्मात्स्वनन्यः ६९ पवित्रंपविकृत्रातस्तलंसृत्सुरः तं
तस्मात्त्रायतइतिपवित्रं ७० अतएवसर्वपावनः सर्वेषांब्रह्मादीनामपिशुद्धिकरः ७१ शृंगीवृषभादिरूपः ७२ शृंगप्रियः पर्वतशिखराश्रयः ७३ बभ्रुः शनैश्चरः ७४
राजराजः कुबेरः ७५ निरामयः निर्दोषः ७६ ॥

अभिरामः प्रीतिजनकः ७७ सुरगणः देवसंघरूपः ७८ विरामः सर्वोपरमरूपः ७९ सर्वसाधनः सर्वाणि आश्रमकर्माणि परस्यासपेसाधनानि यस्मिन्निति ८० ललाटाक्षः ८१ विश्वदेवः विश्वब्रह्माण्डैकदीव्यति क्रीडतीति ८२ हरिणः मृगरूपः ८३ ब्रह्मवर्चस विद्यातपः समुद्भवं तेजः तद्वानत्वर्शआद्यच्प्रत्ययान्तोयं ८४ १५१ स्थावराणांपतिः हिमाचलादिरूपः ८५ नियमेन्द्रियवर्द्धनः नियमैर्निग्रहैः कृतीइंद्रियाणांसमनस्कानांवर्द्धनो हिंसकः कीनाशमानालक्ष्मसमाधिरित्यर्थः ८६ सिद्धार्थः नित्यसिद्ध एव मोक्षोऽ ज्ञानापगममात्रेणाकंठगतविस्मृत

अभिरामः सुरगणो विरामः सर्वसाधनः ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ५१ स्थावराणां पतिश्चैव नियमेन्द्रियवर्द्धनः सिद्धार्थः सिद्धभूतार्थोऽचिंत्यः सत्यव्रतः शुचिः ५२ ॥ ॥ ॥

चामीकरवदर्थो नीपोपसस्य सिद्धार्थः तत्वज्ञानार्थी ८७ अतएव सिद्धभूतार्थः पूर्वसिद्धः पश्चात्तमसाधितः सिद्धभूतः पूर्वकालेकेतिसमासः सवामोऽर्थश्च सिद्धभूतार्थः उक्तविधोमोक्षः ८८ अतएवअचिंत्यः चिन्त्यादुपास्यादन्यत्वात्मत्वात्तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासतेइतिश्रुतेश्च ८९ सत्यव्रतः सत्यंव्रतमनर्थान्निवव्रतानि यस्य स ९० शुचिः निर्मलचित्तः ९१ १५२ १५३ ॥ ॥ ॥ ॥ ॥

टी० ७२

व्रताधिपः नन्नद्रुतफलप्रदः ७२ परांविष्णुतेजसश्चाङ्गेभ्योः परब्रह्मस्यः परंगरीयंशिवाख्यं शिवमद्वैतंचतुर्थमसंतइतिश्रुतिप्रसिद्धं ७३ अनन्तएवब्रह्मदेशतः कालतोवस्तुतश्चपरि
छेदशून्यंनेहनानास्तिकिंचनेतिश्रुतेश्चादीनामनन्तत्वेनस्वगतभेदस्याप्यभावाद्वैतैकरसंवस्तुतन्मात्रं ७४ भक्तानांपरमागतिः भंजोआमर्दने।स्वरूपंभक्तानांविष्ण्वादिषुपूर्वेषु
वेसुउत्तरस्मिन्उत्तरस्मिन्स्वविलापनलक्षणां आमर्दनंसैंधवखिल्यसलिलन्यायेनकृतंपरमानिरतिशयागति कैवल्यरूपाविश्रांतिः ७५ विमुक्तःदेहांतेविशेषेणामुक्तः ७६
कुतोविमुक्तत्वमतआहमुक्ततेजाइति तेजः पदेनात्रालिंगशरीरमुच्यते तमुक्तंतेजोनेनेतितथा ७७ मुक्ततेनसत्वमपिकुतः यतःश्रीमानयोगैश्वर्यवानतस्याहियोगी
तिमस्तुयथाकामंमोक्षवदिहैवतिष्ठतिब्रह्मलोकेवामहेन्यनाऽप्यागच्छति इहैवलिंगशरीरस्यवयवेह्यात्मत्वाविमुद्दकैवल्यमाप्नोति ७८ श्रीयत्नमपिकुतः यतः श्रीवर्द्धनः आ

व्रताधिपः परंब्रह्मभक्तानांपरमागतिः विमुक्तोमुक्ततेजाश्चश्रीमान्श्रीवर्द्धनोजगत् १५३ १०००

त्मःसामानिपत्रंषिंसाहिश्रीरमृतामतामितिश्रुतेः वदत्यप्रत्यंश्रियंकर्मोपास्तिज्ञानकांडात्मिकांवर्द्धयतितत्तद्वक्ताथैनुशनेनसम्यकारियोयतिसश्रीवर्द्धनः ७९ जगतत्व
व्याकृतादिघटांतंनश्वरत्वात्मरूपः गच्छतिनित्यंरूपांतरंप्राप्नोतीतिजगदितिसुत्पत्तेः यथानाटीनामपिजगत्त्वंचलंगुणा हन्तमितिकापिलसिद्धांतावा एवंवयत्राहरोस्थिरउक्तःस
एवजगदित्यत्रंते स्थिरेभूमात्मानिजगत्कल्पितमित्यक्तंभवतितेनश्वात्मैवेदंसर्वं ब्रह्मैवेदंसर्वंतस्मप्यहंब्रह्मास्मयमात्मेत्यादिशास्त्रसिद्धंब्रह्माद्वैसंप्रतिपादितंभवति।नतिशिव
म १०० १५३ नाम्नांदशमंशतंसंपूर्णं॥ ॥ ॥ ॥ ॥ ॥

राम० ७२

पयेति बहूनां मध्ये सहस्रेषु धाना निर्माणसुहृन्मस्कृतोऽसीत्यर्हस्पार्थः ५७ एतद्धीति परमं ब्रह्म अक्षरं ब्रह्मप्राप्तिसाधनमतो विद्यारूणां जपन परंब्रह्म कैवल्यं अधिगच्छतीत्यर्थः आत्मसंयोनं
५८ आत्मसंस्थाकरः आत्मनिवृत्तीन्निसंस्थात्मनन्यव्यापाररूपापरिसमाप्तिः तां करोतीति मोक्षप्रदइत्यर्थः ५९ तथैवेति बहुभिर्जन्मभिरीशानं स्तवैस्तुवंतः स्तुवंतिवरमंतिचेति प्रथम

यथा प्रधानं भगवानिति भक्त्यास्तुतो मया यं न ब्रह्मादयो देवा विदुस्तत्त्वेन र्षयः स्तोतव्यमर्च्यं वंद्यं च कः स्तोष्यति जगत्पतिं भक्त्या त्वेवं पुर
स्कृत्य मया यज्ञपतिर्विभुः ५५ ततोऽभ्यनुज्ञां संप्राप्य स्तुतो मतिमतां वरः शिवमेभिः स्तुवन्देवं नामभिः पुष्टिवर्द्धनैः ५६ नित्ययुक्तः
शुचिर्भक्तः प्राप्नोत्यात्मानमात्मना एतद्धि परमं ब्रह्म परं ब्रह्माधिगच्छति ऋषयश्चैव देवाश्च स्तुवंत्येतेन तत्परं ५८ स्तूयमानो महा
देवस्तुष्यते नियतात्मभिः भक्तानुकंपी भगवानात्मसंस्थाकरो विभुः ५९ तथैव च मनुष्येषु ये मनुष्याः प्रधानतः आस्तिकाः श्रद्द
धानाश्च बहुभिर्जन्मभिः स्तवैः ६० भक्त्या ह्यनन्यमीशानं परं देवं सनातनं कर्मणा मनसा वाचा भावेनामिततेजसः ६१ शयाना जा
ग्रमाणाश्च व्रजंनुपविशंस्तथा उन्मिषन्निमिषंश्चैव चिंतयंतः पुनः पुनः ६२ शृण्वंतः श्रावयंतश्च कथयंतश्च ते भवं स्तुवंतः स्तू
यमानाश्च तुष्यंति च रमंति च ६३ जन्मकोटिसहस्रेषु नानासंसारयोनिषु जंतोर्विगतपापस्य भवे भक्तिः प्रजायते ६४ उत्पन्ना च
द्वितीयस्तत्रर्थस्सेरन्वयः ६० भक्त्या ह्याराध्य इति निश्चयेन भावे भवे भक्तिरनन्या सर्वभावना भावितः कारणे चास्य सर्वस्य सर्वथा ६५ ॥
नयीत्या ६२ व्रजन्नित्याद्येकवचनानि बहुवचनार्थानि सर्वांमलुगिति विभक्तेः सरार्थः सः ६४ अनन्या अभेदेन शिवोऽहमस्मीति भावना यतया च प्रवृत्तिः अथ येषां देवतान्तु
यासिः योसावसोऽहमिति न स वेद यथा पशुरेवं स देवानामिति भेदेनोपासनं निंदति शिवे कारणे भक्तिस्संपन्नः

मानिवेनीमानात्मसिद्धेकसमसमवेमाश्वपनतः सर्वविधासर्वैः प्रकाशैस्तत्त्वामनीति मंत्रः ५५

रा०
७२

६८ एवमिति संसारमोचनं देवं क्षेत्रे च्छ्रेमे देवाः मनुष्याणां तपोबलं विकुर्वंति नाशयंतीति संबंधः तेषां यतोऽन्याशक्तिर्नास्ति ६९ इतिहेतोः तेन तं दिना ७० गीयते च संततौ

एतद्देवेषु दुःप्रापं मनुष्येषु न लभ्यते निर्विघ्ना निश्चला तस्मिन्भक्तिरव्यभिचारिणी ६६ तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणां येन यान्ति
परां सिद्धिं तद्भावगतचेतसः ६७ ये सर्वभावानुगताः प्रपद्यंते महेश्वरं प्रपन्नवत्सलो देवः संसारात्तान्समुद्धरेत् ६८ एवमन्ये विकु
र्वंति देवाः संसारमोचनं मनुष्याणां मतेदेवेनान्याशक्तिस्तपोबलं ६९ इतितेनेंद्रकल्पेन भगवान्सदसस्पतिः कृत्तिवासास्ततः कृ
ष्णेतेंदिनाश्रुभवुद्धिना ७० एवमेतं भगवतो ब्रह्मा स्वयमधारयत् गीयते च स वेदेषु तब्रह्माशंकरसंनिधौ ७१ इदं पुराणं पवित्रं च स
र्वेदापापनाशनं योगदं मोक्षदं चैव स्वर्गदं तोषदं तथा ७२ एवमेतत्परं तेयएकमनस्यात्तु शंकरे यागतिः सांख्ययोगानां व्रजंत्ये
तां गतिं तदा ७३ एवमेवं प्रयत्नेन सदा रुद्रस्य सन्निधौ त्र्यष्टमेकं चरेद्ग्रन्त्वा प्राप्नुयादीप्सितं फलं ७४ एतद्रहस्यं परमं ब्रह्मणो
हृदि संस्थितं ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ७५ मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तंडिमागमत् महता तपसा प्राप्तस्तं
डिना ब्रह्मसद्मनि ७६ तंडिः प्रोवाच शुक्राय गौतमाय च भार्गवः वैवस्वताय मनवे गौतमः प्राह माधवः नारायणाय साध्याय समा
धिष्ठाय धीमते यमाय प्राह भगवान्साध्यो नारायणोऽच्युतः ७८ ॥

लो०३१

ब्रह्मणा शंकरसंनिधौ ब्रतस्तं ब्रह्मा गोविंदोन ज्ञानीयात ७१ ७२ ७३ ७४ ७५ ७६७८ ॥ ॥ ॥ ॥ ॥ राम०
७२

ग्रा०१

सप्तार्थोयंग्रंथशेषः १८१ इतिश्रीदानधर्मेषुशिवसहस्रनामार्थप्रकाशः महायोगी पठस्तस्मिन्निति शेषः हेपुत्रयुधिष्ठिर १ ४ आलंवायनआलंवगोत्रः ६ हेपुत्रशतंपुत्रा

नाचिकेतायभगवानाहवैवस्वतोयमः मार्कंडेयायवार्ष्णेयनाचिकेतोभ्यभाषत ७९ मार्कंडेयान्मयाप्राप्तोनियमेनजनार्दन तवाप्यहं
ममित्रघ्नलब्धवान्दीर्घांचविश्रुतं ८० स्वर्ग्यमारोग्यमायुष्यंधन्यंवेदेनसंमितं नास्यविघ्नंविकुर्वंतिदानवायक्षराक्षसाः ८१ पिशाचायातुधानावागुह्य
काभुजगाअपि यःपठेतशुचिःपार्थब्रह्मचारीजितेंद्रियः अभग्नयोगोवर्षंतसोश्वमेधफलंलभेत ८२ इतिदानधर्मेमहादेवसहस्रनाम १७
वैशं० महायोगीततःप्राहकृष्णद्वैपायनोमुनिः पठस्वपुत्रभद्रंतेप्रीयतांतेमहेश्वरः १ पुरापुत्रमयामेरौतप्त्वातपरमंतपः पुत्रहेतोर्महारा
जस्तवएषोनुकीर्तितः २ लब्धवानीप्सितान्कामानहंवैपांडुनंदन तथात्वमपिशर्वाद्धिसर्वान्कामानवाप्स्यसि ३ कपिलश्चततःप्राह
सांख्यर्षिर्देवसंमतः मयाजन्मान्यनेकानिभक्त्याचाराधितोभवः प्रीतश्चभगवान्ज्ञानंददौममभवांतकं ४ चारुशीर्षस्ततःप्राहशक्र
स्यदयितःसखा आलंवायनइत्येवंविश्रुतःकरुणात्मकः ५ मयागोकर्णमासाद्यतपस्तप्त्वाशतंसमाः अयोनिजानांदांतानांधर्म
ज्ञानांसुवर्चसां ६ अजरामराणामदुःखानांशतवर्षसहस्रिणां लब्धंपुत्रशतंशर्वात्पुरापांडुनृपात्मज ७ वाल्मीकिश्चाहभगवान्युधिष्ठिर
मिदंवचः विवादेसाग्निमुनिभिर्ब्रह्मघ्नोवैभवानिति ८ उक्तःक्षणेनचाविष्टस्तेनाधर्मेणभारत सोहमीशानमनघममोघंशरणंगतः ९

णमितिशेषः ७ विवादेवेदविपरीतवादे अग्निसहितैर्मुनिभिरुक्तः इतिसंबंधः ८ तेनवेदविरोधजेन १० ॥ ॥ ॥ ॥

रा०
७४

१३ पितृतल्पाविषाः सेषोऽन्यानापितः समम्इतिसृष्टेः सेष्टाः ध्यातरस्तेषांवधेन १४ शिखंडीकपर्दीशिवविग्रहः कल्याणशरीरः १७ शक्रास्यधर्मशाखेत्कृविरमयाकरणात् कुपि

थि ४
मुक्तिष्वास्मिततः पापैस्ततोऽदुःखविनाशनः आहमांत्रिपरघोवैपशस्तेषुभविष्यति १० नामदष्पस्य्कौंतेपमिदंधर्म्मभतांवरः ऋषि
मध्येस्थितः प्राहज्वलन्निवदिवाकरः १२ पितृविप्रवधेनाहमार्ज्ञवैयांडवाग्रज प्रविश्यैत्वामहादेवंगतोऽस्मिशरणांनृप १२ नामभिर्क्षा
सुवंदेवंस्ततस्तस्तुष्टोभवद्भवः परम्मुवततोदेवोदिव्यारपपसृवाणिचैवमे १३ पापंचतेनभविताअजेयश्चभाविष्यसि नतेषभविनामस्तुरजरश्च
भविष्यसि १४ आहमांभगवानेवंखंडीशिवविग्रहः तस्वाप्तंचमेसर्वेप्रसादान्तसधीमतः १५ विश्वामित्रस्तदोवाचक्षत्रियोऽहंतदाभवं ब्रा
ह्मणोऽहंभवानीतियथाचाराधितोभवः १६ तस्मात्सारान्मयाप्राप्तंब्राह्मण्यंपरदुर्लभं महत् असितोदेवलश्चैवप्राहपांडुसुतंनृपं १७
शापाच्छक्रस्यकौंतेयविभोधर्म्मोनशन्नदा तन्मेधर्म्मंयशश्चाग्र्यमायुश्चैवाददत्प्रभः १८ ऋषिर्गृत्समदोनामशक्रस्यदयितःसखा
प्राहाजमीढंभगवान्बृहस्पतिसमद्युतिः १९ वशिष्ठोनामभगवांश्चाक्षुषस्यमनोः सुतः शतक्रतोरचिंत्यस्यसत्रेवर्षसहस्रिके २० वर्त्तमा
नेव्रवीहाक्यंसाम्निरुच्चारितेमया रथंतरंद्विजश्रेष्ठनसमगितिवर्त्तते २१ समीक्षस्वपुनर्बुध्यायापंत्यक्त्वाद्विजोत्तम अयत्नवाहिनंपा
पमकार्षीस्तंसुदुर्म्मते २२ श्रीरामायनमः ॥

तस्य १८ वभुः पार्थिवः सन्निविरोधः २० उत्साहिनेत्प्रमयेतिशेषः २१ पापंवितथामिनिवेशंत्यक्त्वासमीक्षस्वविचारपअयत्नवाहिनंनयज्ञंवहतितपायंअवज्ञारूपाज्ञमपराधं २३ ॥ रा०
७४

२५ निधनेऽप्यंतेसगरंएवेत्यर्थः २६ साम्यंत्र्यैवैषम्यं पुत्रयोः गत्वमदृशतत्कालयोः २७ परंउत्कृष्टंयथास्यात्तथा २८ नमेमयासमः पंडितोस्तिवियया हेतुना ३० अर्थात

ग्रा १

एवमुक्त्वामहाक्रोधः प्राहशंभुःपुनर्वचः अन्नपारहितोदुःखीनित्यंभीतोवनेचरः २३ दशवर्षसहस्राणिषष्टिश्चशतानिच नष्टपानीयपवनेमृगैरन्यै
श्चवर्जिते अयाज्ञीयद्रुमेदेशेरुरुसिंहनिषेविते भवितात्वंमृगःक्रूरोमहादुःखसमन्वितः २५ तस्यवाक्यस्यनिधनेपार्थजातोस्म्यहंमृगः
ततोमांशरणंप्राप्तंप्राहयोगीमहेश्वरः २६ अजरश्चामरश्चैवभवितादुःखवर्जितः साम्यंसमस्तुतेसौख्यंपुत्रयोर्वर्द्धतांक्रतुः २७ अत्र
यहानेवमेषकरोतिभगवान्विभुः परंधाताविधाताचसुखदुःखेचसर्वदा २८ अचिंत्यएषभगवान्कर्म्मणामनसागिरा नमेतातयुधिष्ठिरश्रेष्ठ
विद्ययापंडितःसमः २९ वासुदेवस्तदोवाचपुनर्मतिमतांवरः सुवर्णाक्षोमहादेवस्तपसातोषितोमया ३० ततोथभगवानाहप्रीतोमांवै
युधिष्ठिरः अर्थात्त्रिपततःकृष्णमत्प्रसादाद्भविष्यसि ३१ अपराजितश्चयुद्धेषुतेजश्चैवानलोपमं एवंसहस्रशश्चान्यान्महादेवोवरंददौ
३२ मणिमंथेथशैलेवैपुरासंपूजितोमया वर्षायुतसहस्राणांसहस्रशतमेवच ३३ ततोमांभगवान्प्रीतइदंवचनमब्रवीत् वरंवृणीष्वभद्रं
तेयस्तेमनसिवर्त्तते ततःप्रणम्यशिरसाइदंवचनमब्रुवं यदिप्रीतोमहादेवोभक्त्यापरमयाप्रभुः ३५ नित्यकालंतवेशानभक्तिर्मेवत्त
धर्मस्यफलंकामस्यमूलंनार्थः सर्वस्मात्प्रियः ततोपिप्रियः अनंतमानन्दल्पस्वैषांभविष्यतीत्यर्थः ३२ पुराणूर्वा ।। मेस्थिरा एवमस्त्वितिभगवांस्तत्रैवांतरधीयत ३६

ग्रा १

वतारे ३६ ।।

३७ चतः षष्टिः अंगानिश्रवपवायसतंकलामम हृशानसत्ततमनोपज्ञेनमानसेनएज्ञेनेन ४१ इतिममहृदिस्थितंमंतंमत्वाज्ञात्वा हरन्नैम सु१ मांग्राह पातवमपिसंभावनाएतस्मा

जैगीषव्यउवाच ममामष्टगुणामैश्वर्यंदत्तंभगवाताधुरा पत्नेनमेन्ववलिनावाराणस्यांयुधिष्ठिर ३७ गाणा३० चतः षष्टंगमरदत्कलाज्ञा
नेममाद्भुत सरस्वत्यास्तटेतुष्टोमनोयज्ञेनपांडव ३८ तत्यंममसहस्रंतसतानांब्रह्मवादिनां अयश्चैवमपुत्रस्यसंवत्सरशतायुतं ६९
पराशरउवाच घसाघाहंपुराशर्वमंमनोचिंतयन्नृप महातपामहातेजामहायोगीमहायशाः ४० वेदव्यासः श्रियावासोब्राह्मणःकरुणा
न्वितः अथसावीप्सितःपुत्रोममस्यादैमहेश्वरात ४१ इतिमत्वाहृदिमत्तंप्राहमांसुरसत्तमः मपिमभावनाया यास्याःफलात्कृष्णो
भवियति ४२ सावर्णस्यमनोःसर्गेसप्तर्षिश्चभविष्यति वेदानांचसवैवक्ताकुरुवंशकरस्तथा ४३ इतिहासस्यकर्त्ताचपुत्रस्तेजगतोहि ग ४
तः भविष्यत्तिमहेंद्रस्यदयितःसमहामुनिः ८ ४४ अजरश्चामरश्चैवपराशरसुतस्तव एवमुक्त्वासभगवांस्तत्रैवांतरधीयत युधिष्ठि गै ३
रमहायोगीवीर्यवानक्षयोव्ययः ४५ मांडव्यउवाच अचोरश्चोरशंकायांशूलेभिन्नोत्यहंतदा तत्रस्थेनस्तुतोदेवः प्राहमांवैनरेश्व
र ४६ मोक्षंप्राप्स्यसिशूलाच्चजीविष्यसिसमार्बुदं रुजाशूलकृताचैवनतेविप्रभविष्यति ४७ आधिभिर्व्याधिभिश्चैववर्जितस्त्वं
भविष्यसि पादाच्चतुर्थात्संभूतोआत्मायस्मान्मुनेतव ४८

त्फलमहंप्रासेशत्तिन्त्रसयाः फलात्पुरायात्तवकृष्णोनामपुत्रोभविष्यति ४१ पादाच्चतुर्थात तपःशौचंदयासत्यमितिचत्वारोधर्मस्यपादातेषांचतुर्थात्सत्यात्प्रादेवतवात्माशरीरं ४८

५२ पितृदृष्ट्येरतिवुर्ज्ञोगृहमागतः दुःखितावैवथ्युरः खेन ५३ हृष्येरहे विश ५५ शरणाकूरुत वायवाघातेनवाखघंवापक्कतयाफलानामधः पतनेनक्लिशरणांशरणा तस्

त्वंभविष्यस्यनुपमोजन्मचैसफलंकुरुती। यथाभिषेकंसकलंत्वमविघ्नेनचाप्स्यसि ४९ स्वर्गंचैवाक्षयंविश्वविश्वामित्रवोर्जितं एवमुक्त्वातभगवानवेरोपो

हृषवाहनः ५० महेश्वरोमहाराजक्षतिवासामहाद्युतिः सगणोदेवतश्रेष्ठस्तत्रैवांतरधीयत ५१ मार्कं० विश्वामित्राम्यनुज्ञातोगृहंपितरमा

गतः अब्रवीन्मांततोमातादुःखिताहदतीमशं ५१ कौशिकेनाभ्यनुज्ञातंपुत्रंवेदविभूषितं ततांततरणांदांतंपितात्वांपश्यतेनघ ५३ त्वाजनस्तु

म्यावचनं निराशोगुरुदर्शने नियतात्मामहादेवमपश्यंसोब्रवीच्चमां ५४ पितामाताचतेत्वंचपुत्रमृत्युविवर्जिताः भविष्यथविशङ्किपंद्रष्टासि

पितरंक्षपे ५५ अनुज्ञातोभगवतागृहंगत्वायुधिष्ठिर अपश्यंपितरंतातइष्टिंकृत्वाविनिःसृतं ५६ उपस्पृश्यगृहीत्वेध्मकुशांश्चशरणा

कुरुत तांविसृज्यचमांप्राहपितासाश्रुविलेक्षणाः ५७ प्रणामंतंपरिष्वज्यमूर्द्ध्न्युपाघ्रायपांडव दिष्ट्याहृष्टोसिमेपुत्रकृतविश्वस्तुहागतं ५७ वैशं० | प ४

एतान्यत्यद्भुतान्येवकर्माणिपथमहात्मनः प्रोक्तानिमुनिभिःश्रुत्वाविस्मयामासपांडवः ५८ ततःकृष्णोब्रवीद्वा कंपुनर्मतिमत्तांवरः युधिष्ठि

रंधर्मनिर्धिंधृक्ष्हूतमिवेश्वरः ५९ वासुदेव० उपमन्युर्मपिप्राहतपन्निवदिवाकरः अशुभैःपापकर्माणोयेनराः कलुषीकृताः ६०

प्रानाः कुरवोऽन्यानिशरणाकुरवस्तान ईश्वरः ईशानंनप्रपद्यंतेतमोराजसवृत्तयः ईश्वरंसंप्रपद्यन्तेद्विजाभावितभावनाः ६१ ६१ ६१

वेत्युःकुरुतर्नपांतरभक्तेरतिमेरिनीभक्ताचोदनः ५६ साश्रुलाराविलेक्षणोभ्यस ५८ ईश्वरोविश्वः ६१ ॥ ॥ ॥ ॥

हो०
७६

६४ कूलानि गृहतडागादीनि गृहेकूलंतटेकूपेसैन्यपश्चान्नतटाकयोरिति मेदिनी ६६ आत्मनाचितेन ६७ आदित्यचंद्रावित्यादि संवेश कोज्ञातं विद्धीति मन्नमस्थे नान्वयः ७० सत्यंब्रह्मतत्त्वंवेदकोवेदरूपनिषत्प्राधान्यात्तथैकोनेनं वेदवाहः वेदपाठकाः हव्यंइविर्देवोभागः ७२ आश्रमस्ताब्रह्माकाराधीन्निः ७३ रुमयाः धूमेनैवतप्यंतः वाचा

सर्वथावर्त्तमानोपि योभक्तः परमेश्वरे सहशोरण्यवासीनांमुनीनांभावितात्मनां ६२ ब्रह्मत्वंकेशवत्वंवाशक्रत्वंवासुरैः सह त्रैलोक्यस्या
धिपत्यंवातत्पोरुद्रः प्रयच्छति ६३ मनसापिशिवंतात ये प्रपद्यंतिमानवाः विधूयसर्व्वपापानिदेवैः सह वसंतिते ६४ भित्वाभित्वाचकूला
निहत्वासर्वमिदंजगत् यजेद्देवंविरूपाक्षंनसपापेनलिप्यते ६५ सर्वलक्षणहीनोपियुक्तोवासर्वपातकैः सर्वंनुदतितत्पापंभावयंश्छिव
मात्मना ६६ कीटपक्षिपतंगानांतिरश्चामपिकेशव महादेवप्रपन्नानांनभयंविद्यतेक्वचित् ६७ एवमेवमहादेवंभक्तायेमानवाभुवि नते
संसारवशगाइतिमेनिश्चितामतिः ततः कृष्णोब्रवीद्वाक्यंधर्मपुत्रंयुधिष्ठिरं ६८ विष्णुरुवाच आदित्यचंद्रवनिलानलोचद्यौर्भूमिरापो
वसवोथविश्वे धातार्यमाशुक्रबृहस्पतीचरुद्राः ससाध्यावसवोथविश्वे ७० ब्रह्माशक्रोमारुतोब्रह्मसत्यंवेदायज्ञादक्षिणावेदवाहाः सो
मोयष्टायच्चहव्यंहविश्चरक्षादीक्षासंयमायेचकेचित् ७१ स्वाहावौषट्ब्राह्मणाः सौरभेयीधर्ममग्र्यंचकालचक्रंबलंच यशोदमोबुद्धिमत्तां
स्थितिश्चशुभाशुभंयेमुनयश्चसप्त ७२ आग्र्याबुद्धिर्मनसादर्शनेचस्पर्शश्चाग्र्यः कर्मणांयाचसिद्धिः गणादेवानामूष्मपाः सोमपाश्चले
खाः सुयामास्तुषिताब्रह्मकायाः ७३ आभास्वरागंधपादृष्टिपाश्चवाचाविरुद्धाश्चमनोविरुद्धाः शुद्धाश्चनिर्माणरतास्चदेवास्पर्शाशनादर्शि
पाआज्यपाश्च ७४ चिंतयोत्तायेचदेवेषुमुख्यायेचाप्यन्येदेवतास्चाजमीढ सुपर्णगंधर्वपिशाचदानवायक्षास्तथाचारणापन्नगाश्च स्थूलंसूक्ष्मं
मृदुचाप्यसूक्ष्मंदुःखंसुखंदुःखमनंतरंच सांख्यंयोगंयत्परंणांपरंचशर्वाज्जातंविद्धिकौंतेयतन्मे ७५

पिंदुहवाद्विः यमनशीलाः निर्माणंच्यनेकवाभवनंयोगेनानेकाशीरधारणंतत्ररताः ७५ चिंत्यद्योत्ताः संकल्पितमात्रंवस्तुयेषांसद्यएवतः प्रकाशते ताडशाः ७६ ॥ ॥ ॥

राम०
७६

प १

तत्संभूताइति भूमेः सकाशाद्बीजानीवीश्वात्कृत्ताकाशाख्याईश्वराः भूतकृतो विपृहादिस्वशरत्तनरएवानेदमात्रशरीरात्कृतर्थात्संभूताः तेचवरेण्याः उपास्यैः स्वहूत
तपेश्वभिर्वरणीयाः एर्ववीजाद्बीजांतरमिवानादेरहिष्टिप्रवाहेश्वेस्मादीशाडुत्तरईशोमसमूमौउत्पद्यतेइत्याशयेनोक्तपुराणतनीमिति यथावीजशक्त्याम्भद्यांमदि
वि चैष मानयामतद्दृक्ता किंयतइत्सर्वईश्वरशक्त्याज्ञानंदचिन्मात्रंवस्तुविश्वाकारं कैयतइतितेनशक्तिंविनाकथंकेवलादुत्पत्तिरित्यपास्तंशक्त्यानादित्वस्याभ्युपगमात्
एतेनवीजशक्तेर्भर्जनेनेवजीवगतः वद्याशक्तेर्विद्याग्निनादाहेसतिमुक्तानांपुनरुत्पत्तिः केवलीभावश्चव्याख्यातः ७७ यात्तपसाध्यानेनविचिन्वतः विविच्यतिस्वा

तत्संभूताभूतकृतोवरेण्याः सर्वेदेवाभुवनस्यास्यगोपाः आविश्येमांधरणींयेभ्यरक्षन्पुरातनींतस्यदेवस्यसृष्टिं ७७ वि[illegible]चि
न्वंतस्तपसातत्स्यवीर्यः किंचिन्नत्वंप्राणहेतोर्न्नतोस्मि दृष्टात्तदेवः संवरणीतिहेष्ठानभिष्टुतोनः प्रभुरव्ययः सदा ७८ इमंस्तवंसंनि
यतेंद्रियश्चभूत्वाशुचिर्यिः पुरुषः पठेत अभग्नयोगोनियतोमासमेकंसंप्राप्नु यादश्वमेधेफलंयत ७९ वेदानकृत्स्नान्ब्राह्मणः
प्राप्नुयात्तुजयेन्नृपः पार्थमहींचकृत्स्नां वैश्योलाभंप्राप्नुयान्नैपुणंचशूद्रोगतिंप्रेत्यतथासुखंच ८० स्तवराजमिमंकृत्वारुद्रायद
धीमनः सर्वदोषापहंपुण्यंपवित्रंचयशस्विनः ८१ यावंत्यस्यशरीरेतुरोमकूपाणिभारत तावंत्यब्दसहस्राणिस्वर्गेवसतिमानवः

लोचयंतिईश्वरांस्तत्वंविरजंवानत्सर्वंनतस्यवीर्यः स्थूलतरमेव ज्ञातः कार ८२ इत्यनुशासनपर्वणिदानधर्मेमेघवाहनपर्वसमाप्तं १८ ॥ ॥
णातत्प्रात्प्राणाहेतोः जीवनार्थंमोक्षार्थंकिंचिद्दाउपनसंयोरगोचरंतत्वंनतोस्मिशरणीभूयप्रासोस्मि सएवईश्वरोभूत्वावरानददातभूमिरिववीजाधीन्मनांगत्वाजंभ्नांत्तपं
पतितद्धत ७८ इमंभीष्मवाक्यादारभ्यएतावत्पर्यंतं ८२ नामरूपैर्मूर्त्तिभेदः करवमिवलिपिभिद्वैत्तमोक्षंकथंविद्बीजंचामूर्त्तेभेदोध्वनिमिवकरवमिवांजकाम्यत्वजन्माकोभि
व्यांद्बीजवीजंखमिवलिपिभिर्दामूर्त्तिभेदेनमंदरत्तेनाद्वैतंचत्वंयच्छिवमुपनिषद्विज्ञानमात्मानमीहे १ इतिभारतभावदीपेनैलकंठीयेदानधर्मेषुमेघवाहनपर्वार्थप्रकाशः

३० तमेवशरणंव्रजेत्यर्थंतमेववाध्यंपरंब्रह्मइतिनिश्चितंविद्वत्तवान्हरिः १ सहधर्मं अथैतदुपलक्ष्यपे विविधधर्मजातंवदन्विकुत्सयतियोषितः परविरक्ततावाप्रेये १ ज्ञेयंवस्तुस्त्रक्त्वातज्ज्ञानसा
७७ धर्मशुश्रूषुः सहोभौचरतांधर्मज्ञौमिवसानौजायायतात्वग्निमादधीयातामितिधर्मपत्नीसाहित्यंशास्त्रेदृश्यमानमाक्षिपतियदिदमितिपाणिग्रहणात्स्त्राकसाहित्याभावात्सहोभाविति
वाक्यंव्याकुप्यतेतिभावः १ धर्मविशेषस्वसाहित्यमपेक्ष्यतेनसर्वत्रेतिआशंक्यधर्मंविकल्पयतिआर्षइति ऋषिभिर्मंत्रैः प्रकाशितःश्रौतस्मार्त्तक्रियारूपआर्षः केवलंवेदवि
हितत्वाद्वाप्राजापत्यप्रजापतिनासंतानकर्मणार्पितः नापुत्रस्यलोकोस्तीतिश्रुतत्वात्सकरणेनिष्टदर्शनाद्वाआसुरः अपरामंतेतेऽसुरास्तेषामासुरः केवलंइंद्रियप्रीतिद

भारत १

युधिष्ठिरउवाच यदिदंसहधर्म्मेतिप्रोच्यतेभरतर्षभ पाणिग्रहणकालेतुस्त्रीणामेतत्कथंस्मृतं १ आर्षएषभवेद्धर्मः प्राजापत्योथवासुरः यदे
तत्सहधर्मेतिपूर्वमुक्तंमहर्षिभिः २ संदेहः सुमहानेषविरुद्धइतिमेमतिः इहयः सहधर्मोवैप्रेत्यायंविहितः क्वनु ३ स्वर्गेमृतानांभ
वतिसहधर्म्मः पितामह पूर्वमेकस्तुम्रियतेक्वचैकस्तिष्ठतेवद ४ नानाधर्मफलोपेतानानाकर्म्मनिवासिनः नानानिरयनिष्ठान्ता
मानुषाबहवोयदा ५ अनृतास्त्रियइत्येवंसूत्रकारोव्यवस्यति यदानृताःस्त्रियस्तातसहधर्म्मःकुतःस्मृतः ६ ६ ६ ६ ॥

र्शनाद्वासाहित्यमुक्तमित्यर्थः २ आद्यामाह्निकसंदेहमाहार्द्धेन संदेहइति अत्रदेहएवस्पष्टयतिइहेति इहैवसाहित्यंदंपत्योर्दृश्यतेपरलोकेतयोः साहित्यंक्व तनक्वापीत्यर्थः
३ एतदेवोपपादयतिपूर्वमितिसार्द्धेन सत्यपिकर्मणिसाहित्येदंपत्योः स्वस्ववासनाभेदकृतोधर्मभेदोदुर्वारइत्यार्षप्रमाणंनियंत्रितावाभित्यर्थः ५ प्रज्ञार्थेसाहित्ये
पितौहितियंपक्षहृषयति अनृताः स्त्रियइति सूत्रकारोधर्मप्रवक्तानृतंसाहसंमायामूर्खत्वमतिलोभमनेतिस्त्रीधर्मानाह एवंप्रजार्थंसाहित्यमप्यनुपपन्नंकुंडगोलकादीनामपु
पत्तिदर्शनात ६ ॥ ॥ ॥ ॥ ॥ ॥ ॥ रा०८०
७७

पूर्व्विकापूर्ववतीगौणीधर्मसंज्ञांह्यपत्यविशेषोयथाभिक्षुकाणामयंधर्मोमूलिःपरगृहाणीतिवद्धर्मेपिधर्मपदःप्रयोगइत्यर्थः तत्रतत्र्याणिग्रहणादैवेदविहितत्वमपिशेषेनादित्यत्वे
च्छामनुसृत्यैवनतत्वतस्तस्यधर्मत्वमित्याहउपचारक्रियाविधिरिति ७ गह्वरंगहनंदुर्बोधमित्यर्थः कामुकयोः रागतः पाणिमिथुनीभावइतिनतत्रविधिरिस्यास्तथापिकामुकेना
हअत्रेत्यादिनाअयंभावः यथादर्शपूर्णमासापूर्वप्रयुक्तमपांप्रणयनंआश्रित्यगोदोहनेनपशुकामस्यप्रणयेत्यादिविधिविषयः प्रवर्त्तते एवरागप्राप्तंदारसंग्रहमाश्रित्यधर्मप्रजावि

च्यन्ताः स्त्रियस्येवंवैषपिहिपमते धर्म्मोयंपूर्व्विकासंज्ञाउपचारः क्रियाविधिः ७ गह्वरंप्रतिभात्येतन्ममचिंतयतोनिशंनिः संदेहमिमंसर्व्वंपितामह
हयथाश्रुति ८ यदेतद्यादृशंचैतद्यथाचैतत्प्रवर्तितं निखिलेनमहाप्राज्ञभवानेतद्ब्रवीतुमे ९ भीष्मउ० अत्राप्युदाहरंतीममितिहासंपुरा
तनं अष्टावक्रस्यसंवादंदिशयासहभारत १० निवेष्टुकामस्तुपुराअष्टावक्रोमहातपाः १० ऋषेरथवदान्यस्यवव्रेकन्यांमहात्मनः सुप्रभा
न्नामवैनाम्नारूपेणाप्रतिमांभुवि गुणप्रभावशीलेनचारित्रेणचशोभनां ११ सातस्यदृष्ट्वैवमनोजहारशुभलोचना वनराजीयथाचित्रा
वसंतेकुसुमाचिता १२ ऋषिस्तमाहदेयामेसुतातुभ्यंहितच्छृणु गच्छतावद्दिशंपुण्यामुत्तरांद्रक्ष्यसेततः १३ अष्टावक्रउवाच किंद्रष्टव्यं
मयातत्रवक्तुमर्हतिमेभवान् तथेदानींमयाकार्यंयथावक्ष्यतिमांभवान् १३ ॥ ॥ ॥ ॥ ॥ ॥

षयः प्रवर्त्तते नीरागस्यतनदारसंग्रहोविधीयतेनेनरांततइत्याः कालीनाधर्मप्रजादिविधयइति दिशयादिगभिमानिदेवतः ९ निवेष्टुकामःदारसंग्रहार्थी ११ मनोजहारेत्यनेन
भर्तुः कामुकत्वंपरस्त्रियाकामुकत्वंविवरीतंकथामाह ऋषिरित्यादिना १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

रा०
७८

१२५ तालैः कांस्यमयैर्वाद्यभेदैः शंपातालैः विच्छुरितैश्चपलैर्भ्रमणादिघटितैः नृत्यक्रियामानविशेषैः समैर्भ्रमणादिरहितैस्तैरेव १८ महापार्श्वपर्वत २५ उत्तराग्रेष्टा ३० प्रधा

वराम०३० धनदंसमतिक्रम्यहिमवंतंचपर्वतं रुद्रस्यायतनंदृष्ट्वासिद्धचारणसेवितं १४ संहृष्टैः पार्षदैर्जुष्टंनृत्यद्भिर्विविधाननैः दिव्यांगणैः
पैशाचैर्मन्नाविधैः प्रभो १५ पाणितालसतालैश्चशम्यातालैः समैस्तथा संप्रहृष्टैः प्रहसद्भिः शर्वस्तत्रनिषेव्यते १६ इष्टंकिलगिरेःस्थानं
तद्दिव्यमितिमेमतिः नित्यंसन्निहितोदेवस्तथापार्षदाः स्मृताः १७ तत्रदेव्यातपस्तप्तंशंकरार्थंसुदुश्चरं अतस्तदिष्टंदेवस्यतथोमायाइति
श्रुति १८ पूर्वंतत्रमहापार्श्वेदेवस्योत्तरतस्तथा ऋतवः कालरात्रिश्चयेदिव्यायेचमानुषाः १९ देवंचोपासतेसर्वेरूपिणः किलतत्रह तद
तिक्रम्यभवनंत्वयातव्यमव्ययेवहि २० ततोनीलंवनोद्देशंद्रक्ष्यसेमेघसन्निभं रमणीयंमनोग्राहितत्रद्रक्ष्यसिस्त्रियं २१ तपस्विनींमहाभागां
वृद्धांदीक्षामनुष्ठितां द्रष्टव्यासात्वयातत्रसंपूज्याचैवयत्नतः २२ तांदृष्ट्वाविनिवृत्तस्त्वंततःपाणिंग्रहीष्यसि यद्येषसमयः सर्वः साध्यतांतत्रग
म्यतां २३ अष्टवक्र उ० तथास्तुसाधयिष्यामितत्रयास्याम्यसंशयं यत्रत्वंवदसेसाधोभवानभवतुसत्यवाक् २४ भीष्म उ० ततोगच्छत्सभगवा
नुत्तरामुत्तरांदिशं हिमवंतंगिरिश्रेष्ठंसिद्धचारणसेवितं २५ सगत्वाद्विजशार्दूलोहिमवंतंमहागिरिं अभ्यगच्छन्नदींपुण्यांबाहुदांधर्मशालिनीं २६
अशोकेविमलेतीर्थेस्नात्वातर्प्यचदेवताः तत्रवासायशयनेकौश्येसुखमुवासह २७ ततोरात्र्यांव्यतीतायांप्रातरुत्थायसद्विजः स्नात्वाप्रादुश्च २८
ततः प्रधानैर्वरमंत्रैः २९ ३२ ॥ काराग्निंहुत्वावैवेनप्रधानतः ३१ रुद्राणीरुद्रमासाद्यह्रदेतत्रसमाश्वसत विश्रांतश्चसमुत्थायकैलासमभितोय यौ

राम०

५२ भवच्छंदंसभवद्विष्ठे ३९ पन्नाससमः पदार्थोमितयोवाक्यार्थोमितपश्चाद्यत्रवर्त्तततत्पञ्चत्वेनतस्त्रियाः असमासः पञ्चन्नामसमः मध्यमपदलोपीसमासः हार्यः ह ५०

सोपश्यत्कोवनंहारेद्दीप्यमानमिवश्रिया मंदाकिनीवनलिनीश्वनदस्यमहात्मनः ३३ अथतेराक्षसाः सर्वेपेमिरक्षंतिपद्मिनी यत्तास्थिताभ
गवंतमणिभद्रपुरोगमाः ३४ सतानपश्यदृष्येयामास्याक्रमानभीमविक्रमान निवेदयतमांक्षिप्रंधनदायेतिचाब्रवीत ३५ तेराक्षसास्तथारान
नभगवंतमथाब्रुवन असौवैश्रवणोराजास्वयंमायातितेंतिकं ३६ विदितोभगवानस्यकार्यमागमनस्यपत पश्यैनंत्वंमहाभागंज्वलंतमिव
तेजसा ३७ ततोवैश्रवणोभेत्यअष्टावक्रमनिंदितं विधिवत्कुशलंपृष्ट्वाततोब्रह्मर्षिमब्रवीत ३८ सुखंप्राप्तोभवानकच्चित्किंवामत्तश्चि
कीर्षसि ब्रूहिसर्वंकरिष्यामियन्मांवक्ष्यसिवैद्विज ३९ भवनंप्रविशत्वंमेयथाकामंद्विजोत्तम सत्कृतः कृतकार्यश्चभवानयास्यत्यविघ्नतः
४० प्राविशद्भवनंस्वंवैगृहीत्वातंद्विजोत्तमं आसनंस्वंददौचैवपाद्यमर्घ्यंतथैवच ४१ अथोपविष्टयोस्तत्रमणिभद्रपुरोगमाः निषेदुस्तत्र
कौबेराःयक्षगंधर्वकिन्नराः ४२ ततस्तेषांनिषण्णानांधनदोवाक्यमब्रवीत भवच्छंदंसमाज्ञायनृत्यंत्वप्सरोगणाः ४३ आतिथ्यंपरमं
कार्यंशुश्रूषाभवतस्तथा संवर्त्ततामित्युवाचमुनिर्मधुरयागिरा ४४ अथोर्वरामिश्रकेशीरंभाचैवोर्वशीतथा अलंबुषाघृताचीचचित्रा
चित्रांगदारुचिः ४५ मनोहरासुकेशीचसुमुखीहासिनीप्रभा विद्युतापृशमीदांताविद्योतारतिरेवच ४६ एताश्चान्याश्चवैवह्वाःप्रनृ
त्ताप्सरसःशुभाः अवादयंश्चगंधर्वावाद्यानिविविधानिच ४७ अथप्रवृत्तेगांधर्वेदिव्येऽपऋषिस्तन्नपाविशत दिव्यंसंवत्सरंतत्ररमघ्नते
षमहात्मना ४८ ततोवैश्रवणोराजाभगवंतमुवाचह साग्रः संवत्सरोजातोविप्रेहत्वपश्यतः ४९ हार्योयंविषयोब्रह्मन्गांधर्वोनाम
नामतः छंदतोवर्त्ततोविप्रयथावदतिभवान अतिथिः पूजनीयस्त्वमिदंचभवतोगृहं सर्वमाज्ञाप्यतामाशुपरवंतोवयंत्वयि ५१ अ

थवैश्रवणोप्रीतोभगवानभ्यभाषत:

दे० ७२९

५३ भगवानप्यष्टावक्रस्तान्निंचानिरोधंच भूतानामागतिंगतिं वेत्ति विद्यामविद्यां चसर्वाद्यो भगवानिति दिव्यैर्भोगैरत्नितोपि रावर्णितोपि वदान्यकन्यालाभार्थी हिगतं प्रतिगतस्थित

स्त्वित्तोस्मि यथा मायं गमिष्यामि धनेश्वर ५२ प्रीतोस्मि सदृशं चैव तव सर्वं धनाधिप तव प्रसादाद्भगवन्महर्षेश्च महात्मनः ५३ नियोगाद्द्य प्र

यास्यामि ऋद्धिमान्वृद्धिमान्भव अथ निष्क्रम्य भगवान्प्रययावुत्तरामुखः ५४ कैलासं मंदरं हैमं सर्वाननुचचार ह तानतीत्य महाशैलान्कै

रातं स्थानमुत्तमं ५५ प्रदक्षिणं ततश्चक्रे प्रयतः शिरसा ततः धरणीमवतीर्याथ पूतात्मासौ तदाभवत् ५६ स तं प्रदक्षिणं कृत्वा त्रिः शैलं

चोत्तरामुखः समेन भूमिभागेन ययौ प्रीतिपुरस्कृतः ५७ ततोपरं वनोद्देशं रमणीयमपश्यत सर्वर्तुभिर्मूलफलैः पक्षिभिश्च समन्वितैः ५८

रमणीयैर्वनोद्देशैस्तत्र तत्र विभूषितं तत्राश्रमपदं दिव्यं ददर्श भगवानथ ५९ शैलांश्च विविधाकारान्कांचनान्रत्नभूषितान् मणिभूमौ

निविष्टाश्च पुष्करिण्यस्तथैव च ६० अन्यान्यपि सुरम्याणि पश्यतः सुबहून्यथ भृशं तस्य मनो रेमे महर्षेर्भावितात्मनः ६१ स तत्र कांचनं

दिव्यं सर्वरत्नमयं गृहं ददर्शाद्भुतसंकाशं धनदस्य गृहाद्वरं ६२ महांतो यत्र विविधा मणिकांचनपर्वताः विमानानि च रम्याणि रत्नानि वि

विधानि च ६३ मंदाकिनी च ... संकीर्णा नद्या मंदाकिनी नदी स्वयंप्रभाश्च मणयो वज्रैर्भूमिश्च भूषिता ६४ नानाविधैश्च भवनैर्विचित्रम

णितोरणैः मुक्ताजालविनिक्षिप्तैर्मणिरत्नविभूषितैः ६५ मनोदृष्टिहरैरम्यैः सर्वतः संवृतं शुभैः ऋषिभिश्चावृतं तत्र त्वाश्रमं तं मनोहरं

ततस्तस्याभवच्चिंता कुत्र वासो भवेदिति ६६ अथ द्वारं समभितो गत्वा स्थित्वा ततोब्रवीत् अतिथिं समनुप्राप्तं समभिजानंतु ये त्र वै ६७

अथ कन्याः परिवृता गृहात्तस्माद्विनिर्गताः नानारूपाः सप्त विभो कन्याः सर्वमनोहराः ६८ यां यामपश्यत्कन्यां वै सा सा तस्य मनोहरत् न च

अहो कष्टं कामपिशाचो दुर्जेय इति भावः ५४ वृद्धिरुपचयस्तद्वान्ऋद्धिः संपत्तद्वान् ५६ कैरातं किरातवेषधारिणो महादेवस्य ५७ धरणीमवतीर्य पर्वतेनाकाशमार्गेणाशक्य

रा० ७१०

३९

७ सेवजरायुक्ता ७४ प्रज्ञानाच्चमतंज्ञानवतीप्रशांततानिर्जितचित्ता ७७ अथैनिच्छतिहृष्ट्वायाअपिविविधइयंगतिः किमुवक्त्रअपवन्माच्चैर्यमिति ७८ उपागृहतयाालिंमि

ततोधृतिः समुत्पन्नातस्यविप्रस्यधीमतः अथतंप्रमदाः प्राहुर्भगवान्प्रविशत्विति ७० सचतांसांसुरूपाणांतसेवभवनस्याहि कौतूहलसमा
विष्टः प्रविवेशगृहंद्विजः ७१ तत्रापश्यज्जरयायुक्तामरजोवरधारिणीं। दृष्ट्वापर्यंकमासीनांसर्वाभरणभूषितां ७२ स्वस्तीतितेनतचैवोक्तासात्त्वीप्रत
वदन्तदा प्रत्युत्थायचतंविप्रमास्यतामित्युवाचह ७३ अष्टावक्रउवाच सर्वाःस्वानालयान्यांतुएकामामुपतिष्ठतु प्रज्ञातायाप्रशांतायाशेषाग
च्छंतुकंश्तः ७४ ततः प्रदक्षिणीकृत्यकन्यास्तास्तमृषिंतदा निश्चक्रमुर्गृहात्तस्मात्वृद्धाथवतिष्ठत ७५ अथतांमविशनप्राहशयनेभास्वरेतदा
त्वयापिस्वप्यतांभद्रेरजनीव्यतिवर्तते ७६ संलापात्तेनविप्रेणतथासातत्रभाषिता द्वितीयेशयनेदिव्येसंविवेशमहाप्रभे ७७ अथसावेपमा
नांगीनिमित्तंशीतजंतदा व्यपदिश्यमहर्षेर्वैशयनंत्ववरोहत ७८ स्वागतेनागतांतांतुभगवानभ्यभाषत सोपगूहतभुजाभ्यांतमृषिंप्रीत्यान
रर्षभ ७९ निर्विकारमृषिंचापिकाष्ठकुड्योपमंतदा दुःखिताप्रेक्ष्यसंजल्पमकार्षीदृषिणासह ८० ब्रह्मन्नकामतोन्यास्तिस्त्रीणांपुरुष
तोधृतिः कामेनमोहिताचाहंत्वांभजंतींभजस्वमां ८१ प्रहृष्टोभवविप्रर्षेसमागच्छमयासह उपगूहस्वमांविप्रकामार्ताहंभृशंत्वयि ८२ एत
द्धितवधर्मात्मंस्तपसः प्राप्यतेफलं प्रार्थितंदर्शनादेवभजमानांभजस्वमां ८३ गृहंवेदंधनंसर्वंयच्चान्यदपिपश्यसि प्रभुस्त्वंभवसर्वत्रमयिचैवनसं
शयः ८४ सर्वान्कामान्विधास्यामिरमस्वसहितोमया रमणीयेवनेविप्रसर्वकामफलप्रदे ८५ त्वद्वशाहंभविष्यामिरंस्यसेचमयासह सर्वान्का
मितवती ८० अकालोनिद्धातः स्वभावस्सयर्थः पुत्तयःप्रत्वं मानुपाश्नानोयेदिव्यायेचमानुषाः नातःपरंहिनारीणांविद्यतेचकदाचन यथाप्रियप्रसमर्गःपरमेत
प्राप्यस्त्रीणांधृतिर्वैयन्नमायाकीयान्ति उंयोगोस्त्रीणांत्वकोयामर्वथानास्तिस्यर्थः ८१ उपगूहस्वालिंगस्वप्रत्त्वदृशः कामकोमव ८७ ॥ ॥ ॥ ॥

दा०
८०

९९ अनभिज्ञोऽ धीतिमान ९१ एका रतिशीलेतिशेषः ९३ लीलायंतः लीलांरतिआत्मनश्छंदेतः अभाषतनैतादृत्पादिमाह्वश्लोकं ९४ एकाग्रः स्त्रीदोषानअवमद्धानः
स्त्रियंप्रतिआसतांतास्त्रीस्थीयतांसवितः सं चिप्राप्यच्छंदः इच्छाभवतीतिति अभाषतात्वंहविज्ञामामिच्छसिअहंत्वतवि ज्ञोनत्वांस्प्रष्टुमिच्छामीतिभावः एवमपियत्कार्यंकर्तव्यं

आत्मच्छंदेनवर्त्तंतेनार्योमन्मथचोदिताः नचदह्यंतिगच्छंत्यः सततंसेऽपिपांसुभिः ८८ अष्टावक्र उ० परदारानहंभद्रेनगच्छेयंकथंचन दूषितं
धर्मशास्त्रज्ञैः परदाराभिमर्शनं ८९ भद्रेनिवेष्टुकामंमांविद्धिसत्येनवैशपे विषयेष्वनभिज्ञोहंधर्मार्थंकिलसंततिः ९० एवंलोकान्गमि
ष्यामिपुत्रैरितिनसंशयः भद्रेधर्मंविजानीहिज्ञात्वाचोपरमस्वह ९१ स्त्र्युवाच नानिलोग्निर्नवरुणोनचान्येत्रिदशाद्विज प्रियाः स्त्रीणांय
थाकामोरतिशीलाहियोषितः ९२ सहस्रैकिलनारीणांप्राप्यैकाकदाचन तथाशतसहस्रेषुयदिकाचित्पतिव्रता ९३ नैताजानंतिपि
तरंनकुलंनचमातरं नभ्रातृन्नचभर्त्तारंनचपुत्रान्नदेवरान ९४ लीलायंत्यः कुलंघ्नंतिकूलानीवसरिद्वराः दोषात्सर्वांश्चमत्वाप्रजाप
तिरभाषत भीष्मउ० ततःसऋषिरेकाग्रस्तांस्त्रियंप्रत्यभाषत आस्यतांरुचितंछंदः किंचकार्यंब्रवीहिमे ९६ सास्त्रीप्रोवाचभगवन्द्र
क्ष्यसेदेशकालतः वसतावन्महाभागकृतकृत्योभविष्यसि ९७ ब्रह्मर्षिस्तामथोवाचसतथेतियुधिष्ठिर वत्स्येहंयावदुत्साहोभवत्योनात्र
संशयः ९८ अथर्षिरभिसंप्रेक्ष्यस्त्रियंतांजरयार्दितां चिंतांपरमिकांभेजेसंतप्तइवचाभवत ९९ यद्यदंगंहिसोपश्यत्तस्याविप्रर्षभस्तदा ना
रमत्तत्रतत्रास्यदृष्टीरूपविरागिता १०० देवतेयंगृहस्यास्यशापात्किंनुविरूपिता अस्याश्चकारणंवेत्तुंनयुक्तंसहसामया १ इतिचिंताविवि
क्तास्यतमर्थंज्ञातुमिच्छतः व्यगच्छत्तदहःशेषंमनसाव्याकुलेनतु २ अथसास्त्रीतदोवाचभगवन्पश्यवैरवेः रूपंसंध्याभ्रसंरक्तंकिमुपस्थाप्य
तवतन्मेब्रवीहि ९५ इहास्वेसमशंसस्वेन्नास्यसे ९७ रूपेविरागीतीदृष्टिनो तांतव ३ सउवाचततस्तांस्त्रींस्नानोदकमिहानय उपासिष्येततः संध्यावाग्यतोनिपते
स्मितानामे १०४ अध्यायः १९ ॥

[illegible] २ ॥ छ ॥

अथसास्त्रीत्यादेरध्यायस्यतात्पर्यंकुत्सितायाअपिस्त्रियाःकरस्पर्शमात्रेणाविरक्तोपिविज्ञानमप्यशक्तोतीतंकालंनबुबुधेकाकथायुवत्यातिसक्ताःमूढाःगजंआशुवमोत्स्य
इति १ अभ्यमृक्षत अभ्यंजितवती २ उत्सादितः चालितः ३ ५ नाजानात न ज्ञातवान ८ न प्रभूतं चकार पूर्णामिति ताम्प्यवहदित्यर्थः स्पर्शासक्तो गतां रात्रिमिव सा

भीष्म उवाच अथ स्त्री तमुवाचेदं बाढमेवं भवत्विति तैलं दिव्यमुपादाय स्नानशाटीमुपानयत १ अनुज्ञाता च मुनिना सा स्त्री तेन महात्मना
अथास्य तैलेनांगानि सर्वाण्येवाभ्यमृक्षयत २ शनैश्चोत्सादितस्तत्र स्नानशालामुपागमत भद्रासनं ततश्चित्रं ऋषिरन्वगमन्नवं ३ अथो
पविष्टश्च यदा तस्मिन भद्रासने तदा स्नापयामास शनकैस्तमृषिं सुखहस्तवत ४ दिव्यं च विधिवच्चक्रे सोपचारं मुनेस्तदा स तेन सुसुखोष्णेन त
स्या हस्तसुखेन च ५ व्यतीतां रजनीं कृत्स्नां नाजानात्स महाव्रतः तत उत्थाय स मुनिस्तदा परमविस्मितः ६ पूर्वस्यां दिशि सूर्यं च सोपश्यदुदितं
दिवि तस्य बुद्धिरियं किं तु मोहस्तत्त्वमिदं भवत ७ अथोपास्य सहस्रांशुं किं करोमीत्युवाच तां सा चामृतरसप्रख्यं ऋषेरन्नमुपाहरत ८ तस्य
स्वादुतयान्नस्य न प्रभूतं चकार सः व्यगमच्चाप्यहःशेषं ततः संध्यागमत्पुनः ९ अथ सा स्त्री भगवंतं सुप्यतामित्युवाच ह तत्र वै शयने दिव्ये
तस्य तस्याश्च कल्पिते १० पृथक्चैव तया तत्र सो मा स्त्री स च मुनिस्तदा तथार्द्धरात्रे सा स्त्री तु शयनं तदुपागमत अष्टावक्र उ० न भद्रे परदारेषु म
नो मे संप्रसज्जति उत्तिष्ठ भद्रे भद्रं ते स्वपं वै विरमस्व च भीष्म उ० सा तदा तेन विप्रेण तथा तेन विवर्तिता स्वतंत्रास्मीत्युवाच ऋषिं न धर्मच्छलमस्ति ते १२

सक्तो गतं दिनमपि नाबुध्यतेति भावः ११ मेतिः स्वांतं आत्ममनन तथेपारदार्यदोषोस्तीत्यर्थः धर्मलंपरुद्धयप्रलोभनं १२ ॥ ॥ ॥ ॥

नास्तीतिग्रपवदन्नात्वांनकामयेइत्यर्थः १३ दोषाकामक्रोधादयः यथेच्छकस्वैरिणा १७ स्वतंत्रांग्रात्मप्रदानेइतिशेषः १ गोधर्मः पाणिग्रहणादिसंस्कारः मपिमन्निमित्तमलं २०
विजहमामानाशय ११ यथेति अहंआत्मदृष्ट्येतेनत्वांस्मात्तरांवेद्मित्वमपित्वदृष्टंतेनमांतथाभूतंविद्धीतिभावः तस्मंतवसंगमअहंनेतिभयत्रशेषः किंतुत्वमयाकन्यार्थिना

अष्टावक्रउ० नास्तिस्वतंत्रतास्त्रीणामस्वतंत्राहियोषितः प्रजापतिमतंत्वेतन्नस्त्रीस्वातंत्र्यमर्हति १३ स्त्र्युवाच बाधतेमैथुनंविप्रममभक्तिं
चपश्यवै अधर्म्मंप्राप्स्यसेविप्रयन्मांत्वंनाभिनंदसि १४ अष्टावक्रउ० हरंतिदोषजातानिनरंजातंयथेच्छकं प्रभवामिसदा धृत्याभद्रेस्व
शयनंव्रज १५ स्त्र्युवाच शिरसाप्रणमेविप्रप्रसादंकर्त्तुमर्हसि भूमौनिपतमानायाः शरणंभवमेनघ १६ यदिवादोषजातंत्वंपरदारेषु
पश्यसि आत्मानंस्पर्शयाम्यद्यपाणिगृह्णीष्वमेद्विज १७ नदोषोभविताचैवसत्येनैतद्ब्रवीम्यहं स्वतंत्रांमाविजानी[illegible]हियोऽधर्मःसो ५४
ऽस्तुवैमपि त्वय्यावेशितविज्ञावस्वतंत्रास्मिभजस्वमां १८ अष्टावक्रउ० स्वतंत्रात्वंकथंभद्रेब्रूहिकारणमत्रवै नास्तित्रिलोकेस्त्रीकाचिद्यावैस्वा
तंत्र्यमर्हति १९ पितारक्षतिकौमारेभर्त्तारक्षतियौवने पुत्राश्चस्थाविरेकालेनास्तिस्त्रीणांस्वतंत्रता २० स्त्रीउ० कौमारंब्रह्मचर्य्यंमे
कन्यैवास्मिनसंशयः पत्नींकुरुष्वमांविप्रश्रद्धांविजहिमाममम २१ अष्टावक्रउ० यथाममतथातुभ्यंयथातुभ्यंतथामम जिज्ञासेयमृषे
स्तस्याविघ्नःसत्यंनकिंभवेत २२ ॥

प्रार्थितस्तत्कर्त्तकाइयंतिज्ञासाममप्रोक्ता किमयंसाधुरसाधुर्वेतिउत किंनेतिकाकुः विघ्नएवायंकिंनभवेत्सत्यपितविघ्नएवेत्यर्थः २२ ॥ ॥ ॥ ॥ ॥

विघ्नत्वमेवाहआश्चर्यमिति एवं आत्मजीर्णत्वेन दृष्टा पुनः कन्येव दृश्यत इत्ययमाद्यरूपमाश्चर्यम २३ एतदेवाह किमिति अत्र अस्मिन्विषये किं उत्तरं श्रेष्ठतरं सर्वपरिग्रहो न स्यात्यागः उत्तर
तस्याः स्वीकारः कर्त्तव्य इति भावः २४ समत माह यथेति शक्तिः कामदमनसामर्थ्यं धृतिः सर्वथा मम त्यागः तदुभयं धत्वा न व्युत्थास्ये अस्याः स्वीकारं न करिष्ये उ

आश्चर्यं परमं ह्येतत्किं तु श्रेयो हि मे भवेत् दिव्याभरणवस्त्रा हि कन्येयं मामुपस्थिता २३ किं त्वस्याः परमं रूपं जीर्णमासीत्कथं पुनः कन्यारूप
मिहाद्यैवं किमिवात्रोत्तरं भवेत् २४ यथा परं शक्तिधृतेर्न व्युत्थास्ये कथंचन न रोचते हि व्युत्थानं सत्येनासादयाम्यहं २५ इति दानधर्मे अष्टाव
क्रदिक्संवादे युधिष्ठिर उवाच न विभेति कथं सा स्त्री शापाच्च परमद्युतेः कथं निवृत्तो भगवांस्तद्भवान्प्रब्रवीतु मे भीष्म उवाच अष्टावक्रोऽ
न्वपृच्छत्तां रूपं विकुरुषे कथं न चानृतं ते वक्तव्यं ब्रूहि ब्राह्मणकाम्यया २ स्त्र्युवाच द्यावापृथिव्योर्यत्रैषा काम्या ब्राह्मणसत्तम शृणु
ष्वावहितः सर्वं यदिदं सत्यविक्रम ३ जिज्ञासेयं प्रयुक्ता मे स्थिरीकर्त्तुं तवानघ अव्युत्थानेन ते लोका जिताः सत्यपराक्रम ४ उत्तरां मां दि
शं विद्धि दृष्टं स्त्रीचापलं च ते स्थविराणामपि स्त्रीणां बाधते मैथुनज्वरः ५ तुष्टः पितामहस्तेऽद्य तथा देवाः सवासवाः स त्वं येन च कार्येण संप्राप्तो
भगवानिह ६ प्रेषितस्तेन विप्रेण कन्यापित्रा द्विजर्षभ तवोपदेशं कर्त्तुं वै तच्च सर्वं कृतं मया ७ क्षेमी गमिष्यसि गृहं श्रमश्च न भविष्यति क
न्यां प्राप्स्यसि तां विप्र पुत्रिणी च भविष्यति ८ ॥ ॥ ॥

त्थानं धर्मातिक्रमं मम न रोचते किं तु सत्येनासादयामाहं हारानिति शेषः २५ अध्यायः न विभेति १ विकुरुषे अन्यथा अन्यथा करोषि ब्राह्मणकाम्यया ब्राह्मणमालिप्सया २
द्यावापृथिव्यो दिवि पृथिव्यां च यत्र स्थीयते तत्र एषा काम्या स्त्रीसंपाः अन्योन्याभिलाषरूपा इत्यर्थः इति मोहात् सम्निक्षामं परं नात्यतीत्यर्थः ३ मेमपातवत्ता ठ ॥ ॥

साकाम्या: नतिक्रमणीया १०ऋषिणावदान्येन १८ यथाकृषिकृतामेवराजदेयंभवत्येवंस्त्रीमततामेवदेवंपित्र्यंचऋणमायततित्ति स्त्रीमत्त्वंतकामकृतंवतवैधमितित्स्वभावे:पंच
कस्यापिऋणीनभवतीतिप्रश्नद्वयार्थः १९ दिगष्टावक्रसंवादार्थप्रकाशः एवंगार्हस्थ्यहेतंकाममुक्तास्वहस्याचितानदानधर्मोनवक्तुंश्रोतंपात्रादिगुणान्पृच्छति किमित्यादि

काम्यपाशश्चवांल्लमांततोवात्ततमुत्तमं अनतिक्रमणीयामाकृत्स्नैलोकैस्त्रिभिस्सदा १७ गच्छस्वसकृतंकृत्वाकिंचान्यच्छ्रोतुमिच्छसि याव
द्ब्रवीमिविप्रर्षेअष्टावक्रयथातथं १० ऋषिणाप्रसादिताचास्मितवहेतोर्द्विजर्षभ तस्यसंमाननार्थंमेत्वयिवाक्यंप्रभाषितं ११ भीष्म उ०
श्रुत्वातुवचनंतस्याः सविप्रःप्रांजलिःस्थितः अनुज्ञातस्तयावापिस्वगृहंपुनराव्रजत् १२ गृहमागत्यविश्रांतः स्वजनंपरिपृच्छ्यच अभ्यग
च्छत्ततंविप्रंन्यायतः कुरुनंदन १३ पृष्टश्चतेनविप्रेणदृष्टंत्वेतन्निदर्शनं प्राहविप्रंतदाविप्रः सुप्रीतेनांतरात्मना १४ भवतासमनुज्ञातः
प्रस्थितोगंधमादनं तस्यचोत्तरतोदेशेदृष्टंमेदैवतंमहत् १५ तयाचाहमनुज्ञातोभवांश्चापिप्रकीर्तितः श्रावितश्चापितद्वाक्यंगृहंचाभ्याग
तः प्रभो १६ तमुवाचततोविप्रः सुतांप्रतिगृहाणमेन क्षत्रविधियोगेनपात्रंहिपरमंभवान् १७ भीष्म उ० अष्टावक्रस्तथेत्युक्त्वाप्रतिगृह्य
चतांप्रभो कन्यांपरमधर्मात्माप्रीतिमांश्चाभवत्तदा १८ कन्यांतांप्रतिगृह्यैवभार्यांपरमशोभनां उवासमुदितस्तत्रस्वाश्रमेविगतज्वरः १९
इतिदानधर्मेअष्टावक्रसंवादः २० युधिष्ठिर उ० किमाहुर्भरतश्रेष्ठपात्रंविप्राः सनातनाः ब्राह्मणंलिंगिनंचैव ब्राह्मणंवाप्यलिंगिन
१ भीष्म उ० स्ववृत्तिमभिपन्नायलिंगिनेचेतरायच देयमाहुर्महाराजउभावेतौतपस्विनौ २ ॥ ॥ ॥ ॥ ॥

नाब्राह्मणंब्रह्मविदलिंगिनंपवित्रब्रह्मचारिणंसन्यासिनंचदंडादिलिंगवतं १ स्ववृत्तिं जीवनार्थीत्वा चिंतांवृत्तिंअभिपन्नायशरणीकुर्वतेलिंगीअलिंगीवास्वधर्मेणैवीयः सएवतपस्वीपा

सधर्मेनिष्ठत्वंपात्रगुणमुक्त्वाश्रद्धावत्त्वंदातृगुणमाह अश्रद्धयेति द्वाभ्यां अपूतोपिपरयाश्रद्धयापदिश्यन्नितिहितस्पदातापूतत्वप्रयुक्तः कोदोषः स्यान्नेवद ३ श्रद्धेतिश्रद्धेवास्यपूतत्वं
करोतीत्यर्थः ४ नेति अद्दैवपूतत्वकवीचेतकव्यपात्रंपरीक्षानविधेयामादित्याशयः ५ देवानांमसहोदेवाच्छ्रद्धादिमसइत्यर्थः हव्यंदैवंकर्मसिद्ध्यतिफलदंभवतिब्राह्मणग
णादितिभावः इज्यंतेदेवाइतिशेषः दैवंकर्मदेवानुग्रहादेवपूर्णंभवतिश्रद्धामात्रप्रियत्वादेवानामितिभावः ६ पित्र्यंतकर्मब्राह्मणानुग्रहादेवपूर्णंभवतीतितत्रान्यग्रहक
र्त्तैरितपोवत्वमावश्यकमित्याशयेनाह ब्राह्मणानितिलोकेषुपितृपितामहादिषुपूजनीयेषुब्राह्मणेषुब्राह्मणपमत्तीतिविग्रहादित्यर्थः अग्निमुखावैदेवाः पाणिमुखाः पितरइत्याम्न

युधिष्ठिरउवाच अश्रद्धयापरयाप्रीतोयः प्रयच्छेतद्विजातये हव्यंकव्यंतथादानंकोदोषः स्यात्पितामह ३ भीष्मउ० श्रद्धापूतोनरस्तातदुर्दांतो
पिनसंशयः पूतोभवतिसर्वत्रकिमुतत्वंमहाद्युते ४ युधिष्ठिरउ० नब्राह्मणंपरीक्षेतदैवेषुसततंनरः कव्यप्रदानेतुबुधाः परीक्ष्यंब्राह्मणंवि
दुः ५ भीष्मउ० नब्राह्मणः साधयतेहव्यंदैवात्प्रसिध्यति देवप्रसादादिज्यंतेयजमानैर्नसंशयः ६५ ब्राह्मणानभरतश्रेष्ठसततंब्रह्मवा
दिनः मार्कंडेयः पुराप्राहइतिलोकेषुबुद्धिमान् ७ युधिष्ठिरउवाच अपूर्वोप्यथवाविद्वान्संबंधीवायथाभवेत् तपस्वीयज्ञशीलोवाकथं
पात्रंभवेत्तुसः ८ भीष्मउवाच कुलीनः कर्म्मकृद्वैद्यः तथैवाप्यनृशंसवान ह्रीमानृजुः सत्यवादीपात्रंपूर्वेचयेत्रयः ९ तत्रेमंशृणुमे
पार्थवचनंतेजसांमतं पृथिव्याः काश्यपस्याग्नेर्मार्कंडेयस्यचैवहि १० ॥ ॥

लापनोदात्पूतश्रुतेः श्रोतः स्मार्त्तैः उदपोदाऽग्नेः स्वतः श्रद्धोदेवा
स्तर्पयति पाणिस्तुसत्कर्मवा नेवपितॄंस्तर्पयितुंशक्नोतिप्रत्यर्थः ८ नामश्चेतिकथ्येधावश्यकीपात्रपरीक्षेतिभावः ७ कथंकेनहेतुनापूर्वादीनांपंचानांपात्रत्वमितिप्रश्नार्थः
८ उत्तरंतुअपः अपूर्वसंबंधितपस्विनः कुलीनत्वादिगुणमत्पकप्युक्ताः एकपात्रपत्वमर्हतेन परिशेषात्पत्रकृशीलविहांसौकर्मकृद्वैद्यपदेहितौकुलीनत्वादिगुणपंचकयुक्तावेव
एतेषांगुणानामभावेपात्रत्वंनकस्यापीत्यर्थः ९ एतद्देवशिष्टंसंमत्याद्रढयति तत्रेति तेजसांतेजस्विनांमतंज्ञानामितियावत् १० ॥ ॥ ॥ ॥

दा० ८३

नेष्टुः पांसुपिंडः त्रिभिरेवदृत्तिः ज्ञोवनंयस्यांसावाह्मीसंपत्तस्यांत्रिवृत्त्यांयाजनध्यापनप्रतिग्रहैरेवजीवति समहान्एतेनकुलीनत्वं वैद्यत्वंचसंगृहीतं ११ ह्रीमत्त्वक्षांतिशीलपदेनसं
गृह्णाति। सर्वेचेति १२ ज्ञानस्यकर्मकृत्त्वंचसंगृह्णाति अधीयानइति सत्येयज्ञादिकंअभिर्वाणितफलंकर्मनचरतेनकरोति १३ अश्वमेधेतिसत्यसंग्रहः एतेषामगुणानामेक
स्याप्यभावेपात्रत्वंनभवतीतिवर्णाममपिमतंतेनचत्वा रिंशच्चतानि उपक्रमेतेजसामत मितेष्वकवचनादेतेचविसंवादी दर्शनादितिभावः १५ व्रतिनःब्रह्मचारिणः क
थंनत्स्वकृतमितितन्हीयविनाशान्त्वीयंब्राह्मणत्यतिनवेनिप्रश्नः १६ आदिष्टंहृादशवर्षाणिब्रह्मचर्यचरेत्तिणवोदय तद्वंत भोक्तुरेवव्रतंलुप्यते नतदातापस्यवेतिअपितक

पृथ्व्युवाच यथामहार्णवेक्षिप्तः क्षिप्रंलेष्टुर्विनश्यति तथाहुश्चरितंसर्वंत्रिवृत्यांचनिमज्जति ११ काश्यप० सर्वेचवेदाः सहषड्भिरंगैः
सांख्यंपुराणंचकुलेचजन्म नैतानिसर्वाणिगतिर्भवंतिशीलव्यपेतस्यनरद्विजस्य १२ अग्निरुवाच अधीयानः पंडितंमन्यमानोयोवि
द्ययाहंतियशःपरेषां भ्रश्यतेसोचरतेनसत्यंलोकास्तस्यांतवंतोभवंति १३ मार्कंडेयउवाच अश्वमेधसहस्रंचसत्यंचतुलयाधृतं ना
भिजानामियद्यस्यसत्यस्यार्द्धमवाप्नुयात १४ भीष्मउवाच इत्युक्त्वातेजग्मुरामुचत्वारोमिततेजसः पृथिवीकाश्यपोग्निश्चप्रकृष्टायुश्च
भार्गवः १५ [highlighted, illegible] युधिष्ठिरउवाच यदिदंब्राह्मणालोकेव्रतिनोभुंजतेहविः दत्तंब्राह्मणकामाय कथंतत्सुकृतंभवेत १६
भीष्मउवाच आदिष्टिनोयेराजेंद्रब्राह्मणावेदपारगाः भुंजतेब्रह्मकामायव्रतलुप्ताभवंतिते १७ ॥ ॥ ॥ ॥

मदं१

मैनिष्ठास्तपोनिष्ठः पंचाग्निब्रह्मचारिणः पितृमातृपराश्चैवब्राह्मणाः श्राद्धसंपदेइतिब्रतस्थमपि दौहित्रंश्राद्धेयत्नेनभोजयेदित्तिचस्मरणात्सगणएवगेवैतीतिभावः एतेनश्राद्धादन्य
त्रलोभादिप्रदर्शितेनपात्रतानाश्यतोदानेपिकिंचिद्दैगुण्यंजायतइतिगम्यते अतएवमनसायात्रमुद्दिश्यजलमध्येजलंक्षिपेत दातातत्फलमाप्नोतिप्रतिग्राहीनदोषमागितिपाद्मा
दाथेकल्पांतरंनस्मर्यतेतनायेवंयुधिष्ठिरणाशंकोनैतिक १७ ॥ ॥ ॥ ॥
ति१

दान० ८३

अतोनिश अनेकांतं अनेकफलाकारमित्यर्थः पात्रगुणानामानंत्यात्केगुणाः नियमेन पात्रतांयांति भिन्नानानेव संक्षेपेणाब्रूहीति प्रश्नार्थः १८ उत्तरमाह त्रिभिः अहिं
सेति २१ मेदादीनांमविष्टां भुंक्ते इति संबंधः मेदागोमहिष्यादीनांमन्तामसमश्नंतः पुल्कसाः येब्राह्मणादीनमपिस्वभावादेवहिंसंति अनेवमापिनस्वर्मकारादयः कृतघ्न

युधिष्ठिरउ० अनेकांतंबहुद्वारंधर्ममाहुर्मनीषिणः किंनिष्ठितंभवेदत्रतन्मेब्रूहिपितामह १८ भीष्मउ० अहिंसासत्यमक्रोधआनृशंस्यंदम
स्तथा आर्जवंचैवराजेंद्रनिश्चितंधर्मलक्षणं १९ येतुधर्मंप्रशंसंतश्चरंतिपृथिवीमिमां अनाचरंतस्तद्धर्मंसंकरेभिरताःप्रभो २०ते
भ्योहिरण्यंरत्नंवागामश्वंवाददातियः दशवर्षाणिविष्ठांसभुंक्तेनिरयमास्थितः २१ मेदानांपुल्कसानांचतथैवांतेवसायिनां कृतंकर्म
कृतंवापिरागमोहेनजल्पतां २२ वैश्वदेवंचयेमूढाविप्रायब्रह्मचारिणे ददतीहराजेंद्रतेलोकान्भुंजतेऽशुभान् युधिष्ठिरउ० किंपरंब्रह्मच
र्यंस्यात्किंपरंधर्मलक्षणं किंचश्रेष्ठतमंशौचंतन्मेब्रूहिपितामह २३ भीष्मउवाच ब्रह्मचर्यात्परंतातमधुमांसस्यवर्जनं मर्यादायांस्थितोधर्म
ःशमश्चैवास्यलक्षणं २४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तंवापरकीयंपापंकर्मयेप्रकाशयंतिब्राह्मणादयोपितेमेदादितुल्याएवेतितेषामपीतिपदार्थः २१ वैश्वदेवंतत्संबंधिनंहंतकारिंब्रह्मचारिणेइतिसंन्यासिनोप्युपलक्षणं पतिश्च
ब्रह्मचारीचपक्वान्नस्वामिनावुभावितिस्मृतेः अप्रमानितिच्छेदः २२ पांचेष्टं २३ यमः विषयेभ्यइंद्रियाणांनिवृत्तिरेतदेवश्रेष्ठतमंशौचंधर्मस्यचलक्षणंमर्यादान्तर्गतं २४ ॥

दा०
२५

२५ कल्पंपूर्वाह्णे ४ षड्भिः अनुपदेशैः मधुमांसवर्जनमर्यादापालनशौचैः सहाध्ययनयागदानेभ्यः तान्यवशातंप्रवृत्तस्त्वर्थः २७ नशोचतींतियादृत्तं २८ ॥

युधिष्ठिरउवाच कस्मिन्कालेचरेतधर्मंकस्मिन्कालेर्थमाचरेत कस्मिन्कालेसुखीचस्यात्तन्मेब्रूहिपितामह २५ भीष्मउवाचकल्पमर्थंनि
षेवेत ततोधर्ममनंतरं पश्चात्कामंनिषेवेतनचगच्छेत्प्रसंगितां २६ ब्राह्मणांश्चैवमन्येतगुरूंश्चाप्यभिपूजयेत सर्वभूतानुलोमश्चमृदुशीलः
प्रियंवदः २७ अधीकारेयदनृतंपचराजगपैशुनं गुरोश्चालीककरणंतत्समंतद्ब्रह्महत्यया २८ प्रहरेन्ननरेंद्रेषुनहन्याद्गांतथैवच भ्रूणहत्या
समंचैवउभयंयोनिषेवते २९ नाग्निंपरित्यजेज्जातुनचवेदान्परित्यजेत नचब्राह्मणमाक्रोशेत्तत्समंतद्ब्रह्महत्यया ३० युधिष्ठिरउवाच की
दृशाः साधवोविप्राःकेभ्योदत्तंमहाफलं कीदृशानांचभोक्तव्यंतन्मेब्रूहिपितामह ३१ भीष्मउवाच अक्रोधनाः धर्मपराः सत्यनित्याद
मेरताः तादृशाः साधवोविप्रास्तेभ्योदत्तंमहाफलं ३२ अमानिनः सर्वसहादृढार्थाविजितेंद्रियाः सर्वभूतहितामैत्रास्तेभ्योदत्तंमहाफलं
३३ अलुब्धाः शुचयोवैद्याह्रीमंतः सत्यवादिनः स्वकर्मनिरतायेचतेभ्योदत्तंमहाफलं ३४ सांगांश्चचतुरोवेदानधीतेयोद्विजर्षभः षड्भ्यः
प्रवृत्तः कर्मभ्यस्तंपात्रमृषयोविदुः ३५ येत्वेवंगुणजातीयास्तेभ्योदत्तंमहाफलं सहस्रगुणमाप्नोतिगुणार्हायप्रदायकः ३६ प्रज्ञाश्रुता
भ्यांवृत्तेनशीलेनचसमन्वितः तारयेतकुलंसर्वमेकोपीहद्विजर्षभः ३७ गामश्वंवित्तमन्नंवातद्विधेप्रतिपादयेत द्रव्याणिचान्यानितथाप्रेत्य
भावेनशोचति ३८ ॥ ॥ ॥ ॥ ॥ ॥

दा०
२५

द्विजोत्तमः निर्दोषः सतेपूर्वोक्तगुणाश्चन्तत्रयदि लभ्यंतर्हितारयेतेतिकिमु ३९ निशम्यज्ञात्वाईदृशपात्रप्रसोममतःयस्यस्याल्पगुणस्यातिक्रमेपिदोषोनास्तीतिभावः ४० त्वथ्या

पः २१ ग्रहेति कालाहीविहितंविशेषमितिशेषः १ उपपत्तिभिः आदरादिभिः युक्तः सन् ४ क्षुतंक्षुतेनदूषितंनिराकारणात्र्वनवज्ञातेनम्लेच्छेणवा ६ परिभुक्तंदेवान्ति

तारयेत्तकुलंसर्वमेकोपीहद्विजोत्तमः किंमंगपुनरेवैतेनस्मात्पात्रंसमाचरेत् ३९ निशम्यचगुणोपेतंब्राह्मणंसाधुसंमतं दूरादानाय्यसत्कृत्यसर्व

तस्मापिपूजयेत्शान्तोदानधर्म्मेवकुरुषार्थिके ४० युधिष्ठिरउवाच श्राद्धकालेचदेवेवचपित्र्येपिचपितामह इच्छामीहत्वयाख्यातंनिहितंयत्नरर्षिभि

: १ भीष्मउ० दैवंपूर्वाह्निकंकुर्यादपराह्नेतपैतृकं मंगलाचारसंपन्नः कृतशौचः प्रयत्नवान् २ मनुष्याणांतमध्याह्नेप्रदद्यादुपपत्तिभिः

कालहीनंतपद्दानंतंभागंरक्षसांविदुः ३ लंघितंचावलीढंचकलिपूर्वंचयत्कृतं रजस्वलाभिर्दृष्टंचतंभागंरक्षसांविदुः ४ अवघुष्टंचयद्भुक्तमव्रतेन

चभारत परामृष्टंशुनाचैवतंभागंरक्षसांविदुः ५ केशकीटावपतितंक्षुतंश्वभिरवेक्षितं रुदितंचावधूतंचतंभागंरक्षसांविदुः ६ निराका

रेणयद्भुक्तंमशस्त्रेणचभारत दुरात्मनाचयद्भुक्तंतंभागंरक्षसांविदुः ७ परोच्छिष्टंचयद्भुक्तंपरिभुक्तंचयद्भवेत् दैवेपित्र्येचसततंतंभागंरक्षसांवि

दुः ८ मंत्रहीनंक्रियाहीनंयच्छ्राद्धंपरिविश्यते त्रिभिर्वर्णैर्नरश्रेष्ठतंभागंरक्षसांविदुः ९ आज्याहुतिंविनाचैवयत्किंचित्परिविश्यते दुराचा

रैश्चयद्भुक्तंतंभागंरक्षसांविदुः येभागारक्षसांप्रासातेउक्ताभरतर्षभ अंतऊर्ध्वंविसर्गस्यपरीक्षांब्राह्मणोदशाम् ११ ॥ ॥ ॥

धिपितकालकार्हीनवर्त्तंपित्वाभुक्तोत्वेनैष ९ आज्याहुतिंपात्राभिघारणंविं १० विसर्गस्यब्राह्मणोदानस्यपात्रभजे ११ ॥ ॥ ॥ ॥ ॥ ॥

धिम्

हो०
८५

पतिताः महापातकेन ज्ञातिबहिर्भूताः केतनं निमंत्रणं १२ श्वित्री श्वेतकुष्ठी कुष्ठी मंडलकुष्ठी यक्ष्मनहतो महारोगी अपस्मारिग्रहयुतः १३ देवलकार्हेत्नार्चनवृत्तिर्जीवी वृथानिय
मधारिणो दंभवंतः १४ सवकाः क्रूरैनपराः कथकाः वृथालापिनः वोधकाः मल्लाः १५ वृषलानां शूद्राणां होतारो याजकाः वृषलशिष्याः शूद्रदासाः १६ अनयोक्ताभतका
ध्यापकः अवयुक्तः व्रतकाध्येता १७ वर्णानरयीग्रहः मुख्यापत्तिः १८ अनग्नयः श्रौतस्मार्तकर्मरहिताः योधाः मताः स्वकर्मभ्यस्तेनास्ते परीकीर्त्तिताः कर्म्मणा देहदोषैश्चपो

पांवंतः पतिताः विप्रानुडोन्मत्ताज्ञात्थैवच देवेवाप्यथपित्र्येवाराजन्नार्हतिकेतनं १२ श्वित्रीक्लीवश्चकुष्ठीचतथायक्ष्महतश्चयः अपस्मारीचयश्चा
न्धोराजन्नार्हतिकेतनं १३ चिकित्सकादेवलाकावृथानियमधारिणः सोमविक्रयिणश्चैवराजन्नार्हतिकेतनं १४ गायनानर्त्तकाश्चैवप्लव
कावादकास्तथा कथकायोधकाश्चैवराजन्नार्हतिकेतनं १५ होतारोवृषलानांचवृषलाध्यापकास्तथा तथावृषलशिष्याश्चराजन्नार्हति
केतनं १६ अवयोक्ताचयोविप्रोअनयुक्तश्चभारत नार्हतस्तावपिश्राद्धंब्रह्मविक्रयिणोहितो १७ अग्रणीयः कृतः पूर्वंवर्णावरपरिग्र
हः ब्राह्मणः सर्वविद्योपिराजन्नार्हतिकेतनं १८ अनग्नयश्चयेविप्रामृतनिर्यातकाश्चये स्तेयश्चपतिताश्चैवराजन्नार्हतिकेतनं १९
अपरिज्ञातपूर्वाश्चगणपूर्वाश्चभारत पुत्रिकापूर्वपुत्राश्चश्राद्धेनार्हतिकेतनं २० ॥ ॥ ॥ ॥ ॥ ॥

निजस्वैवकुत्सिताः पतितांस्तान्विजानीयान्महापातकिनश्चयेइतितेनपतितोयतितोगमोक्तोवाग्रासौ १९ गणपूर्वाः ग्रामणयः पुत्रिकापूर्वपुत्राः अस्या मृतस्यान्नपुत्रोमदीयइतिनियमेन
पारीयते तस्यां वयोजातः स पुत्रिकापूर्वपुत्रः स पितृगोत्राद्दूष्टोमातृगोत्रोयज्ञीवित्वान्निंद्यः णाकर्ताहृष्यर्थंधनप्रोक्तो कुसीदीनाम वार्धुषिकः समं द्वैधाममादाय महर्घ्यंयः प्रयच्छतिसवैवा
र्धुषिकोनाम हव्यकव्यवर्हितकृतः इतिस्मृतिप्रसिद्धः २० ॥ ॥ ॥ ॥ ॥ ॥

५२

राम०
८५

स्त्रीपूर्वैः स्त्रीजितः स्त्रीपरः पापपत्नीविनोवा काण्डस्पृष्टः वेश्यापतिः काण्डस्पृष्टः सद्भिरेव निगद्यत इति मेनव्याख्यातः अजपः संध्यावंदनहीनः २१ अन्नग्रहणं निषिद्धानामपि केनचिद्गुणेनाभ्यनुज्ञानं २३ वणिजं वणिग्वृत्तिं २६ उदितः आढ्यः अस्तमितः दरिद्रः पूर्वाह्णे लाभकाले आढ्यः मध्याह्ने व्यये दरिद्रः एवं प्रातर्लाभकाले स्तमितः

ऋणं कर्तुं च यो राजन्नभ्युपायाद्विषिको नरः प्राणिविक्रयवृत्तिश्च राजन्नार्हति केतनं २१ स्त्रीपूर्वः काण्डस्पृष्टश्च पापवांस्ततो भरतर्षभ अजपो ब्राह्मणश्चैव श्राद्धे नार्हति केतनं २२ श्राद्धे दैवे च पित्र्ये निर्दिष्टो ब्राह्मणो भरतर्षभ दातुः प्रतिग्रहीतुश्च स्यादगुणाननुग्रहे पुनः २३ चीर्णव्रता गुणैर्युक्ता भवेयुर्येऽपि कर्षकाः सावित्रीज्ञाः क्रियावंतस्ते राजन्केतनक्षमाः २४ क्षात्रधर्मिणमप्याजौ केतयेत्कुले द्विजं द्विजं त्वेव वणिजं तात श्राद्धे च परिकल्पयेत् २५ अग्निहोत्री च यो विप्रो ग्रामवासी च यो भवेत् अस्तेनश्चातिथिज्ञश्च स राजन्केतनक्षमः २६ सावित्रीं जपते यस्तु त्रिकालं भरतर्षभ भिक्षावृत्तिः क्रियावांश्च स राजन्केतनक्षमः २७ उदितास्तमितो यश्च तथैवास्तमितोदितः अहिंस्रश्चाल्पदोषश्च स राजन्केतनक्षमः २८ अकल्कको ह्यतर्कश्च ब्राह्मणो भरतर्षभ संसर्गभैक्षवृत्तिश्च स राजन्केतनक्षमः २९ अव्रती कितवः स्तेनः प्राणिविक्रय्यथो वणिक् पश्चाच्च पीतवान्सोमं स राजन्केतनक्षमः २९ अर्जयित्वा धनं पूर्वं दारुणैः कृषिकर्मभिः भवेत्सर्वातिथिः पश्चात्स राजन्केतनक्षमः ३०

मध्याह्ने लाभे सति उदितः २७ अल्पदोषो विहृत्यादिविशेषगुणाढ्यः इत्याद्यनेनावा २८ अकल्ककः अदांभिकः अथ दोषाः कल्कः पापे दंभे चेति कोशः अकल्मकार इति पाठे स्वेच्छया वर्मा धर्मे ल्मः अनर्कोऽहेतुकः शुष्कतर्कपरः संसर्गः संगत्यैः गृहे गृहे जाते भिक्षावृत्तिः २८ कितवो द्यूतकृत् २९ सर्वदेवता इत्येव च तिथि रे व यस्य स सर्वातिथिः ३०

शां० ब्रह्मवेदः स्त्रैणात्तद्धीनमार्गणेनमिथ्याशपथादिनावा ३१ अपवर्गोश्वद्धमासौ ह्रियमाणइतियावेदलक्षमानः पुष्कंशुक्लस्त्वेता दिवचनं गवानृतंअनृतगोशपथसपापं ३२
सोमक्रयोदर्शः आरण्यमृगादिमांसंचपदार्थमंततैदैवश्राद्धस्यकालः ३३ स्वधोच्यतामितिपदाचाउक्तेव्रतस्वधेतिब्राह्मणोवदेत एवमुत्तरत्र मुदिताशीतिकरापितृणामित
८६ यीति ३४ पुण्याहमिति पुण्याहंभवंतोब्रुवन्त्वितियजमानेनप्रोक्ते ओंपुण्याहमस्त्वितिब्राह्मणः ब्रूयुः दैवं [illegible] सौंकारं ३६ दैवेओंकारस्थानेप्रीयतांदेवताः पुण्याहमस्त्वितिव

ब्रह्मविक्रयनिर्दिष्टंस्त्रीयायच्चार्जितंधनं अदेयंपितृविप्रेभ्योयच्चक्लैब्यादुपार्जितं ३१ ह्रियमाणोपवर्गेचयोद्विजोभरतर्षभ नव्याहरतिय
युक्तंतस्याधर्मोगवानृते ३२ श्राद्धस्यब्राह्मणाःकालःपशुंदधिघृतंतथा सोमक्रयश्चमांसंचयदारण्यंयुधिष्ठिरः ३३ आह्वापवर्गेविप्रस्य
स्वधावैमुदिताभवेत क्षत्रियस्यापियोब्रूयात प्रीयतांपितरस्त्विति ३४ अपवर्गेतुवैश्यस्यश्राद्धकर्म्मणिभारत अक्षय्यमितिवक्तव्यंस्वस्ति
शूद्रस्यभारत ३५ पुण्याहवाचनंदैवंब्राह्मणस्यविधीयते एतदेवनिरोंकारंक्षत्रियस्यविधीयते ३६ वैश्येदैवेवक्तव्यंप्रीयंतांदेवताइति
कर्म्मणामानुपूर्व्वेणविधिपूर्व्वंकृतंशृणु ३७ जातकर्म्मादिकाःसर्व्वास्त्रिषुवर्णेषुभारत ब्रह्मक्षत्रेहिमंत्रोक्तावैश्यस्यचयुधिष्ठिरः ३८ वि
प्रस्यरशनामौंजीमौर्वीराजन्यगामिनी बाल्वजीत्येववैश्यस्यधर्मएषयुधिष्ठिर ३९ दातुःप्रतिग्रहीतुश्चधर्माधर्मौविमोक्षणे ब्राह्मणस्या
नृतेधर्म्मःप्रोक्तःपातकसंज्ञितः ४० ॥ स३

त्रिवेदादित्यर्थः कृतंक्रियांअनवधानकृतमितियावत ३७ वैश्यस्यचमंत्रैरुक्ताइत्यनुषंगः ३८ रसनामेखलामौंजीमुंजमयी मौर्वीधनुर्ज्याबाल्वजीबल्वजतृणविशेषस्तन्म
यी ३९ धर्माद्दातुः अधर्मःप्रतिग्रहीतुरितितयोर्मोक्षणेतत्राधर्ममेवसामान्यतआहब्राह्मणस्येतिएककार्यपरार्थेऽनृतवक्तुर्ब्राह्मणस्यपापावानधर्मोभवति ४० ॥ ॥ शां०
ह१ ८६

स एव चतुर्गुणः क्षत्रियस्याष्टगुणो वैश्यस्य तावन्मात्रार्थं भवतीत्यर्थः सार्द्धश्लोकः ४० वेत्ति यः पूर्वस्य निमंत्रयितुरग्न्यातिसंडापापान् तत्र ब्राह्मणो नकेतितः सन्यदि यवीया
न भवेत्तर्हि द्विपापं यस्मुहिंसायाः पूर्णपापं प्राप्नुयात् क्षत्रियादिना केतितः सन् यदि यवीयान्स्यात्तर्हि हृतपापस्मु हिंसाया अर्द्धपापं प्राप्नुयादिति श्लोकद्वयार्थः ४३ अशौचः जनन
मरणाशौचवान् ४४ अर्पेनमप्रेयाज्ञनेन तीर्थयात्रादिव्यपदेशेन डीविकाघर्षीयो धेनेलिसितं पावाकर्मार्थं भिक्षां देहीत्यामंत्र पतिदातारमभिमुखीकरोति तस्यापि स्मृतं गवा

चतुर्गुणः क्षत्रियस्य वैश्यस्याष्टगुणः स्मृतः नामत्र ब्राह्मणो श्रीमान्पूर्वं विप्रेण केतितः ४ यवीयान्यस्मुहिंसायां तुल्यधर्म्मी भवेत्स हि तथा राज
न्वैश्याभ्यां यद्यश्रीमान्नु केतितः ४१ यवीयान्यस्मुहिंसायां भागार्द्धसमवाप्नुयात् दैवं वाप्यथवा पित्र्यं योश्नीयाद्ब्राह्मणादिषु ४२ अस्नातो ब्राह्मणो रा
जंस्तस्याधर्म्मो गवानृतं अशौचो ब्राह्मणो राजन्यो श्नीयाद्ब्राह्मणादिषु ज्ञानपूर्वमथो लोभात्तस्याधर्म्मो गवानृतं ४४ अर्थेनान्येन यो भि
क्षेत कर्मार्थं चैव भारत आमंत्रयति राजेन्द्र तस्याधर्म्मोऽनृतं स्मृतं ४५ अवेदव्रतचारित्रास्त्रिभिर्वर्णैर्युधिष्ठिर मंत्रवत्परिविष्यंते तेन स्याध
र्म्मो गवानृतं ४६ युधिष्ठिर उवाच पित्र्यं वाप्यथवा दैवं दीयते यत्पितामह एतदिच्छाम्यहं श्रोतुं दत्तं केषु महाफलं ४७ भीष्म उ० ये
षां दाराः प्रतीक्षंते सुवृष्टिमिव कर्षकाः उच्छेषपरिशेषं हि तान्भोजय युधिष्ठिर ४८ चारित्रनिरता राजन्ये कृशाः कृशवृत्तयः अर्थि
नश्चोपगच्छंति तेषु दत्तं महाफलं ४९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नृतमेव स्मृतं ४५ वेदो व्रतं चारित्रं च येषां नास्ति ते यन्न मंत्रवत् मंत्रयुक्तं यथ्य स्यात्तथा श्राद्धे परिविश्यंते तत्र ४७ भोजनपात्रे ऽवसिष्टमुच्छेषः तेन हितं परिशेषं स्या
त्सम्यवशिष्टं प्रतीक्षंते ये पापाकपर्मान्यमेव धान्यादिकं मलिनकुस्थलादौ ता भोजयः ४९ ॥

दा० ८१ तत्र श्लोकाः चारित्रमेव भक्ष्योऽन्नं तद्वृत्तिर्जीवनं येषां ते तद्वृहाः तदेगृहे स्म आदौ येषां ते बलं इह लोके दोषाभिभवसामर्थ्यं अपाश्रयः परलोकगमनालंबनं अर्थप्रयोजनेन स
र्वेवार्थिनो भवंति न संग्रहार्थः ५१ रौक्ष्यात् दारिद्र्यात् कारकृतः आत्मेवात्माजीवनमन्नं हस्तो गृहीता अन्नस्य यस्य स वदतः क्षुधार्त्तो महो देहि महां देहीति पाचं तेते भ्यो तिदरि

तस्क्रान्तदृढ्हराडेस्तद्धलालसद्याश्रयाः अर्थिनस्त्वभवंतमर्येते षु दत्तं महाफलं ५० तस्करेभ्यः परेभ्यो वा ये भयार्त्ता युधिष्ठिर अ
र्थिनो भोक्तुमिच्छंति तेषु दत्तं महाफलं ५१ अकल्मकस्य विप्रस्य रौक्ष्यात्कारकृतात्मनः बटवो यस्य भिक्षंति तेभ्यो दत्तं महाफलं ५२
हृतस्वा हृतदाराश्च ये विप्रा देशसंप्लवे अर्थार्थमभिगच्छंति तेभ्यो दत्तं महाफलं ५३ व्रतिनो नियमस्थाश्च ये विप्राः श्रुतसम्मताः तत्समा
प्त्यर्थमिच्छंति तेभ्यो दत्तं महाफलं ५४ अव्युत्क्रांताश्च धर्मेषु पाखंडसमयेषु च कृशप्राणाः कृशधनास्तेभ्यो दत्तं महाफलं ५५
कृतसर्वस्वहरणा निर्दोषाः प्रभविष्णुभिः स्पृहयंति च भुक्तान्नं तेषु दत्तं महाफलं ५६ तपस्विनस्तपोनिष्ठास्तेषां भै
क्षचराश्च ये अर्थिनः किंचिदिच्छंति तेषु दत्तं महाफलं ५७ महाफलविधिर्दाने श्रुतस्ते भरतर्षभ निरयं येन गच्छंति स्वर्गं चै
व हि तच्छृणु ५८ गुर्वर्थं वाभयार्थं वा वर्जयित्वा युधिष्ठिर येनृतं कथयंति स्म ते वै निरयगामिनः ५९ ॥ ॥ ॥ ॥

द्रेभ्यः ५२ कृतेति पाठे पि कृता हंस्मितं दूरीकर्तुं हृतमित्येवार्थः ५३ च पादपूरणार्थः पाखंडानामसमयो मर्यादा येषु धर्मेषु तत्र अव्युत्क्रांताः अत्यंतमतनोदू न १
रे स्थिताः ५४ भुक्ताः अन्नमेव स्पृहयंति न स्वादुं अत एव न चतुर्दधीस्वादुनानी स्मितत्वादवस्तुः किंतु गत्त्वपूरणार्थं यथाकथंचित्कृत्तं चान्नं तच्च स्वयमेव स्पृहशाक दान०
त्वमित्याशयं वं तत्स्वार्थः ५८ अभयार्थं भयनिवृत्तिरूपं प्रयोजनं ५९ ८१

अभिमर्षिणो जाराः मयो क्षाराः हर्त्रभिमर्षिणोर्दूताः ६० परेषां दोषमेपतिशेषः ६३ आशापाशच्छेदमिति एकदेशानुषंगः कुर्वंतीति शेषः ६४ सूचकाः राजगा
मिपैशून्यवादिनः सेतुः आर्षमर्यादा ६५ पाखंडाः वेदविरोधिनः शाक्यादयः दूषकाः सतां निंदकाः समयानां धर्मसंकेतानां प्रत्यवसिताः आरूढपतिताः ६६

परदाराभिहर्त्तारः परदाराभिमर्षिणः परदारप्रयोक्तारस्ते वै निरयगामिनः ६० ये परस्वापहर्त्तारः परस्वानां च नाशकाः सूचकाश्च परेषां ये ते
वै निरयगामिनः ६१ प्रपाणां च सभानां च संक्रमाणां च भारत अगाराणां च भेत्तारो नरा निरयगामिनः ६२ अनाथां प्रमदां बालां वृद्धां भीतां
तपस्विनीं वंचयंति नरा ये च ते वै निरयगामिनः ६३ वृत्तिच्छेदं गृहच्छेदं दारच्छेदं च भारत मित्रच्छेदं तथाशायास्ते वै निरयगामिनः ६४ सूचकाः से
तुभेत्तारः परवृत्त्युपजीवकाः अकृतज्ञाश्च मित्राणां ते वै निरयगामिनः ६५ पाखंडा दूषकाश्चैव समयानां च दूषकाः ये प्रत्यवसिताश्चैव ते वै नि
रयगामिनः ६६ विषमव्यवहाराश्च विषमाश्चैव वर्द्धिषु --- लाभेषु विषमाश्चैव ते वै निरयगामिनः ६७ दूतसंव्यवहाराश्च निष्परीक्षाश्च मान
वाः प्राणिहिंसाप्रवृत्ताश्च ते वै निरयगामिनः ६८ कृताशं कृतनिर्देशं कृतभक्तं कृतश्रमं भेदैर्ये व्यपकर्षंति ते वै निरयगामिनः
६९ पर्यश्नंति च ये दारानग्निभृत्यातिथींस्तथा उत्सन्नपितृदेवेज्यास्ते वै निरयगामिनः ७० वेदविक्रयिणश्चैव वेदानां चै
व दूषकाः वेदानां लेखकाश्चैव ते वै निरयगामिनः ७१ चातुराश्रम्यबाह्याश्च श्रुतिबाह्याश्च ये नराः विकर्मभिश्च जीवंति ते
वै निरयगामिनः ७२

विषमाः जनविरोधिनो व्यवहारा सो येषां ते ६८ कृताशं दासमर्थितं वा निर्देशं तुभ्यमिदं दास्यामीति प्रतिज्ञा मा कृतापस्मे इति समासः भक्तं वेतनं व्यपकर्षंति
पत्युसकाशाद्दूरीकुर्वंति ६९ पर्यश्नंति परित्यज्याश्नंति ७१ विकर्मभिः स्वस्वनिषिद्धैः कर्मभिः ७२

केशास्त्वामरकेवलादयः ७३ अंतरं यांतिअंतरायामवंति ७४ कर्त्तारः शस्त्रशल्यादीनां ७५ अप्राप्तः अदांतः प्राप्नंलब्धेसमंजसेइतिमेदिनी

केशविक्रयकाराजन्विषविक्रयकास्त्वये क्षीरविक्रयकाश्चैवतेवैनिरयगामिनः ७३ ब्राह्मणानांगवांचैवकन्यानांचयुधि
ष्ठिर येंतरंयांतिकार्येषुतेवैनिरयगामिनः ७४ शस्त्रविक्रयकाश्चैवकर्त्तारश्चयुधिष्ठिर शल्यानांधनुषांचैवतेवैनिरयगामि
नः ७५ शिलाभिःशंकुभिर्वापिश्वभ्रैर्वाभरतर्षभ येमार्गमनुरुंधंतितेवैनिरयगामिनः ७६ उपाध्यायांश्चभृत्यांश्चभक्तांश्चभरत
र्षभ येत्यजंत्यविकारांस्तेवैनिरयगामिनः ७७ अप्राप्तदमकाश्चैवनासानांवेधकास्त्वये बंधकाश्चपशूनांयेतेवैनिरयगा
मिनः ७८ अगोप्तारश्चराजानोवलिषड्भागतस्कराः समर्थाश्चाप्यदातारस्तेवैनिरयगामिनः ७९ क्षांतान्दांतांस्तथाप्रा
ज्ञान्दीर्घकालंसहोषितान् त्यजंतिकृतकृत्यायेतेवैनिरयगामिनः ८० बालानामथवृद्धानांदासानांचैवयेनराः अद
त्वाभक्षयंत्यग्रेतेवैनिरयगामिनः ८१ एतेपूर्वंविनिर्दिष्टाःप्रोक्तानिरयगामिनः भागिनःस्वर्गलोकस्यवक्ष्यामिभरतर्ष
भ ८२ सर्वेष्वेवतुकार्येषुदैवपूर्वेषुभारत हंतिपुत्रान्पशून्कृत्स्नान्ब्राह्मणातिक्रमेकृते ८३ दानेनतपसाचैवसत्ये
नचयुधिष्ठिर येधर्ममनुवर्त्ततेतेनराःस्वर्गगामिनः ८४ शुश्रूषाभिस्तपोभिश्चविद्यामादायभारत येप्रतिग्रहनिःस्नेहा
स्तेनराःस्वर्गगामिनः ८५ भयात्पापात्तथावाधात्दारिद्र्याद्व्याधिधर्षणात् यत्कृतेप्रतिमुच्यंतेतेनराःस्वर्गगामिनः ८६
८१

पशूनांयुगेनगोरणाअंडमर्दनेनवा बलवीर्ययोर्नाशकाःअप्राप्तदमकाः ७९ सर्वेष्विति येब्राह्मणातिक्रमंकुर्वंतितेस्वर्गगामिनइत्यर्थः ८५ आबाधात्
संकरात् ८६ ७॥ ८२

८७ मधुसौद्रं ८८ कर्त्तारः पालनकर्त्तारः ८९ कुटुंबानां दातारः परविवाहकर्त्तारः ९७ आराधनेन स्वतरान्सुखयंति ते तथा ९६ द्रव्याणां वध्वलं

क्षमावंतस्तथा धीराश्च धर्म्मकार्येषु चोत्थिताः मंगलाचारसंपन्नाः पुरुषाः स्वर्गगामिनः ८७ निवृत्ता मधुमांसेभ्यः परदारेभ्य
स्तथैव च निवृत्ताश्चैव मद्येभ्यस्ते नराः स्वर्गगामिनः ८८ आश्रमाणां च कर्त्तारः कुलानां चैव भारत देशानां नगराणां च ते नराः
स्वर्गगामिनः ८९ वस्त्राभरणदातारो भक्ष्यपानान्नदास्तथा कुटुंबानां च दातारः पुरुषाः स्वर्गगामिनः ९० सर्वहिंसानिवृ
त्ताश्च नराः सर्वसहाश्च ये सर्वस्याश्रयभूताश्च ये नराः स्वर्गगामिनः ९१ मातरं पितरं चैव शुश्रूषंति जितेंद्रियाः भ्रातॄणां
चैव सस्नेहास्ते नराः स्वर्गगामिनः ९२ आढ्याश्च बलवंतश्च यौवनस्थाश्च भारत ये वै जितेंद्रिया धीरास्ते नराः स्वर्गगामिनः
९३ अपराधेषु सस्नेहाः मृदवो मृदुवत्सलाः आराधनसुखाश्चापि पुरुषाः स्वर्गगामिनः ९४ सहस्रपरिवेष्टारस्तथैव
च सहस्रदाः त्रातारश्च सहस्राणां ते नराः स्वर्गगामिनः ९५ सुवर्णस्य च दातारो गवां च भरतर्षभ यानानां वाहनानां
च ते नराः स्वर्गगामिनः ९६ वैवाहिकानां द्रव्याणां प्रेष्याणां च युधिष्ठिर दातारो वाससां चैव पुरुषाः स्वर्गगामिनः ९७
विहारावसथोद्यानकूपारामसभाप्रपाः वप्राणां चैव कर्त्तारस्ते नराः स्वर्गगामिनः ९८ निवेशनानां क्षेत्राणां वसती
नां च भारत दातारः प्रार्थितानां च ते नराः --- स्वर्गगामिनः ९९ रसानां चाप्य बीजानां धान्यानां च युधिष्ठिर स्वयमुत्पा
द्य दातारः पुरुषाः स्वर्गगामिनः १०० यस्मिंस्तस्मिन्कुले जाता बहुपुत्राः शतायुषः सानुक्रोशा जितक्रोधाः पुरुषाः
स्वर्गगामिनः १०१

कारादीनां प्रेष्याणां दासीदासानां ९७ ९८ ९९ १०० १०१ ॥ ॥ ॥ ॥ ॥ ॥

दा० ८६

दानसमसंप्रणास्यदानंवासौधर्मस्त्यागिशेषकोधर्मल्कीवत्वमार्ष अमुत्रार्थपरलोकफलं १०२ अध्यायः २२ इदंमेइति अध्यायःसप्तार्थःश्लोक १२

एतदुक्तममुत्रार्थेदैवंपित्र्यंचभारत दानंधर्मंचदानस्यपत्सूर्वमृषिभिः कृतं १०२ इतिदानधर्मेस्वर्गनाकवर्णनोनाम २२ यु
धिष्ठिरउ० इदंमेतत्वतोराजन्वक्तुमर्हसिभारत अहिंसयित्वापिकथंब्रह्महत्याविधीयते भीष्मउवाच व्यासमामंत्र्यराजेंद्रपु
रायत्पृष्टवानहं तत्तेहंसंप्रवक्ष्यामितदिहैकमनाः शृणु १ चतुर्थस्त्वंवसिष्ठस्यतत्वमाख्याहिमेमुने अहिंसयित्वाकेनेहब्रह्महत्या
विधीयते ३ इतिपृष्टोमयाराजन्पराशरशरीरजः अब्रवीन्निपुणोधर्म्मेनिःसंशयमनुत्तमं ४ ब्राह्मणंस्वयमाहूयभिक्षार्थेगुणाहृति
नं ब्रूयात्नास्तीतियःपश्चात्तंविद्याद्ब्रह्मघातिनं ५ मध्यस्थस्येहविप्रस्ययोनूचानस्यभारत वृत्तिंहरतिदुर्बुद्धिस्तंविद्याद्ब्रह्मघाति
नं ६ गोकुलस्यतृषार्त्तस्यजलार्थेवसुधाधिप उत्पादयतियोविघ्नंतंविद्याद्ब्रह्मघातिनं ७ यःप्रवृत्तांश्रुतिंसम्यक्शास्त्रं
वामुनिभिः कृतं दूषयत्यनभिज्ञायतंविद्याद्ब्रह्मघातिनं ८ आत्मजांरूपसंपन्नांमहतींसदृशेवरे नप्रयच्छतियःकन्यांतं
विद्याद्ब्रह्मघातिनं ९ अधर्म्मनिरतोमूढोमिथ्यायोवैद्विजातिषु दद्यान्मर्मातिगंशोकंतंविद्याद्ब्रह्मघातिनं १० चक्षुषाविप्र
हीनस्यपंगुलस्यजडस्यवा हरेतयोवैसर्वस्वंतंविद्याद्ब्रह्मघातिनं ११ आश्रमेवावनेवापिग्रामेवायदिवापुरे अग्निंसमुत्सृजे
न्मोहात्तंविद्याद्ब्रह्मघातिनं १२ इतिदानधर्मेब्रह्मवधोनाम १३ युधिष्ठिरउवाच तीर्थानांदर्शनंश्रेयःस्नानंचभरतर्षभ श्रवणं
चमहाप्राज्ञश्रोतुमिच्छामितत्वतः १॥

अध्यायः २३ तीर्थानामित्यध्यायस्यतात्पर्यंदरिद्राणांवाह्यधर्मसाधनंतीर्थाटनादन्यन्नास्तीति श्रोतुमिच्छामितीर्थानीत्यर्थात १ ॥ ॥ ॥

दान० ८६

२ तीर्थवंशंतीर्थसंघं ४ तीर्थमस्तीर्थानुद्दिश्य पावनानिनचेतिधर्मसंशयोस्ति ५ प्रेत्यभावेजन्मांतरे ६ मुनिवत्तमवेत्मुनीनांगतिंलभेतेत्यर्थः ७

पृथिव्यांयानितीर्थानिपुराणानिभरतर्षभ वक्तुमर्हसिमेतानिश्रोतास्मिनियतंप्रभो २ भीष्मउ० इदमंगिरसाप्रोक्तंतीर्थवंशंम
हाद्युते श्रोतुमर्हसिभद्रंतेप्राप्स्यसेधर्ममुत्तमं ३ तपोवनगतंविप्रमभिगम्यमहामुनिं पप्रच्छांगिरसंधीरंगौतमःशंसितव्रतः ४ अ
स्तिमेभगवन्कश्चित्तीर्थेभ्योधर्मसंशयः तत्सर्वंश्रोतुमिच्छामितन्मेशंसमहामुने ५ उपस्पृश्यफलंकिंस्यात्तेषुतीर्थेषुवैमुने प्रेत्य
भावेमहाप्राज्ञतद्यथास्तितथावद ६ अंगिराउ० सप्ताहंचंद्रभागांवैवितस्तामूर्मिमालिनीं विगाह्यवैनिराहारोनिर्मलोमुनिव
न्द्भवेत् ७ काश्मीरमंडलेनद्योयाःपतंतिमहानदीं तानदीःसिंधुमासाद्यशीलवान्स्वर्गमाप्नुयात् ८ पुष्करंचप्रभासंचनै
मिषंसागरोदकं देविकामिंद्रमार्गंचस्वर्णविंदुंविगाह्यच ९ विबोध्यतेविमानस्थःसोप्सरोभिरभिष्टुतः हिरण्यविंदुंविक्षोभ्यप्र
यतश्चाभिवाद्यच कुशेशयंचदेवंतंधूयतेतस्यकिल्बिषं इंद्रतोयंसमासाद्यगंधमादनसन्निधौ ११ करतोयांकुरंगेचत्रिरात्रोपो
षितोनरः अश्वमेधमवाप्नोतिविगाह्यप्रयतःशुचिः १२ गंगाद्वारेकुशावर्तेविल्वकेनीलपर्वते तथाकनखलेस्नात्वाधूतपा
प्मादिवंव्रजेत् १३ अपांह्रदउपस्पृश्यवाजिमेधफलंलभेत् ब्रह्मचारीजितक्रोधःसत्यसंधस्त्वहिंसकः १४ यत्रभागीरथीगं
गापततेदिशमुत्तरां महेश्वरस्यत्रिःस्थानेयोनरस्त्वभिषिच्येत १५

नरसिंधुं १२ गंगाद्वारादयोऽत्रब्रह्मगिरौगोदावर्यनुगतास्सर्वानाद्याःभागीरथीमाहात्म्यस्यअग्रेवक्ष्यमाणत्वात् २४ यत्रेतित्रिस्थानेस
गम्भ्रुपात्ताल १५ ॥ ॥ ॥

दा° ६०

२० रूपवर्चसीः समाहार रूपवर्चस्कं वर्चस्लिजः २५ असानांजंगमानां २६ अंतर्धानफलंपर्धवीदिभोगं २१

एकमासंनिराहारः सपश्यतिहिदेवताः सप्तगंगेत्रिगंगेचइंद्रमार्गेचतर्पयन् १६ सुधांवैलभतेभोक्तुंयोनरोजायतेपुनः महाश्रम
उपस्पृश्ययोग्निहोत्रपरः शुचिः १८ एकमासंनिराहारः सिद्धिंमासेनसव्रजेत् महाह्रदउपस्पृश्यभृगुतुंगेत्वलोलुपः १८ त्रिरा
त्रोपोषितोभूत्वामुच्यतेब्रह्महत्यया कन्याकूपउपस्पृश्यबलकायांकृतोद्यमः १९ देवेषुलभतेकीर्तिंयशसाचविराजते देवि
कायांउपस्पृश्यतथासुंदरिकाह्रदे अश्विन्योरूपवर्चस्कंप्रेत्यवैलभतेनरः २१ महागंगामुपस्पृश्यकृत्तिकांगारकेतथा पक्ष
मेकंनिराहारः स्वर्गमाप्नोतिनिर्मलः २२ वैमानिकउपस्पृश्यकिंकिणीकाश्रमेतथा निवासेसरसांदिव्येकामचारीमहीपते
२३ कालिकाश्रममासाद्यविपाशायांकृतोदकः ब्रह्मचारीजितक्रोधस्त्रिरात्रंमुच्यतेभवात् २४ आश्रमेकृत्तिकानांतु
स्नात्वायस्तर्पयेत्पितॄन् तोषयित्वामहादेवंनिर्मलः स्वर्गमाप्नुयात् २५ महापुरउपस्पृश्यत्रिरात्रोपोषितः शुचिः त्रसा
नांस्थावराणांचद्विपदानांभयंत्यजेत् २६ देवदारुवनेस्नात्वाधूतपाप्माकृतोदकः देवलोकमवाप्नोतिसप्तरात्रोषितः
शुचिः २७ शरस्तंबेकुशस्तंबेद्रोणशर्म्मपदेतथा अपांप्रपतनासेवीसेव्यतेसोप्सरोगणैः २८ चित्रकूटेजनस्थानेतथा
मंदाकिनीजलेविगाह्यवैनिराहारोराजलक्ष्मीनिषेव्यते २९ श्यामायास्त्वाश्रमंगत्वाउषित्वाचाभिषिच्यते एकपक्षं
निराहारस्त्वंतर्द्धानफलंलभेत् ३० कौशिकींतुसमासाद्यवायुभक्षस्त्वलोलुपः एकविंशतिरात्रेणस्वर्गमारोहतेनरः ३१ पा° ६०

५४ सोमसंस्थानिअमृतानिदेवाउपजीवंतीतिप्रथमापिवंतेवह्निर्द्वितीयंपिवंतेरविरित्यादिनासप्तं अर्कसंस्थानीत्यपिच्छंदोग्येरोहितादीनिपंचामृतानिवस्वादयउपजीवंती

भवंतिनिर्विषाःसर्प्पायथातार्क्ष्यस्यदर्शनात् गंगायादर्शनात्तद्वत्सर्वपापैःप्रमुच्यते ४४ अप्रतिष्ठाश्चयेकेचिदधर्म्मशरणा
श्चये तेषांप्रतिष्ठागंगेहशरणंशर्मकर्म्मच प्रक्लिष्टैरशुभैर्ग्रस्तानेनेकैःपुरुषाधमान् पततोनरकेगंगासंश्रितान्प्रेत्यतारयेत
४६ तेसंविभक्तामुनिभिर्नूनंदेवैःसवासवैः येभिगच्छंतिसततंगंगामभिमतांवर ४७ विनयाचारहीनाश्चअशिवाश्चनरा
धमाः तेभवंतिशिवाविप्रयेवैगंगामुपाश्रिताः ४८ यथासुराणाममृतंपितृणांचयथास्वधासुधायथाचनागानांतथा
गंगाजलंनृणां ४९ उपासतेयथाबालामातरंक्षुधयार्दिताः श्रेयस्कामास्तथागंगामुपासंतीहदेहिनः ५० स्वायंभु
वंयथास्थानंसर्वेषांश्रेष्ठमुच्यते स्नातानांसरितांश्रेष्ठागंगातद्वदिहोच्यते ५१ यथोपजीविनांधेनुर्देवादीनांधरास्मृता
तथोपजीविनांगंगासर्वप्राणभृतामिह ५२ देवासोमार्कसंस्थानियथासत्रादिभिर्मखैः अमृतान्युपजीवंतितथागं
गाजलंनराः ५३ जाह्नवीपुलिनोत्थाभिःसिकताभिःसमुक्षितं आत्मानंमन्यतेलोको दिविष्ठमिवशोभितम्
जाह्नवीतीरसंभूतांमृत्तांमूर्ध्नाबिभर्त्तियः बिभर्त्तिरूपंसोर्कस्यतमोनाशायनिर्म्मलम् गंगोर्म्मिभिरथोदिग्धःपुरुषंपवनो
यदा स्पृशतेसोसपाप्मानंसद्यएवापकर्षति ५६ व्यसनैरभितप्तस्यनरस्यविनशिष्यतः गंगादर्शनजाप्रीतिर्व्यसना
न्यपकर्षति ५७ ॥

प्रसिद्धशेषंस्पष्टार्थः ५६ व्यसनैःद्यूतपानादिव्यसनजैर्दुःखैः ५७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

द्वा०
६१

५१ कुमारीसंज्ञेतीर्थे ५३ ५४ ५५ ५६ ५७ ६० ६३

रामह्रदउपस्पृश्यविपाशायांकृतोदकः द्वादशाहंनिराहारःकल्मषाद्विप्रमुच्यते ४७ महाह्रदउपस्पृश्यशुद्धेनमनसानरः एक
मासंनिराहारोजमदग्निगतिंलभेत् ४८ विंध्येसंताप्यचात्मानंसत्यसंधस्त्वहिंसकः विनयात्तपआस्थायमासेनैकेनसिध्यति ४९
नर्मदायांउपस्पृश्यतथासूर्पारकोदके एकपक्षंनिराहारोराजपुत्रोविधीयते ५० जंबूमार्गेत्रिभिर्मासैःसंयतःसुसमाहितः अहोरात्रे
णैकेनसिद्धिंसमधिगच्छति ५१ कोकामुखेविगाह्यापगत्वाचांडालिकाश्रमं शाकभक्षश्चीरवासाःकुमारीर्विंदतेदश ५३ वैव
स्वतस्यसदनंनसगच्छेत्कदाचन यस्यकन्याह्रदेवासोदेवलोकंसगच्छति ५४ प्रभासेत्वेकरात्रेणाअमावास्यांसमाहितः अहोरा
त्रेणैकेनसिद्धिंसमधिगच्छति सिध्यतेतुमहाबाहोयोनरोजायतेनरः ५५ उज्जानकउपस्पृश्यआर्ष्टिषेणस्यचाश्रमेपिंगायाः
श्चाश्रमेस्नात्वासर्वपापैःप्रमुच्यते ५६ कुल्यायांसमुपस्पृश्यजप्त्वाचैवाघमर्षणं अश्वमेधमवाप्नोतित्रिरात्रोपोषितोनरः
५७ पिंडारकउपस्पृश्यएकरात्रोषितोनरः अग्निष्टोममवाप्नोतिप्रभातांशर्वरींशुचिः ५८ तथाब्रह्मसरोगत्वाधर्मारण्योपशोभि
तं पुंडरीकमवाप्नोतिउपस्पृश्यनरःशुचिः ५९ मैनाकेपर्वतेस्नात्वातथासंध्यामुपास्यच कामंजित्वाचवैमासंसर्वयज्ञफलंलभे
त् ६० कालोदकंनंदिकुंडंतथाचोत्तरमानसं अभ्येत्ययोजनशताद्भ्रूणहाविप्रमुच्यते ६१ नंदीश्वरस्यमूर्तिंतुदृष्ट्वामुच्येत
किल्बिषैः स्वर्गमार्गेनरःस्नात्वाब्रह्मलोकंसगच्छति विख्यातोहिमवान्पुण्यःशंकरश्वशुरोगिरिः आकरःसर्वरत्नानांसि
द्धचारणसेवितः ६३

राम०
६१

शरीरमिति विधिपूर्वकं आत्मश्राद्धादिकं कृत्वा अनाशके अनशके अनशनव्रते कृते सति बुद्धिपूर्वकं अत्रैव शरीरमुत्सृजेत् तीव्ररोगाद्युपघातनिमित्तं त्याज्यतमस्मरणं विधीयते अध्रुवमिति वा काशे
षात् तदपि वेदांतगतस्य तत्त्वस्य शास्त्रार्थो प्रयोजनमपश्यत एव इतरेषां त्विह मरणं रोगादिमहानिमित्तमन्यथा महापातकं प्रायश्चित्तार्थं वा उचितं नामर्थ्येति व्याख्यातं प्रागेव वनपर्व

शरीरमुत्सृजेत्तत्र विधिपूर्वमनाशके अध्रुवं जीवितं ज्ञात्वा यो वै वेदांतगो द्विजः ६४ अभ्यर्च्य देवतास्तत्र नमस्कृत्य मुनींस्तथा
ततः सिद्धो दिवं गच्छेद्ब्रह्मलोकं सनातनं ६५ कामं क्रोधं च लोभं च यो जित्वा तीर्थमावसेत् न तेन किंचिन्न प्राप्तं तीर्थाभिगमना
द्भवेत् ६६ यान्यगम्यानि तीर्थानि दुर्गाणि विषमाणि च मनसा तानि गम्यानि सर्वतीर्थसमीक्षया ६७ इदं मेध्यमिदं पुण्यमिदं
स्वर्ग्यमनुत्तमं इदं रहस्यं वेदानामाप्लाव्यं पावनं तथा ६८ इदं दद्याद्द्विजातीनां साधूनात्महितस्य च सुहृदां च जपेत्कर्णे शिष्यस्या
नुगतस्य च दत्तवान्गौतमस्येतदंगिरा वै महातपाः अंगिराः समनुज्ञातः काश्यपेन च धीमता ७० महर्षीणामिदं जप्यं पाव
नानां तथोत्तमं जपंश्चाभ्युत्थितः शश्वन्निर्मलः स्वर्गमाप्नुयात् ७१ इदं यश्चापि शृणुयाद्रहस्यं त्वंगिरोमतं उत्तमे च कुले ज
न्म लभेज्जातिं च संस्मरेत् ७२ इति दानधर्मे अंगिरस्तीर्थयात्रा २४ वैशं० बृहस्पतिसमं बुद्ध्या क्षमया ब्रह्मणः समं पराक्र
मे शक्रसममादित्यसमतेजसं १ गांगेयमर्जुनेनाजौ निहतं भूरितेजसं भ्रातृभिः सहितोऽन्यैश्च पर्यपृच्छद्युधिष्ठिरः २ ॥

णि ६७ इदं तीर्थसेवनं मेध्यं यज्ञफलप्रदं पुण्यं पापघ्नं अत एव स्वर्ग्यं आप्लाव्यं आप्लवः स्नानमित्यर्थः आम्नाय्यमिति पाठे रहस्यत्वाद्वाच्यं सार्थ्यमित्यर्थः ६८ समनुज्ञातः
प्रार्थितः काश्यपेनाप्यतद्दिसानुकामेनेति शेषः ७२ अध्यायः बृहस्पतीति अध्यायः सर्वतीर्थश्रेष्ठां गंगां कथयितुमवर्ण्यते इतोऽन्यत्तीर्थान्तरमस्तीति स्पष्टयन् २

दा ४
६२

पदापृष्ठत्वंदेवाजग्मुरितिद्विती्येनवत्तदोऽप्याहोरात्रान्वयःयस्यप्रश्नमात्रेणसिद्धानांदर्शनंभवतिकिमुततद्दर्शनादिनेतिभावः १५ महाभाग्यंयोगैश्वर्यंखेच

शयानंवीरशयनेकालकांक्षिणमच्युतं आजग्मुर्भरतश्रेष्ठंद्रष्टुकामामहर्षयः २ अत्रिर्वसिष्ठोथभृगुः पुलस्त्यः
पुलहःक्रतुः अंगिरागौतमोगस्त्यःसुमतिःसंयतात्मवान ४ विश्वामित्रःस्थूलशिराःसंवर्त्तःप्रमतिर्दमः बृहस्प
त्युशनाव्यासश्च्यवनःकाश्यपोध्रुवः ५ दुर्वासाजामदग्निश्चमार्कंडेयोथगालवः भरद्वाजोथरैभ्यश्चयवक्रीतस्त्रित
स्तथा ६ स्थूलाक्षःशवलाक्षश्चकण्वोमेधातिथिःकृशः नारदःपर्वतश्चैवसुधन्वाथैकतोद्विजः ७ नितंभूर्भुवनो
धौम्यःशतानंदोकृतव्रणः जामदग्न्यस्तथारामःकचश्चेत्येवमादयः ८ समागतामहात्मानोभीष्मंद्रष्टुंमहर्षयः तेषांमहा
त्मनांपूजामागतानांयुधिष्ठिरः ९ भ्रातृभिःसहितःश्चक्रेयथावदनुपूर्वशः तेपूजिताःसुखासीनाःकथाश्चक्रुर्महर्षयः १०
भीष्माश्रिताःसुमधुराःसर्वेंद्रियमनोहराः भीष्मस्तेषांकथाःश्रुत्वाऋषीणांभावितात्मनां ११ मेनेदिविष्टमात्मानंतुष्ट्यापरम
यायुतः ततस्तेभीष्ममामंत्र्यपांडवांश्चमहर्षयः १२ अंतर्धानंगतास्सर्वेसर्वेषामेवपश्यतां तानृषीन्सुमहाभागानंतर्धानगतान
पि १३ पांडवास्तुष्टुवुःसर्वेप्रणेमुश्चमुहुर्मुहुः प्रसन्नमनसःसर्वेगांगेयंकुरुसत्तमं उपतस्थुर्यथोद्यंतमादित्यंमंत्रकोविदाः
प्रभावात्तपसस्तेषामृषीणांवीक्ष्यपांडवाः १५ प्रकाशंतोदिशःसर्वाःविस्मयंपरमंययुः महाभाग्यंपरंतेषोऋषीणामनु
चिंत्यते पांडवाःसहभीष्मेणकथाश्चक्रुस्तदाश्रयाः १६

स्लोतर्धानगतान्यादिसिद्धिमत्त्वं १६ ॥ ॥ ॥ ॥ ॥ ॥

राम°
६२

गाः
देशाः भूमिभागाः जनपदाः महाजनानां निवासस्थानानि आश्रमाः ऋषिस्थानानि २४ आश्रमाः इत्याकारस्य पूर्वरूपमार्षं २५ ते देशा इति प्रकृष्टाः पुण्यतः इति अनुवे

वैशं० कथांते शिरसा पादौ स्पृष्ट्वा भीष्मस्य पांडवः धर्मं धर्मभृतां श्रेष्ठं पप्रच्छ युधिष्ठिरः १७ युधिष्ठिर० के देशाः के ज
नपदाः आश्रमाः केच पर्वताः प्रकृष्टाः पुण्यतः कश्च सेव्यान घः पितामह १८ भीष्म उ० अत्राप्युदाहरंतीममितिहा
सं पुरातनं शिलोंछवृत्तेः संवादं सिद्धस्य च युधिष्ठिर १९ इमां कश्चित्परिक्रम्य पृथिवीं शैलभूषणां असकृद्द्विप
दां श्रेष्ठः श्रेष्ठस्य गृहमेधिनः २० शिलवृत्तेर्गृहं प्राप्तः स तेन विधिनार्चितः उवास रजनीं तत्र सुमुखः सुखवाग् ऋषिः
२१ शिलवृत्तिस्तु पल्हृतं प्रातस्तत्कृतवांच्छुचिः कृतकृत्यमुपातिष्ठत्सिद्धं तमतिथिं तदा २२ तौ समेत्य महात्मानौ
सुखासीनौ कथाः शुभाः चक्रतुर्वेदसंबद्धास्तच्छेषकृतलक्षणाः २३ शिलवृत्तिः कथांते तु सिद्धमामंत्र्य यत्नतः
प्रश्नं पप्रच्छ मेधावी यन्मां त्वं परिपृच्छसि २४ शिलवृत्तिरुवाच के देशाः के जनपदाः के आश्रमाः केच पर्वताः प्रकृष्टाः पुण्य
तः कश्च सेव्यान घः स्तदुच्यतां २५ सिद्ध उवाच ते देशास्ते जनपदास्ते आश्रमास्तेच पर्वताः येषां भागीरथी गंगा मध्येनैति
सरिद्वरा २६ तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः गतिं तां न लभेज्जंतुर्गंगां संसेव्य यां लभेत् २७ स्पृष्टानि येषां गां
गेयैस्तोयैर्गात्राणि देहिनां न्यस्तानि न पुनस्तेषां त्यागः स्वर्गाद्विधीयते २८ सर्वाणि येषां गांगेयैस्तोयैः कार्याणि
गः २७ गात्राणि अस्थीनि न्यस्तानि गंगायां २८ २९ ॥ ॥ ॥ ११ देहिनां गां त्यक्त्वा मानवा विप्र दिवि तिष्ठंति ते जनाः २९

दा० ६३

३० शुद्धिः पुण्यवृद्धिः शुद्धिः फलेसमृद्धौ चेतिमेदिनी ३१ गवांनिर्हार आहारनिर्गमनमार्गः स्ततेनिर्मुक्तं पावकं पंचविकारस्तस्मात् गांपवानादयित्वात्तछ

८ पूर्वेवयसिकर्माणिकृत्वापापानियेनराः पश्चाद्गंगांनिषेवंतेतेपियांत्युत्तमांगतिं ३० स्नातानांशुचिभिस्तोयैर्गांगेयैः
प्रयतात्मनां व्युष्टिर्भवतियापुंसांनसाक्रतुशतैरपि ३१ यावदस्थिमनुष्यस्यगंगातोयेषुतिष्ठति तावद्वर्षसहस्राणिस्व
र्गलोकेमहीयते ३२ अपहत्यतमस्तीव्रंयथाभात्युदयेरविः तथापहत्यपाप्मानंभातिगंगाजलोक्षितः ३३ विसोमाइ
वशर्वर्योविपुष्पास्तरवोयथा तद्वद्देशादिशश्चैवहीनागंगाजलैःशिवैः ३४ वर्णाश्रमायथासर्वेस्वधर्मज्ञानविवर्जिताः क्र
तवश्चयथासोमास्तथागंगांविनाजगत् ३५ यथाहीनंनभोर्केणभूःशैलैःखंचवायुना तथादेशादिशश्चैवगंगाहीना
नसंशयः ३६ त्रिषुलोकेषुयेकेचित्प्राणिनस्सर्वएवते तर्प्यमाणाःपरांतृप्तिंयांतिगंगाजलैःशुभैः ३७ यस्तुसूर्येणनि
ष्टप्तंगांगेयंपिबतेजलं गवांनिर्हारनिर्मुक्तायावकात्तद्विशिष्यते ३८ चंद्रव्रतसहस्रंतुयश्चरेत्कायशोधनं पिबेद्यश्चापि
गंगांभःसमौस्यातांनवासमौ ३९ तिष्ठेद्युगसहस्रंतुपदेनैकेनयःपुमान् मासमेकंतुगंगायांसमौस्यातांनवासमौ ४० लंबे
तावाक्शिरायस्तुयुगानामयुतंपुमान् तिष्ठेत्यथेष्टंयश्चापिगंगायांसविशिष्यते ४१ अग्नौप्रास्तंप्रधूयेतयथातूलंद्वि
जोत्तम तथागंगावगाढस्यसर्वंपापंप्रधूयते ४२ भूतानामिहसर्वेषांदुःखोपहतचेतसां गतिमन्वेषमाणानांनगंगास
दृशीगतिः ४३

छ्रदंतर्गतान्यवान्यन्त्राभुञ्जानोयावकव्रतीत्युच्यते ३८ इंदुव्रतंचांद्रायणं ४० धूयतेदूरेज्ञायतेभस्मीभूपापिनशिष्यतेरस्पर्धः ४३ ॥ ॥

गम० ६३

५४ सोमसंस्थानि अमृतानि देवा उपजीवंतीति प्रथमा पिबंते वह्निर्द्वितीयं पिबंते विश्वेदेवास्तृतीयं अर्कसंस्थानीत्यपि षष्ठं रोगपरोहितादीनि पंचामृतानि वस्वादय उपजीवंती

भवंतिनिर्विषाःसर्प्पायथातार्क्ष्यस्यदर्शनात् गंगायादर्शनात्तद्वत्सर्वपापैःप्रमुच्यते ४४ अप्रतिष्ठाश्चयेकेचिद्धर्म्मशरणा
श्चये तेषांप्रतिष्ठागंगेहशरणंशर्म्मकर्म्मच प्रकृष्टैरशुभैर्ग्रस्तानेनेकैःपुरुषाधमान् पततोनरकेगंगासंश्रितान्प्रेत्यतारयेत्
४६ तेसंविभक्तामुनिभिर्नूनंदेवैःसवासवैः येभिगच्छंतिसततंगंगामभितिमंतावर ४७ विनयाचारहीनाश्चअशिवाश्चनरा
धमाः तेभवंतिशिवाविप्रयेवैगंगामुपाश्रिताः ४८ यथासुराणाममृतंपितृणांचयथास्वधासुधायथाचनागानांतथा
गंगाजलंनृणां ४९ उपासतेयथावालामातरंक्षुधयार्द्दिताः श्रेयस्कामास्तथागंगामुपासंतीहदेहिनः ५० स्वायंभु
वंयथास्थानंसर्वेषांश्रेष्ठमुच्यते स्नातानांसरितांश्रेष्ठागंगातद्वदिहोच्यते ५१ यथोपजीविनांधेनुर्देवादीनांवराःस्मृता
तथोपजीविनांगंगासर्वप्राणभृतामिह ५२ देवाःसोमार्कसंस्थानियथासत्रादिभिर्मखैः अमृतान्युपजीवंतितथागं
गाजलंनराः ५३ जाह्नवीपुलिनोत्थाभिःसिकताभिःसमुक्षितं आत्मानंमन्यतेलोको दिविष्ठमिवशोभितम्
जाह्नवीतीरसंभूतांमृत्तंमूर्ध्नाविभर्त्तियः विभर्त्तिरूपंसोर्कस्यतमोनाशायनिर्म्मलम् गंगोर्म्मिभिरथोदिग्धःपुरुषंपवनो
यदा स्पृशतेसोऽसपाप्मानंसद्यएवापकर्षति ५६ व्यसनैरभितप्तस्यनरस्यविनशिष्यतः गंगादर्शनजाप्रीतिर्व्यसना
न्यपकर्षति ५७ ॥

प्रसिद्धंशोषंसप्तार्थः ५६ व्यसनैःघृतपानादिव्यसनजैर्दुःखैः ५७॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

टी० ६४

६१ कार्यानभोगान् ६९ उपस्थितांनित्यंसेवितां ७२ नेषभ्यः घोरेभ्यो व्याघ्रादिभ्यः पिशाचादिभ्यो वा पापेभ्यः ब्रह्मवधादिभ्यः ७५

हंसारावैः कोकरवैः रवैरन्यैश्च पक्षिणां पस्पर्द्ध गंगा गंधर्वान् पुलिनैश्च शिलोच्चयान् ५८ हंसादिभिः सुबहुभिर्विविधैः प
क्षिभिर्वृता गंगा गोकुलसंबाधा रुद्धैः स्वर्गोपि विस्मृतः ५९ न सा प्रीतिर्दिविष्ठस्य सर्वकार्यानुपाश्नुतः संभवेद्या प
रा प्रीतिर्गंगायाः पुलिनेन्नृणां वाङ्मनः कर्म्मजैर्ग्रस्तः पापैरपि पुमानिह वीक्ष्य गंगां भवेत्पूतो अत्र मे नास्ति संशयः
६१ सप्तावरान्सप्तपरान्पितॄंस्तेभ्यश्च ये परे पुमांस्तारयते गंगां वीक्ष्य स्पृष्ट्वावगाह्य च ६२ श्रुताभिलषिता पीता स्पृष्टा
दृष्टावगाहिता गंगा तारयते नॄणामुभौ वंशौ विशेषतः ६३ दर्शनात्स्पर्शनात्पानात्तथा गंगेति कीर्त्तनात् पुनात्यपु
ण्यान्पुरुषांश्छतशोथ सहस्रशः ६४ यदीच्छेत्सफलं जन्म जीवितं श्रुतमेव च स पितॄंस्तर्पयेद्गंगामभिगम्य सुरांस्त
था ६५ न सुतैर्न च वित्तेन कर्मणा न च तत्फलं प्राप्नुयात्पुरुषोत्यंतं गंगां प्राप्य यदाप्नुयात् ६६ जात्यंधैरिह तुल्यास्ते मृ
तैः पंगुभिरेव च समर्थाये न पश्यंति गंगां पुण्यजलां शिवां ६७ भूतभव्यभविष्यज्ञैर्महर्षिभिरुपस्थितां देवैः सेंद्रैश्च को
गंगां नोपसेवेत मानवः ६८ वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः विद्यावद्भिः श्रितां गंगां पुमान्को नाम नाश्रयेत्
६९ उत्क्रामद्भिश्च यः प्राणैः प्रयतः शिष्टसंमतः चिंतयेन्मनसा गंगां स गतिं परमां लभेत् ७२ न भयेभ्यो भयं तस्य न पापेभ्यो
न राजतः आदेहपतनाद्गंगामुपास्ते यः पुमानिह ७३ महापुण्यां च गगनात्पतंतीं वै महेश्वरः दधार शिरसा गंगां तामेव
दिवि सेवते ७४ अलंकृतास्त्रयो लोकाः पथिभिर्विमलैस्त्रिभिः यस्तु तस्या जलं सेवेत्कृतकृत्यः

बलवान् ४१ उपशांतः ४२ पुराणः स्पष्टार्थं नामत्रयं ४३ पुरापचंचुः पुरोपन ज्ञातः तेनविज्ञस्त्वंचुस्चणापाविनिचंचुम् ४४ ईलक्ष्मीरित्येकाक्षरंनामईविषादेनुकंपायांर्कमा
पुनरन्वयमितिमेदिनी ४५ कुरुकर्त्ताअत्रनामैकदेशग्रहणेननामग्रहणंभामासत्यभामेतिवत्कुरुपदेनकुरुक्षेत्रमुच्यते अविमुक्तंचैकुरुक्षेत्रमितिश्रुतेः सर्वलोकप्रसिद्धेश्वनर्युवि दी२
धंतयोः कर्मोपासिस्थानयोर्निर्माता ४५ कुरुवासीकुरुक्षेत्रहृद्यवासीकुरुभूतः कुरुक्षेत्रहृदयात्मा ४७ गुणौषधः ऐश्वर्यज्ञानवैराग्यधर्मादीनामोषधवदुपक ः ४८ सर्वाशयः
सर्वेआशेरतेस्मिन्निति अत्रस्थितेसर्वएकीभवंतीतिश्रुतेः सर्वसरुषुप्तिस्थानंप्राज्ञइत्यर्थः ४९ दर्भेषुत्रनवेदिस्थवर्हिरूपेषुञ्जानादिना निहंवीषिचरतिभक्षयतीतिदर्भचारी ५०

बलवांश्चोपशांतश्चपुराणः पुरापचंचुरी कुरुकर्त्ताकुरुवासीकुरुभूतोगणौषधः सर्वाशयोदर्भचारीसर्वेषांप्राणिनांपतिः ९ देवदेवः
सुखासक्तः सत्सत्सर्वरत्नवित् कैलासगिरिवासीचहिमवद्गिरिसंश्रयः १० कूलहारीकूलकर्त्ताबहुविद्योबहुप्रदः वणिजोवर्ध
कीवृक्षोवकुलश्चंदनः छदः ११ ॥ ॥

सर्वेषांप्राणिनांपतिः ५१ १०८ देवदेवः ५२ सुखासक्तः ५३ सत्कार्यंअसत्ताकारणं ५४ सर्वरत्नवित्सर्वाणिरत्नानितत्तज्जातिषुउत्कृष्टवस्तूनिविंदतेलभतइतितथा ५५
कैलासगिरीवासी ५६ हिमवद्गिरिसंश्रयः ५७ १०९ कूलहारीमहाप्रवाहरूपेणतीरस्थद्रुमहारी ५८ कूलकर्त्तापुष्करादीनांमहीनतडागानांकर्त्ता कूलंप्रतीरसेन्य
सएष्टेकूपतडागयोरितिविश्वलोचनः ५९ बहुविद्यः ६० बहुप्रदः ६१ वणिजोवणिक्अकारांत्वंआर्षे ६२ वर्द्धकीतक्षा ६३ वृक्षास्तक्षणीयः संसारवृक्षः ६४ वकुलः
वृक्षविशेषः ६५ चंदनः ६६ छदः सप्तपर्णः ११० ॥

गं० बृहती श्रेष्ठा विश्वेदेवादीनां रूपं सौभाग्यं यया प्राप्यते सा विश्वरूपा तां ८४ ऊर्ज्ज अन्नपयआदिः ऊर्ज्जीति भागुरिमतात् टाप् तन्मदामित्यर्थः मधुकर्मफलं ब्रह्मवा तन्मदां मधुमती
६५ ८५ यो गंगामिति शेषः तया गंगया भाविताः देवाः स्पर्शनदर्शनेन गंगाया एव ८६ दक्षां तारणसमर्थां पृश्निं विष्णुमातरं बृहतीं वाग्देव बृहतीति ख्याता भागिनी भगा ता
मैश्वर्यादीनां षण्णां समूहो भागः तं दधातीति विभावरी प्रकाशिका ८७ ख्यातिः पुण्यत्वकीर्त्तिः सेव्या निषेव्या ८८ गंगां दृष्ट्वा इयं गंगेति अन्यान् गंगां दर्शयतः पुरुषस्य नियतं

अंधानजडानद्रव्यहीनांश्च गंगा पयस्विनी बृहती विश्वरूपा देवैः सेंद्रैर्मुनिभिर्मानवैश्च निषेविता सर्वकामैर्युनक्ति ८४ ऊर्जावि
तीं महापुण्यां मधुमतीं त्रिवर्त्मगां त्रिलोकगोप्त्रीं ये गंगां संश्रितास्ते दिवं गताः ८५ यो वत्स्यति द्रक्ष्यति चापि मर्त्यस्तस्मै प्रयच्छ
न्ति सुखानि देवाः तद्भाविताः स्पर्शनदर्शनेन इष्टां गतिं तस्य सुरा दिशंति ८६ दक्षां पृश्निं बृहतीं विप्रकृष्टां शिवां मृद्धीं भा
गिनीं सुप्रसन्नां विभावरीं सर्वभूतप्रतिष्ठां गंगां गता ये त्रिदिवं गतास्ते ८७ ख्यातिर्यस्याः खं दिवं गां च नित्यं पुरा दिशो वि
दिशश्चावतस्थे तस्या जलं सेव्य सरिद्वराया मर्त्याः सर्वे कृतकृत्या भवंति ८८ इयं गंगेति नियतं प्रतिष्ठा गुहस्य रुक्मस्य च गर्भ
योषा प्रातस्त्रिवर्गा घृतवहा विपाप्मा गंगावतीर्णा वियतो विश्वतोया ८९ सुतावनीध्रस्य हरस्य भार्या दिवो भुवश्चापि कक्षानु
रूपा भव्या पृथिव्यां भगिनी चापि राजन् गंगा लोकानां पुण्यदा वै त्रयाणां ९०

नियमेन गंगैव प्रतिष्ठा संसारावसानहेतुर्भवति गुहस्य कार्त्तिकेयस्य रुक्मस्य स्वर्णस्य च गर्भयोषा गर्भधारिणी स्त्री वियतः सकाशात् प्रातरवतीर्णा तेनास्याः प्रातः स्नानं अतिप्रश
स्तमिति सूचितं त्रिवर्गो धर्मार्थकामाः घृतवहा जलवाहिनी विश्वतोया विश्वप्रियतोया ८९ अवनीध्रस्य मेरोः हिमवतो वा पर्वतस्य सुता अनुरूपं अलंकारो यया सा ह राम०
तानुरूपा ९० ६५

मधुस्त्रवां घर्मस्त्रवां घृतधारा तेजोधारा घृतैर्चिः अद्भ्यनेव अर्चिर्विचीपयासा घृतं दीप्त्याद्भवारि स्थितिविश्वलोचनः अवनी धात्रा पृथिवी प्राप्तेति शेषः ६१ तस्यायो
निः परमकारणं विरजा निर्मला वितन्वी सुकरं विशेषेण तन्वी सूक्ष्मा शष्पादीर्घनिद्रा तल्पः मरणं जाह्नवीतट इति वचनात् अविनाशीघ्रा विश्वावती विश्वं अवती
पालयंती तुमभाव आर्षः आकृतिः संज्ञासामान्यरूपा आकृतिर्लक्षिपांस्तपे सामान्यवपुषोरपीति मेदिनी इष्टसिद्धाइष्टाः सिद्धायस्याः सा सिद्धानामिष्टा इति वा

मधुस्त्रवा घृतधारा घृताचिर्दीप्तोर्मिभिः शोभिता ब्राह्मणैः स्वर्दिवस्स्रुता शिरसा शिवेन गंगावनी धात्री त्रिदिवस्य माता ६१

योनिर्वरिष्ठा विरजा वितन्वी शय्या विरावारिवहा यशोदा विश्वावती चाकृतिरिष्टसिद्धा गंगोक्षितानां भुवनस्य पंथाः ६२

क्षान्त्या महत्या गोपने धारणे च दीप्त्या कृशानोस्तपनस्य चैव तुल्या गंगा संमता ब्राह्मणानां गुहस्य ब्रह्मण्यतया च नित्यं ६३

ऋषिष्टुतां विष्णुपदीं पुराणां सुपुण्यतोयां मनसापि लोके सर्वात्मना जाह्नवीं ये प्रपन्नास्ते ब्रह्मणः सदनं संप्रयाताः ६४

लोकानवेक्ष्य जननीव पुत्रान् सर्वात्मना सर्वगुणोपपन्नान् तत्स्थानकं ब्राह्ममभीप्समानैर्गंगा सदैवात्मवशैरुपास्या

६५ उस्रां पुष्टां मिषतीं विश्वभोज्यामिरावतीं रेवतीं भूधराणां शिष्टाश्रयाममृतां ब्रह्मकांतां गंगां श्रयेदात्मवान् सिद्धि

कामः ६६

उक्षितानां स्नातानां भुवनस्य स्वर्गस्य ६२ क्षान्त्यादित्रयेण मह्यादितुल्येति संबंधः गुहस्य कुमारस्य संमता इति ब्रह्मण्यतया ब्रह्मजातस्य तुल्या इहकांतया ६३ मनसा
पि प्रपन्नाः किमुत साक्षात् ६४ जननीवापास्येति संबंधः अवेक्ष्य अनुग्रहाणि इति शेषः ६५ उस्रां धेनुं अमृतं दुग्धामिति यावत् मिषतीं पश्यंती सर्व
साक्षिणीत्यर्थः इरावती अन्नवती इरा तु मदिरापारि भारत्यशनभूमिषु इति विश्वलोचनः धारिणीमिति सुब्लोरेवती मितिमातरे रेवती हलिभार्यायां तारा भिन्ना
रेभेदयोरिति मेदिनी॥ ब्रह्मणापि कांतां वांछितां हृदयां सिद्धिर्मोक्षः ६६

टी० सविभक्त्यसेव्याणगांपृथ्वी ९७ गुणानांगंगायाइतिशेषः ९९ मदुक्तानगंगागुणान्ज्ञात्वावागादिभिः स्तोत्रध्यानस्नानादिषुश्रद्धानोभवेदि
६६ तिसंबंधः १०० गंगाकृतानगंगासेवनप्राप्तान् इष्टानसंकल्पसिद्धान् पाठांतरंयमेष्टंमधुरंयथास्यात्तथा १ महानुभावागमतिंजुषतुश्रीगणातु

प्रसाद्यदेवानसविभक्त्यमस्तानभगीरथस्तपसोग्रेणगंगां गामानयत्तामभिगम्यशश्वत्तुसांभयंनेहचामुत्रविघात ९७ उदाह
तः सर्वथातेगुणानांमयैकदेशः प्रसमीक्ष्यबुध्या शक्तिर्नमेकाचिदिहास्तिवक्तुंगुणानसर्वान्परिमातुंतथैव ९८ मेरोः समुद्रस्य
चसर्वयत्नैः संख्योपलानामुदकस्यवापि शक्यंवक्तुंनेहगंगाजलानांगुणाख्यानंपरिमातुंतथैव ९९ तस्मादेतान्परयाश्रद्धयो
क्तानगुणान्सर्वान्जाह्नवीमानसदैव भवेद्वाचामनसाकर्मणाचभक्त्यायुक्तः श्रद्धयाश्रद्दधानः १०० लोकानिमांस्त्रीनय
शसावितन्यसिद्धिंप्राप्यमहतींदुरापांगंगाकृतानविरोगोवलोकानयथेष्टमिष्टानविहरिष्यसित्वं १ तवममचगुरोर्महानुभावानु
षतुमतिंसततंस्वधर्मयुक्तैः अभिमतजनवत्सलाहिगंगाजगतिपुनक्तिसुरैश्वमुक्तिमंते २ भीष्मउ० इतिपरममतिर्गुणानशे
षान्शिलरतयेत्रिपथानुयोगरूपान् बहुविधमनुशास्यतत्यरूपानगगनतलंघुतिमानविवेशासिद्धः ३ शिलवृत्तिस्तुसिद्धस्य
वाक्यैःसंबोधितस्तदा गंगामुपास्यविधिवत्सिद्धिंप्रापसुदुर्लभां ४ तथात्वमपिकौंतेयभक्त्यापरमयायुतः गंगामभ्येहिसत
तंप्राप्स्यसेसिद्धिमुत्तमां ५॥

गंगादर्शनादिनामतिःप्रसीदत्वितर्थः अभिमतः अद्यातुः २ १०३ १०४ १०५ ॥ ४ ॥ गम०
६६

१ गंगामहात्म्यार्थप्रकाशः गंगासंमता ब्राह्मणानामिति ब्रह्मविदां कृतकृत्यानामपि गंगापूज्यत्वेन संमते त्युक्तं तेन ब्राह्मण्यमहदिति तं चापृच्छति प्रशेति वृत्त
माचारः शीलं विनयः ३ चेदिच्छेत् तर्हि केन प्राप्नुयात् तदिति अनुषज्य व्याख्येयोपमर्दः ५ पर्याये अवन्तो जन्मनो १ तुल्यवर्णः अन्यवर्णजोपि जातकर्मा

वैशं० श्रुत्वेतिहासं भीष्मोक्तं गंगायाः स्तवसंयुतं युधिष्ठिरः परां प्रीतिमगच्छद्भ्रातृभिः सह १०६ इतिहासमिमं पुण्यं शृणु
याद्यः पठेत वा गंगायाः स्तवसंयुक्तं समुच्येत् सर्वकिल्बिषैः १०७ इति अनुशासनिके पर्वणि दानधर्मे गंगामाहात्म्यं २५
युधिष्ठिर उ० प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च यथा भवान् गुणैस्त्वं विविधैः सर्वैर्वयसा च समन्वितः १ भवान् विशिष्टो बुद्ध्या च प्र
ज्ञया तपसा तथा तस्मात् त्वं तं प्रक्ष्यामि धर्मं धर्मभृतां वर २ नामस्त्वदन्यो लोकेषु प्रष्टव्योस्ति नराधिप क्षत्रियो यदि वा वैश्यः
शूद्रो वा राजसत्तम ३ ब्राह्मण्यं प्राप्नुयात् येन तन्मे व्याख्यातुमर्हसि तपसा वा सुमहता कर्म्मणा वा श्रुतेन वा ब्राह्मण्यमथ चे
दिच्छेत् तन्मे ब्रूहि पितामह ४ भीष्म उवाच ब्राह्मण्यं तात दुःप्राप्यं वर्णैः क्षत्रादिभिस्त्रिभिः परं हि सर्वभूतानां स्थानमेतद्यु
धिष्ठिर ५ बह्वीस्तु संसरन् योनीर्जायमानः पुनः पुनः पर्याये तात कस्मिंश्चिद्ब्राह्मणो नाम जायते ६ अत्राप्युदाहरंती
ममितिहासं पुरातनं मतंगस्य च संवादं गर्दभ्याश्च युधिष्ठिर ७ द्विजातेः कस्यचित्तात तुल्यवर्णः सुतस्त्वभूत् मतंगो नाम
नाम्ना वै सर्वैः समुदितो गुणैः ८ स यज्ञकारः कौंतेय पित्रोत्सृष्टः परंतप प्रायाद्गर्दभयुक्तेन रथेनाप्याशुगामिना ९ ॥

दिसंस्कारयोगात् तुल्यवर्णत्वं गतः नामप्रसिद्धं ८ यज्ञकारः यज्ञं कारयन् आर्त्विज्यं कुर्वन्नित्यर्थः प्रायात् अग्निचयनार्थमिष्टकाः आनेतुमित्यर्थः मर्ते

टी० वालेअशिक्षिते ११ आवापइतिपाठेआलवालंपित्मातत्तुल्यइत्यर्थः आवापोमांडचपनेपरिक्षेपालवालयोरितिमेदिनी १२ वालेत्वयिभावः जाति
६७ स्वभावः भावंवुद्धिंनियछतिमार्गातिरस्यकर्षति १५ ब्राह्मरांलोकेदृश्यतेअंतर्धीयते तेनलक्षरोननत्कर्थमतः माचंडालंवेत्सि १६ अनशतन

सवालंगर्दभंराजन्वहंतंमातुरंतिके निरविध्यत्प्रतोदेननासिकायांपुनःपुनः १० तत्रतीव्रंव्रणंदृष्ट्वागर्दभीपुत्रगृद्धिनी
उवाचमाशुचःपुत्रचंडालस्त्वधितिष्ठति ११ ब्राह्मणोदारुणोनास्तिमैत्रोब्राह्मणउच्यते आचार्यः सर्वभूतानांशास्ताकिं
प्रहरिष्यति १२ अयंतुपापप्रकृतिर्वालेनकुरुतेदयां स्वयोनिंमानयत्येषभावोभावंनियछति १३ एतछ्रुत्वामतंगस्तुदारुणं
रासभीवचः अवतीर्यरथात्तूर्णंरासभींप्रत्यभाषत १४ ब्रूहिरासभिकल्याणिमातामेयेनदूषिता कथंमांवेत्सिचंडालंक्षि
प्रंरासभिशंसमे १५ कथंमांवेत्सिचंडालंब्राह्मण्यंयेननश्यते तत्वेनैतन्महाप्राज्ञेब्रूहिसर्वमशेषतः १६ गर्दभ्युवाच ब्रा
ह्मण्यांवृषलेनत्वंमत्तायांनापितेनह जातस्त्वमसिचांडालोब्राह्मण्यंतेनतेनशत् १७ एवमुक्तोमतंगस्तुप्रत्युपायाद्गृहंप्र
ति तमागतमभिप्रेक्ष्यपितावाक्यमथाब्रवीत् १८ मयात्वंयज्ञसंसिद्धौनियुक्तोगुरुकर्मणि कस्मात्प्रतिनिवृत्तोसिक
च्चिन्नकुशलंनव १९ मतंगउ० अयोनिरयोनिर्वाकथंसकुशलीभवेत् कुशलंतुकुतस्तस्ययस्येयंजननीपितः २०

टी० छत्क्रूरत्वलिंगेन १७ संसिद्धौसांसिध्यर्थ १९ अयोनिश्चंडालजातिः अयोनिस्तदन्यः कुत्सितयोनिःतयोर्हीनकर्मत्तयाकुशलित्वंनास्तीत्यर्थः २० राम० ६७

२२ सुचरितात्तपसश्चहेतोः स्थानंब्राह्मणपंसुखेनप्रेप्सुः विबुधांस्तापयामासेतिसंबंधः २३ हरिवाहनः इंद्रः २८ श्रेष्ठताह्रूपमर्थयाब्राह्मणपंतपः

ब्राह्मण्यंवृषलाज्जातंपितर्वैदपतीवमां अमानुषीगर्दभीयंतस्मात्तस्येतमोमहत् २१ एवमुक्त्वासपितरंमतंगस्येह्ल
तनिश्चयः ततोगत्वामहारण्यमतप्यत्सुमहत्तपः २२ ततःसंतापयामासविबुधांस्तपसान्वितः मतंगःसुखसंप्रेप्सुः
स्थानंसुचरितादपि २३ तंतथातपसायुक्तमुवाचहरिवाहनः मतंगतप्यसेकिंत्वंभोगानुत्सृज्यमानुषान् २४ वरं
ददामितेहंतवृणीष्वत्वंयदिच्छसि यच्चाप्यवाप्यंहृदितेसर्वंतद्ब्रूहिमाचिरं २५ मतंउवाच ब्राह्मण्यंकामयानोहमिद
मारब्धवांस्तपः गच्छेयंतदवाप्येहवरएषवृतोमया २६ भीष्मउ० एतच्छ्रुत्वातुवचनंतमुवाचपुरंदरः मतंगदुर्लभमि
दंविप्रत्वंप्रार्थ्यतेत्वया २७ ब्राह्मण्यंप्रार्थयानस्त्वमप्राप्यमकृतात्मभिः विनशिष्यसिदुर्बुद्धेतदुपारममाचिरं २८
श्रेष्ठतांसर्वभूतेषुतपोर्थंनाभिवर्त्तते तदग्र्यंप्रार्थयानस्त्वमचिराद्विनशिष्यसि देवतासुरमर्त्येषुयत्पवित्रंपरंतप चांडा
लयोनौजातेननतत्प्राप्यंकथंचन २८ दानधर्मेइन्द्रमतंगसंवादे भीष्मउवाच एवमुक्तोमतंगस्तुसंशितात्मायतव्रतः
अतिष्ठदेकपादेनवर्षाणांशतमच्युत १ तमुवाचततःशक्रःपुनरेवमहायशाः ब्राह्मण्यंदुर्लभंतातप्रार्थयानोनल
भ्यते २ मतंगःपरमंस्थानंप्रार्थयन्नविनशिष्यसि माकृथाःसाहसंपुत्रनैषधर्म्म ७
जातिवर्त्तेनवशीकर्तुमर्हसि २९ ३० अध्यायः एवमुक्त्वा १ २ ३ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

१० कांडपृष्टतीशस्त्रजीवितं शस्त्राजीवाकांडपृष्टइत्यमरः वेश्यापतिः कांडपृष्टः सद्भिरेवनिगद्यतइतियमः ११ जपतांगायत्रीमात्रसेविनांकुलेज

नहिशक्यंत्वयाप्राप्तुंब्राह्मण्यमिहदुर्मते अप्राप्यंप्रार्थयानोहिनविराद्विनशिष्यसि ४ मतंगपरमंस्थानंवार्य्यमाणोसकृ
न्मया चिकीर्षसेवतपसासर्वथानभविष्यसि ५ तिर्यग्योनिगतःसर्वोमानुष्यंयदिगच्छति सजायतेपुल्कसोवाचंडा
लोवाप्यसंशयः ६ पुंश्चलःपापयोनिर्वापःकश्चिदिहलक्ष्यते सतस्यामेवसुचिरंमतंगपरिवर्त्तते ७ ततोदशशतेका
लेलभतेशूद्रतामपि शूद्रयोनावपिततोवहुशःपरिवर्त्तते ८ ततस्त्रिंशद्गुणेकालेलभतेवैश्यतामपिवैश्यतायांचि
रंकालंतत्रैवपरिवर्त्तते ९ ततःषष्टिगुणेकालेराजन्योनामजायते ततःषष्टिगुणेकालेलभतेब्रह्मवंधुतां १० ब्रह्म
वधुश्चिरंकालंतत्रैवपरिवर्त्तते ततस्तुद्विशतेकालेलभतेकांडपृष्टतां ११ कांडपृष्टश्चिरंकालंतत्रैवपरिवर्त्तते तत
स्तुत्रिंशतेकालेलभतेजपतामपि १२ तंचप्राप्यचिरंकालंतत्रैवपरिवर्त्तते ततश्चतुःशतेकालेश्रोत्रियोनामजा
यते श्रोत्रियत्वेचिरंकालंतत्रैवपरिवर्त्तते १३ ॥

न्मेतिशेषः १२ श्रोत्रियः अधीते ॥ ॥ ❀ ॥ ❀ ॥ ॥ ❀

तत्रतदाप्नोत्रिमनत्वलाभेपि १४ तेशोकादयः एनंप्राप्तिवियं पात्यते अतस्तैर्नीचयोनिंप्राप्नोतीत्यर्थः १६ अध्यायः एवमुक्तः सहस्रंवत्सरान १६ अभिस्तुत्यगत्वा

तत्रदेवशोकहर्षौतुकामद्वेषौचपुत्रक अतिमानातिवादौचप्रविशंतेद्विजाधमं १४ तांश्चेज्जयतिशत्रून्सतदाप्नोतिसद्गतिं अथतेवै
जयंत्येनंतालाग्रादिवपात्यते १५ मतंगसंप्रधार्यैवंपरंहत्वामनश्चतुरं वृणीष्वकाममन्यत्वंब्राह्मण्यंहिसुदुर्लभं १६ इतिदानधर्मेइं
द्रमतंगसंवादे २७ भीष्मउ० एवमुक्तोमतंगस्तुसंशितात्मायतव्रतः सहस्रमेकपादेनततोध्यानेव्यतिष्ठत १ तंसहस्रावरेका
लेशक्रोद्रष्टुमुपागमत् तदेवचपुनर्वाक्यमुवाचबलवृत्रहा २ मतंगउ० इदंवर्षसहस्रंवैब्रह्मचारीसमाहितः अतिष्ठमेक
पादेनब्राह्मण्यंनाप्नुयांकथं ३ शक्रउवाच चंडालयोनौजातेननावाप्यंवैकथंचन अन्यंकामंवृणीष्वत्वंमावृथातेस्त्वयंश्रमः
४ एवमुक्तोमतंगस्तुभृशंशोकपरायणः अध्यतिष्ठद्गयांगत्वासोंगुष्ठेनशतंसमाः ५ सुदुर्वहंवहन्योगंकृशोधमनिसंततः
त्वगस्थिभूतोधर्मात्मासपपातेतिनःश्रुतं ६ तंपतंतमभिद्रुत्यपरिजग्राहवासवः वराणामीश्वरोदातासर्वभूतहितेरतः ७ श
क्रउ० मतंगब्राह्मणत्वंतेविरुद्धमिहदृश्यते ब्राह्मण्यंदुर्लभंतातसंवृतंपरिपंथिभिः ८ पूजयन्सुखमाप्नोतिदुःखमाप्नोत्यपूजयन्
ब्राह्मणाःसर्वभूतानांयोगक्षेमसमर्पिताः ९ ब्राह्मणेभ्योनुतृप्यंतेपितरोदेवतास्तथा ब्राह्मणाःसर्वभूतानांमतंगपरउच्यते १० ब्रा
ह्मणःकुरुतेयद्धियथायद्यच्चवांछति ११ बह्वीस्तुसंविशन्योनीर्जायमानःपुनःपुनः पर्यायेतातकस्मिंश्चिद्ब्राह्मण्यमिहविंदति

७ दुर्लभंतरमपिपरिपंथिभिः क्रोधेर्ष्याभिःसहतमतोदुःसंरक्ष्यमपीत्यर्थः ८ पूजयन्ब्राह्मणमितिशेषः ९ ब्राह्मणेभ्यःतर्पणादेवादयस्तृप्यंतीत्यर्थः १० यथयद्वांछ
तितत्तत्करोति ११ १२ ॥

दा०
६६

१३ लब्ध्वापिनबुभूषसेनप्राप्तोपिमादृशेपितपरिच्युतिकारणाभावान्नेश्यतीतिभावः १४ दुर्लभंब्राह्मण्यंप्राप्यापिनानुतिष्ठंतितदुचितान्धर्मान्शमोदमस्तपःशौचंसत्यंतितिक्षाविनयंच ज्ञानविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजमितिभावदुःखार्त्तानन्सेवर्तेऽतःप्राप्तमपिदुःसंरक्ष्यमितिभावः १५ नजानीतेरक्षितुमितिशे

तदुत्सृज्येहदुष्प्रापंब्राह्मण्यमकृतात्मभिः अन्यंवरंवृणीष्वत्वंदुर्लभोयंहितेवरः १३ मतंगउ० किंमांतुदसिदुःखार्त्तंमृतंमारय
सेचमां त्वांतुशोचामियोलब्ध्वाब्राह्मण्यंनबुभूषसे १४ ब्राह्मण्यंयदिदुःप्रापंत्रिभिर्वर्णैःशतक्रतोसुदुर्लभंसदावाप्यनानुतिष्ठंति
मानवाः १५ यःपापेभ्यःपापतमस्तेषामधमएवसः ब्राह्मण्यंयोनजानीतेधनंलब्ध्वेवदुर्लभं १६ दुःप्रापंखलुविप्रत्वंप्राप्तंदुरनुपाल
नं दुरवापमवाप्यैतन्नानुतिष्ठंतिमानवाः १७ एकारामोह्यहंशक्रनिर्द्वंद्वोनिःपरिग्रहः अहिंसादमदानस्थःकथंनार्हामिविप्रतां १८
दैवंतुकथमेतद्वैयदहंमातृदोषतः एतामवस्थांसंप्राप्तोधर्मज्ञःसन्पुरंदर १९ नूनंदैवंनशक्यंहिपौरुषेणातिवर्त्तितुं यदर्थंयत्नवा
नेवंनलभेविप्रतांविभो २० एवंगतेतुधर्मज्ञदातुमर्हसिमेवरं यदितेहमनुग्राह्यःकिंचिद्वासुकृतंमम २१ वैशं० वृणीष्वेतित
दाप्राहततस्तंवलवृत्रहा चोदितस्तुमहेंद्रेणमतंगःप्राब्रवीदिदं २२ यथाकामविहारीस्यांकामरूपीविहंगमः ब्रह्मक्षत्राविरो
धेनपूजांचप्राप्नुयामहं २३ यथाममाक्षयाकीर्त्तिर्भवेच्चापिपुरंदर कर्त्तुमर्हसितद्देवशिरसात्वांप्रसादये २४ शक्रउ० छंदोदेव
इतिख्यातःस्त्रीणांपूज्योभविष्यसि कीर्त्तिश्चातुलावत्सत्रिषुलोकेषुयास्यति २५ एवंतस्मैवरंदत्वावासवोन्तरधीयतप्राणांस्त्य
क्त्वामतंगोपिसंप्राप्तःस्थानमुत्तमं २६ एवमेतत्परंस्थानंब्राह्मण्यंनामभारत तच्चदुष्प्रापमिहवैमहेंद्रवचनंयथा २७ इति
दानधर्म्मेइंद्रमतंगसंवादः २८॥

षः १८ दैवंप्राक्कर्म यत्पतः एतांअब्राह्मणत्वरूपां १९ एतत्परंएतस्माद्देवताभावात्पुंस्त्रीष्वंतपसादेवभावोपिलघुःशक्रोतःविप्रता २१ मतंगाध्यायप्रकाशः २८

दाम०
६६

श्रुतंमे ६ तस्यशर्यातेरन्ववायेवत्सस्यपुत्रौहैराज्ञानावितियोजना १० वीतहव्यदायादैर्हैहयैसैवनामांतरंवीतहव्यइतितत्पुत्रैः ११ वत्सानांवत्सवंशप्रानांराज्ञां १७ ॥॥

युधिष्ठिरउवाच श्रुतंमेमहदाख्यानमेतत्कुरुकुलोद्वह सुदुःप्रापंप्रब्रवीषित्वब्राह्मण्यंवदतांवर १ विश्वामित्रेणचपुराब्राह्मण्यंप्राप्तमित्युत श्रूयते
वदसेतच्चदुष्प्रापमितिसत्तम २ वीतहव्यश्चनृपतिःश्रुतोमेविप्रतांगतः तदेवतावद्गांगेयश्रोतुमिच्छाम्यहंविभो ३ सकेनकर्मणाप्राप्तोब्राह्मण्यंराज
सत्तमः वरेणतपसावापितन्मेव्याख्यातुमर्हसि ४ भीष्मउ० शृणुराजन्यथाराजावीतहव्योमहायशाः राजर्षिर्दुर्लभंप्राप्तोब्राह्मण्यंलोकस
त्कृते ५ मनोर्महात्मनस्तातप्रजाधर्मेणशासतः बभूवपुत्रोधर्मात्माशर्यातिरितिविश्रुतः ६ तस्यान्ववायेद्वौराजन्राजानौसंबभूवतुः हैह
यस्तालजंघश्चवत्सस्यजयतांवरः ७ हैहयस्यतुराजेंद्रदशसुस्त्रीषुभारत शतंबभूवपुत्राणांशूराणामनिवर्त्तिनां ८ तुल्यरूपप्रभावानांब
लिनांयुद्धशालिनां धनुर्वेदेचवेदेचसर्वेष्वेवकृतश्रमाः ९ काशिष्वपिनृपोराजन्दिवोदासपितामहः हर्यश्वइतिविख्यातोबभूवजयतांवरः १०
सवीतहव्यदायादैरागम्यपुरुषर्षभः गंगायमुनयोर्मध्येसंग्रामेविनिपातितः ११ तंतुहत्वानरपतिंहैहयास्तेमहारथाः प्रतिजग्मुःपुरींरम्यांवत्साना
मकुतोभयाः १२ हर्यश्वस्यचदायादःकाशिराजोभ्यषिच्यत सुदेवोदेवसंकाशःसाक्षाद्धर्मइवापरः १३ सपालयामासमहींधर्मात्माका
शिनंदनः तैर्वीतहव्यैरागत्ययुधिसर्वैर्विनिर्जितः १४ तमथाजौविनिर्जित्यप्रतिजग्मुर्यथागतं सौदेवस्त्वथकाशीशोदिवोदासोभ्यषिच्यत
१५ दिवोदासस्तुविज्ञायवीर्यंतेषांयतात्मनां वाराणसींमहातेजानिर्ममेशक्रशासनात् १६ विप्रक्षत्रियसंबाधांवैश्यशूद्रसमाकुलां नैक
द्रव्योच्चयवतींसमृद्धविपणापणां १७ ॥

हा० १०० वप्रांतेतटसमीपे वप्रः स्थानेपुमानस्त्रीरणक्षेत्रेचयेतरेइतिमेदिनी २० दशतीर्दशसहस्राणितत्पर्यवसितिसप्ततिशत्योपिदशगुणितानान्यत्शतानि २१ परिघूनः सर्वतोनिरस्तः ३०

गंगायाउत्तरेकूलेवप्रांतेराजसत्तम गोमत्यादक्षिणेकूलेशक्रस्येवामरावती १८ तत्रतंराजशार्दूलंनिवसंतंमहीपतिं आगत्यहैहयाभ्
यः पर्य्यधावन्तभारत १९ सनिष्क्रम्यददौयुद्धंतेभ्योराजामहाबलः देवासुरसमंघोरंदिवोदासोमहाद्युतिः २० सतुयुद्धेमहाराजदिनानांद
शतीर्दश हतवाहनभूयिष्ठस्ततोदैन्यमुपागमत् हतयोधस्ततोराजनक्षीणकोषश्चभूमिपः दिवोदासः पुरींत्यक्त्वापलायनपरोभवत् २२
गत्वाश्रमपदंरम्यंभरद्वाजस्यधीमतः जगामशरणंराजाकृतांजलिररिंदम २३ तमुवाचभरद्वाजोज्येष्ठः पुत्रोबृहस्पतेः पुरोधाः शीलसंपन्नो
दिवोदासंमहीपतिं २४ किमागमनकृत्यंतेसर्वंमब्रूहिमेनृप यत्तेप्रियंतत्करिष्येनमेत्रास्तिविचारणा २५ राजोवाच भगवन्वैतहव्यै
र्मेयुद्धेवंशः प्रणाशितः अहमेकः परिद्यूनोभवंतंशरणंगतः २६ शिष्यस्नेहेनभगवंस्त्वंमांरक्षितुमर्हसि एषशेषः कृतोवंशोममतैः पा
पकर्म्मभिः २७ तमुवाचमहाभागोभरद्वाजः प्रतापवान् नभेतव्यंनभेतव्यंसौदेवव्येतुतेभयं २८ अहमिष्टिंकरिष्यामिपुत्रार्थंतेविशांपते
वीतहव्यसहस्राणियेनत्वंप्रहरिष्यसि २९ ततइष्टिंचकारर्षिस्तस्यवैपुत्रकामिकां अथास्यतनयोजज्ञेप्रतर्द्दनइतिस्मृतः ३० सजातमात्रो
वव्रृधेसमाः सद्यस्त्रयोदश वेदंचाधिजगौकृत्स्नंधनुर्वेदंचभारत ३१ योगेनचसमाविष्टोभरद्वाजेनधीमता तेजोलौकंसमंगृह्यतस्मिन्देशे
समाविशत् ३२ ॥

सद्योववृधेत्रयोदशवार्षिकोभूत्सद्यश्चवेदानजगौ ३१ योगेनयोगबलेनलौकंलोकेषुविद्यमानंतस्मिन्देशेप्रतर्द्दनेसमाविशतसमावेशितवान् ३२ ३२ ॥ रामा० १००

४६ तस्मात्तं प्रतिमां आगतं आवक्षत कथयत ४१ ४९ ॥ ॥

पयिस्त्रा२

ततः सकवची धन्वी स्तूयमानः सुरर्षिभिः वंदिभिर्वंद्यमानश्च बभौ सूर्य्य इवोदितः ३३ स रथी बद्धनिस्त्रिंशो बभौ दीप्त इवा
नलः प्रययौ सधनुर्धुर्धन्वन् खड्गी चर्मी शरासनी ३४ तं दृष्ट्वा परमं हर्षं सुदेवतनयो ययौ मेने च मनसा दग्धान् वैतहव्यान् सपार्थि
वः ३५ ततो सौ यौवराज्ये च स्थाप्य प्रतर्दनं कृतकृत्यं तदात्मानं स राजा अभ्यनंदत ३६ ततस्तु वैतहव्यानां वधाय स महीपतिः
पुत्रं प्रस्थापयामास प्रतर्दनमरिंदमं ३७ स रथः स तु संतीर्य्य गंगामाशु पराक्रमी प्रययौ वीतहव्यानां पुरीं परपुरंजयः ३८
वैतहिमपातमुं हव्यास्तु संश्रुत्य रथघोषं समुद्धतं निर्ययुस्ते नगराकारै रथैः परपाहतैः ३९ निष्क्रम्य ते नरव्याघ्रा दंशिताश्चि
त्रयोधिनः प्रतर्दनं समाजग्मुः शरवर्षैरुदायुधाः ४० शस्त्रैश्च विविधाकारै रथौघैश्च युधिष्ठिर अभ्यवर्षत राजानं हिम
वंतमिवांबुदाः ४१ अस्त्रैरस्त्राणि संवार्य्य तेषां राजा प्रतर्दनः जघान तान्महातेजा वज्रानलसमैः शरैः ४२ कृत्तोत्त
मांगास्ते राजन् भल्लैः शतसहस्रशः अपतन् रुधिरार्द्रांगा निकृत्ता इव किंशुकाः ४३ हतेषु तेषु सर्वेषु वीतहव्यस्ततेषु प प्रा
द्रवन्नगरं हित्वा भृगोराश्रममप्युत ४४ ययौ भृगुं च शरणं वीतहव्यो नराधिपः अभयं च ददौ तस्मै राजन् भृगुस्तदा
४५ अथानुपदमेवाशु तत्रागच्छत्प्रतर्दनः संप्राप्य चाश्रमपदं दिवोदासात्मजोब्रवीत् ४६ भो भोः केत्राश्रमे संति भृगोः
शिष्या महात्मनः द्रष्टुमिच्छे मुनिमहं तस्याचक्षत मामिति ४७ स तं विदित्वा तु भृगुः निश्चक्रामाश्रमात्तदा पूजयामास
च ततो विधिना न्यपसत्तमं ४८ उवाच चैनं राजेंद्र किं कार्यं ब्रूहि पार्थिव स चोवाच नृपस्तस्मै यदागमनकारणं ४९ ॥

ह० १०१ ५६ आख्यापिकानामर्य याहस्मगोरिति ५८ श्रुतिः तत्कुगार्त्समतेनैवेगृत्समदः इदस्मिन्पंचामोध्यायेपाद्मनादिका ६६ ॥ ॥ ७ ॥

राजोवाच अयं ब्रह्मन्नितो राजा वीतहव्यो विसर्जितां तस्य पुत्रैर्हि मे कृत्स्नो ब्रह्मन्वंशः प्रणाशितः ५० उत्सादितश्च विषयः का
शीनां रत्नसंचयः एतस्य वीर्यदृप्तस्य हतं पुत्रशतं मया ५१ अस्येदानीं वधाद्ब्रह्मन्भविष्याम्यनृणः पितुः तमुवाच कृपाविष्टो भृगुर्द्धर्म
भृतां वरः ५२ नेहास्ति क्षत्रियः कश्चित्सर्वे हीमे द्विजातयः एतत्तु वचनं श्रुत्वा भृगोस्तत्त्वं प्रतर्दनः ५३ पादावुपस्पृश्य शनैः प्रहृष्टो
वाक्यमब्रवीत् एवमप्यस्मि भगवन्कृतकृत्यो न संशयः ५४ यस्य राजा वीर्येण स्वजातिं त्याजितो मया अनुजानीहि मां ब्रह्मन्
ध्यायस्व च शिवेन मां ५५ त्याजितो हि मया जातिमेष राजा भृगूद्वह ततस्तेनाभ्यनुज्ञातो ययौ राजा प्रतर्दनः ५६ यथागतं महारा
ज मुक्त्वा विषमिवोरगः भृगोर्वचनमात्रेण स च ब्रह्मर्षितां गतः ५७ वीतहव्यो महाराज ब्रह्मवादित्वमेव च तस्य गृत्समदः पु
त्रो रूपेणेंद्र इवापरः ५८ शक्रस्त्वमिति यो दैत्यैर्निगृहीतः किलाभवत् ऋग्वेदे वर्त्तते चाग्र्या श्रुतिर्यस्य महात्मनः ५९ य
त्र गृत्समदो ब्रह्म ब्राह्मणैः स महीयते स ब्रह्मचारी विप्रर्षिः श्रीमान्गृत्समदोऽभवत् ६० पुत्रो गृत्समदस्यापि सुचेता अभवत्
द्विजः वर्च्चाः सुतेजसः पुत्रो वि हव्यस्तस्य चात्मजः ६१ विहव्यस्य तु पुत्रस्तु वितत्यस्तस्य चात्मजः वितत्यस्य सुतस्सत्यः संतः
सत्यस्य चात्मजः ६२ श्रवास्तस्य सुतश्चर्षिः श्रवसश्चाभवत्तमः तमसश्च प्रकाशोऽभूत्तनयो द्विजसत्तमः प्रकाशस्य च वागिं
द्रो वभूव जयतां वरः ६३ तस्यात्मजश्च प्रमतिर्वेदवेदांगपारगः घृताच्यां तस्य पुत्रस्तु रुरुर्नामोदपद्यत प्रमद्वरायां तु रुरोः पुत्रः
समुदपद्यत शुनको नाम विप्रर्षिर्यस्य पुत्रोऽथ शौनकः एवं विप्रत्वमगमद्वीतहव्यो नराधिपः भृगोः प्रसादाद्राजेंद्र क्षत्रियः क्षत्रिय हरि० १०१
र्षभः ६६ ॥

६७ अध्यायः केपूज्या इति ब्राह्मणप्रसंगु प्रापत्तं विप्रानुग्रहे कल्याणत्वं वोत्का पूज्यत्वहेतु साधारणान साधारणांश्च धर्मानाहानेनाध्यायेन ३ तेषु मानवेषु बहुमानपरः
सन्कोनमस्यसीति योज्यः ७ महार्हान्महान् अर्हः पूजा येषां अतिपूज्यानित्यर्थः ८ अविकत्थनाः श्लाघाहीनाः ९ सततं धर्मं च यजन्ति पूजयं क्षितिं

तथैव कपिलो वंशो मया गार्त्समदस्तथ विस्तरेण महाराज किमन्यदनुपृच्छसि ६७ इति दानधर्मे वीतहव्योपाख्यानं ३९ युधि
ष्ठिर उ० के पूज्या वै त्रिलोकेस्मिन्मानवा भरतर्षभ विस्तरेण तदाचक्ष्व न हि तृप्यामि कथ्यतः १ भीष्म उ० अत्राप्युदाहरंतीममि
तिहासं पुरातनं नारदस्य च संवादं वासुदेवस्य चोभयोः २ नारदं प्रांजलिं दृष्ट्वा पूजयानं द्विजर्षभान् केशवः परिपप्रच्छ भगवन्कान्न
मस्यसि बहुमानपरस्तेषु भगवन्कान्नमस्यसि शक्यं चेच्छ्रोतुमिच्छामि ब्रूह्येतद्धर्मवित्तम ४ नारद उ० शृणु गोविंद यानेतान्पूज
याम्यरिमर्दन त्वत्तोन्यः कः पुमांल्लोके श्रोतुमेतदिहार्हति ५ वरुणं वायुमादित्यं पर्जन्यं जातवेदसं स्थाणुं स्कंदं तथा लक्ष्मीं वि
ष्णुं ब्राह्मणमेव च ६ वाचस्पतिं चंद्रमसमपः पृथ्वीं सरस्वतीं सततं ये नमस्यंति तान्नमस्याम्यहं विभो तपोधनान्वेदविदो नित्यं
वेदपरायणान् महार्हान्वृष्णिशार्दूल सदा संपूजयाम्यहं ८ अभुक्त्वा देवकार्याणि कुर्वते येऽविकत्थनाः संतुष्टाश्च क्ष
मायुक्तास्तान्नमस्याम्यहं विभो ९ सम्यग्यजंति ये चेष्टीः क्षान्ता दान्ता जितेंद्रियाः सस्यं धर्मं क्षितिं गांश्च तान्नमस्यामि यादव
१० ये वै तपसि वर्त्तंते वने मूलफलाशनाः असंचयाः क्रियावंतः तान्नमस्यामि यादव ११ ये भृत्यभरणे शक्ताः सततं चाति
थिव्रताः भुंजते देवशेषाणि तान्नमस्यामि यादव १२ ये वेदं प्राप्य दुर्धर्षा वाग्मिनो ब्रह्मचारिणः याजनेध्यापने युक्ता नित्यं ता
न्पूजयाम्यहं १३

गाश्च यजन्ति ब्राह्मणोऽभ्यः प्रपच्छति यजुर्देवपूजासंगतिकारणाद्धनेषु एतेष्वपि यथासंभवमिहग्राह्याः १३ ॥

रा० १०२ आपृष्टतायानस्वाध्याये ब्रह्म मंत्रे मंत्रजपे वा १३ निर्ह्रीकाः दिगंबराः कौपीनमात्रमपि परिग्रहं न कुर्वंतीत्यर्थः १८ कपोतवृत्तयः करा
शस्थाद्यपयेसंग्रहं न कुर्वतीत्यर्थः २० त्रिवर्गो धर्मार्थकामः कृतेषु कर्त्तृषु योग्येषु कर्मसु वर्त्तते उत्तममध्यमाधमभावेनेत्यर्थः २१ अलोलुपाः स्न

प्रसन्न[illegible] हृदयाश्चैव सर्वसत्वेषु नित्यशः आपृष्टतायानस्वाध्याये युक्तास्तान्पूजयाम्यहं १४ गुरुप्रसादे स्वाध्याये यत्नं
तो ये स्थिरव्रताः शुश्रूषवोनसूयंतस्तान्नमस्यामि यादव १५ सुव्रताः मुनयो ये च ब्राह्मणाः सत्यसंगराः वोढारो हव्यकव्यानां
तान्नमस्यामि यादव १६ भैक्ष्यचर्यासु निरताः कृशा गुरुकुलाश्रयाः निःसुखा निर्धना ये तु तान्नमस्यामि यादव १७ निर्ममा निः
प्रतिद्वंद्वा निर्ह्रीका निःप्रयोजनाः ये वेदं प्राप्य दुर्द्धर्षा वाग्मिनो ब्रह्मवादिनः १८ अहिंसानिरता ये च ये च सत्यव्रता नराः दांताः श
मपराश्चैव तान्नमस्यामि केशव १९ देवतातिथिपूजायां युक्ता ये गृहमेधिनः कपोतवृत्तयो नित्यं तान्नमस्यामि यादव २० ये
षां त्रिवर्गः कृतेषु वर्त्तते नोपहीयते शिष्टाचारप्रवृत्ताश्च तान्नमस्याम्यहं सदा व्रतैश्च विविधैर्युक्तास्तान्नमस्यामि माधव २२
अयोनीनग्नियोनींश्च ब्रह्मयोनींस्तथैव च सर्वभूतात्मयोनींश्च तान्नमस्याम्यहं सदा २४ नित्यमेतान्नमस्यामि कृष्ण लोककराः
न्नृषीन् लोकाज्येष्ठान्कुलज्येष्ठांस्तमोघ्नान्लोकभास्करान् २५ तस्मात्त्वमपि वार्ष्णेय द्विजान्पूजय नित्यदा पूजिताः पूज
नार्हा हि सुखं दास्यंति तेनघ २७ अस्मिन्लोके सदा ह्येते परत्र च सुखप्रदाः चरंते मान्यमाना वै प्रदास्यंति सुखं तव २८ ॥

नेन धर्ममपेक्ष्य अर्थनादर उक्तः पुराणशीला द्रूपेनेन धर्मव्यतिरिक्तकामपरिहार उक्तः ऋतौ भार्यामुपेयादित्येतावानेव कामो धर्ममयो नान्यः २२ सुधावे
श्वेदवशेषः २३ अयोनीन् अकृतदारान् अग्नियोनीन् दाराग्निहोत्रयुतान् ब्रह्मणो वेदस्य योनीन् आश्रयभूतान् २८ ॥ ॥ ॥ ॥ राम० १०२

२९ सर्वानितिस्वाध्यायेसर्वेयज्ञाश्चांतर्भवंतीर्थः ३० भिक्षुचेतियेहौम्लोकोपुनःपाडेपक्षिणौ ३६ अध्यायः ३० पितामहेत्यादेरध्यायस्यपक्षिमात्रस्यापि

येसर्वातिथ्ययोनित्यंगोषुचब्राह्मणेषुच नित्यसत्येचाभिरतादुर्गाण्यतितरंतिते २८ नित्यंशमपरायेचतथायेचानसूयकाः नित्य
स्वाध्यायिनोयेचदुर्गाण्यतितरंतिते २९ सर्वान्देवान्नमस्यंतियेचैकंवेदमाश्रिताः श्रद्दधानाश्चदांताश्चदुर्गाण्यतितरंतिते ३० तथै
वविप्रप्रवरान्नमस्कृत्ययतव्रताः भवंतियेदानरतादुर्गाण्यतितरंतिते ३१ तपस्विनश्चयेनित्यंकौमारब्रह्मचारिणः तपसाभावितात्मा
नोदुर्गाण्यतितरंतिते ३२ देवतातिथिभृत्यानांपितॄणांचार्चनेरताः शिष्टान्नभोजिनोयेचदुर्गाण्यतितरंतिते ३३ अग्निमाधाय
विधिवत्प्रणताधारयंतिये प्राप्ताःसोमाहुतिंचैवदुर्गाण्यतितरंतिते ३४ मातापित्रोर्गुरुषुचसम्यग्वर्तंतियेसदा यथात्वंकुरुश्रे
शार्दूलेत्युक्त्वैवंविरराममः ३५ तस्मात्त्वमपिकौंतेय पितृदेवद्विजातिथीन् सम्यक्पूजयसेनित्यंगतिमिष्टामवाप्स्यसि ३६ इतिदा
नधर्मेकृष्णनारदसंवादे ३७ युधिष्ठिरउवाच पितामहमहाप्राज्ञसर्वशास्त्रविशारद त्वत्तोहंश्रोतुमिच्छामिधर्मंभरतसत्तम १
शरणागतंयेरक्षंतिभूतग्रामंचतुर्विधंकिंतस्यभरतश्रेष्ठफलंभवतितत्वतः २ भीष्मउ० इदंशृणुमहाप्राज्ञधर्मपुत्रमहायशाः इति
हासंपुरावृत्तंशरणार्थमहाफलं ३ प्रपात्यमानःश्येनेनकपोतःप्रियदर्शनः वृषदर्भमहाभागंनरेंद्रंशरणंगतः ४ सतंदृष्ट्वावि
शुद्धात्मात्रासादंकमुपागतं आश्वास्याश्वसिहीत्याहनतेस्तिभयमंडज ५ भयंतेसुमहत्कस्मात्कुत्रकिंवाकृतंत्वया येनत्वमिहसं

स्वशरीरदानेनरक्षणंकार्यंकिमुतपूर्वोक्तानांपूज्यानामर्थादिनेतितात्पर्यं ३ प्रपात्यमानःआकाशादितिशेषः वृषदर्भ ४ प्राप्तोविसंज्ञोभ्रांतचेतनः ६
औशीनरंशिबिं ६ ॥

नवंनीलंचपदुमलंतमस्त्रापीदालंकारमूतस्त्वारुवर्णोपिम ९ अतिक्रांतंनष्टप्रायजीवितं १० असमदन्नमस्माग्रतोतरायभूतोमाभव ११ तूष्णीएतदुधिरपि

नवंनीलोत्पलापीडचातुवर्णासुदर्शनं दाडिमाशोकपुष्पाक्षमात्रमस्साभयंतव मत्सकाशमनुप्राप्तंनत्वांकश्चित्समुत्सहेतम
नसाग्रहणांकर्तुंरक्षाध्यक्षपुरस्कृतं ८ काशिराजंतदद्येवंत्वदर्थंजीवितंतथा त्यजेयंभवविस्रब्धः कपोतनभयंतव ९ श्ये
न उ० ममैतद्विहितंभक्ष्यंनराजंस्त्रातुमर्हसि अतिक्रांतंचप्राप्तंचप्रयत्नाच्चोपपादितं १० मांसंचरुधिरंचास्मज्जामेदश्च
मेहितं परितोषकरोह्येषममभास्माग्रतोभव ११ तृष्णामेवाधतेसुग्राक्षुधानिर्दहतीवमां मुंचैनंनहिशक्ष्यामिराजन्मंदयितुं
क्षुधां १२ मयाह्यनुसृतोह्येषमत्पक्षनखविक्षतः किंचिदुच्छ्वासनिश्वासंनराजन्गोप्तुमर्हसि १३ यदिस्वविषयेराजन्प्रभु
स्त्वंरक्षणेनृणां खेचरस्यतृषार्त्तस्यनत्वंप्रभुरथोत्तम १४ यदिवैरिषुभृत्येषुस्वजनव्यवहारयोः विषयेष्विंद्रियाणांचत्राकाशेमा
पराक्रम १५ प्रभुत्वंहिपराक्रम्यसम्यक्पक्षहरेषुते यदित्वमिहधर्मार्थीमामपिद्रष्टुमर्हसि १६ भीष्म उ० श्रुत्वाश्येनस्यतद्वाक्यं
राजर्षिर्विस्मयंगतः संभाव्यचैनंतद्वाक्यंतदर्थीप्रत्यभाषत १७ राजोवाच गोवृषोवावराहोवामृगोवामहिषोपिवा त्वदर्थमद्यक्रि
यतांक्षुधाप्रशमनायते १८ शरणागतंनत्यजेयमितिमेव्रतमाहितं नमुंचतिममांगानिद्विजोयंपश्यवैद्विज १९ ॥ ॥ ॥

पासा १४ यदिवैर्यादिषुपराक्रमसेतद्युक्तंनत्वाकाशेत्र्याकाशचारिषु १५ पक्षहरेषुत्रसामंतिषुमांअशत्रुमपिजीवनहरणेनवधमानस्यतवधर्मार्थिनोप्यधर्मोभवि
ष्यतीतिभावः १६ एवंश्येनेनतद्वाक्यंचसंभाव्यस्तुत्वातदर्थीकपोतार्थी १९

२२ अशनैशीघ्रं २८ मांसक्षयंमांसालयंशरीरं ३० नृत्तैःनृत्येनतोषितःउपगीतः ३४ साधुवृत्तःसुशीलःसद्वृत्तःशिष्टाचारःस्वव्याजेनस्वशरीरंनिष्कपटेन ३५
श्येनउ० नवराहंनचोक्षाणंनचान्यान्विविधान्द्विजान् भक्षयामिमहाराजकिमन्नाद्येनतेनमे २० यस्तुमेविहितोभक्षःस्वयंदेवैः
सनातनः श्येनाःकपोतान्खादंतिस्थितिरेषासनातनी २१ उशीनरकपोतेतुयदिस्नेहस्तवानघ ततस्त्वंमेप्रयच्छाद्यस्वमांसंतु
लयाधृतं २२ राजोवाच महाननुग्रहोमेद्ययस्त्वमेवमिहात्थमां वाढमेवंकरिष्यामीत्युक्त्वासौराजसत्तमः २३ उत्कृत्योत्कृ
त्यमांसानितुलयासमतोलयत् अंतःपुरेततस्तस्यस्त्रियोरत्नविभूषिताः २४ हाहाभूताविनिष्क्रांताःश्रुत्वापरमदुःखिताः
तासांरुदितशब्देनमंत्रिभृत्यजनस्यच २५ बभूवसुमहान्नादोमेघगंभीरनिस्वनः निरुद्धंगगनंसर्वंव्यभ्रंमेघैःसमंततः २६
महीप्रचलिताचासीत्तस्यसत्येनकर्मणा सराजापार्श्वतश्चैवबाहुभ्यामूरुतस्तथा २७ तानिमांसानिसंछिद्यतुलांपूरयतेश
नैः तथापिनसमस्तेनकपोतेनबभूवह २८ अस्थिभूतोयदाराजानिर्मांसोरुधिरस्रवः तुलांततःसमारूढःस्वमांसक्षयमु
त्सृजन् २९ ततःसेंद्रास्त्रयोलोकास्तंनरेंद्रमुपस्थिताः भेर्यश्चाकाशगैस्तत्रवादितादेवदुंदुभिः ३० अमृतेनावसिक्तश्चवृषदर्भो
नरेश्वरः दिव्यैश्चसुसुखैर्माल्यैरभिवृष्टःपुनःपुनः ३० देवगंधर्वसंघातैरप्सरोभिश्चसर्वतः नृत्तैश्चैवोपगीतश्चपितामहइवप्र
भुः ३१ हेमप्रासादसंबाधंमणिकांचनतोरणंसवैडूर्यमणिस्तंभंविमानंसमधिष्ठितः ३२ सराजर्षिर्गतःस्वर्गंकर्मणातेनशाश्वतं
शरणागतेषुचैवंत्वंकुरुसर्वंयुधिष्ठिर ३३ भक्तानामनुरक्तानामाश्रितानांचरक्षिता दयावान्सर्वभूतेषुपरत्रसुखमेधते ३४
साधुवृत्तोहियोराजासद्वृत्तमनुतिष्ठति किन्नप्राप्तंभवेत्तेनस्वव्याजेनेहकर्मणा ३५ ॥ ॥ ॥ ॥ ॥

दा० १०४

३६ असांकथ्यापांविधेयमाहयोपीति ३८ अध्याय: किंराजसमध्यायस्सतात्संपसाहं १ अनुष्ठानं आराधनं ७ एषांब्राह्मणानांमध्ये ५ वासवेष
जीमे ६ अभिचारैः श्येनादिभिः उपायैः कौलिकशास्त्रप्रसिद्धैः तेजसासंकल्पमात्रेण ७ अं तेनाशकरांदृशश्चैषांन अपावृताः सर्वत्राकुंठितागतिरे

सराजर्षिर्विशुद्धात्माधीरः सत्यपराक्रमः काशीनामीश्वरः ख्यातस्त्रिषुलोकेषुकर्म्मणा ३६ योप्यन्यःकारयेदेवंशरणागतरक्ष
णं सोपिगच्छेत्तामेवगतिंभरतसत्तम ३७ इदंवृत्तंहिराजर्षेर्वृषदर्भस्यकीर्त्तयन् — पूतात्मावैभवेल्लोकेशृणुयाद्यश्चनित्यशः ३८
इतिदानधर्मेषुश्येनकपोतीयं ३१ युधिष्ठिरउ० किंराज्ञः सर्व्वकृत्यानांगरीयः स्यात्पितामह कुर्वन्किंकर्म्मनृपतिरुभौलोकौसमश्नु
ते १ भीष्मउ० एतद्राज्ञःकृत्यतममभिषिक्तस्यभारत ब्राह्मणानामनुष्ठानमत्यंतंसुखमिच्छता २ कर्त्तव्यंपार्थिवेंद्रेणतथैवभरतर्ष
भ श्रोत्रियान्ब्राह्मणान्वृद्धान्नित्यमेवाभिपूजयेत् ३ पौरजानपदांश्चापिब्राह्मणांश्चबहुश्रुतान् सांत्वेनभोगदानेननमस्का
रैस्तथार्च्चयेत् ७ एतत्कृत्यतमंराज्ञोनित्यमेवोपलक्षयेत् यथात्मानंयथापुत्रांस्तथैतान्प्रतिपालयेत् ५ येचाप्येषांपूज्यतमा
स्तान्दृढंप्रतिपूजयेत् तेषुशांतेषुतद्राष्ट्रंसर्वमेवविराजते ६ तेपूज्यास्तेनमस्कार्यामान्यास्तेपितरोयथा तेष्वेवयात्रालोकानां
भूतानामिववासवे ७ अभिचारैरुपायैश्चदहेयुरपितेजसा निःशेषंकुपिताःकुर्युरुग्राःसत्यपराक्रमाः ८ नान्तमेषांप्रपश्यामि
नदिशश्चाप्यपावृताः कुपिताःसमुदीक्षंतेदावेष्वग्निशिखाइव विद्यमेषांसाहसिकागुणास्तेषामतीवहि कूपाइवतृणच्छन्ना
विशुद्धाद्यौरिवापरे ९ प्रसह्यकारिणःकेचित्कार्प्पासमृदवोपरे संतिचैषामतिशठास्तथैवान्येतपस्विनः १० ॥ ॥ ॥ ॥ १०४

षामित्यर्थः अग्निस्ताइवइहतः ८ एषांमध्यःसाहसिकार्यकारिणोपिविख्यातिकिमुतविवेकिनःछन्नाःकेचिज्जडभरतादयः अपरेवसिष्ठादयः ९ प्रसह्य
कारिणः दुर्वासः प्रभृतयः मृदवोगौतमादयः येयादवारोपिहिंसाभयात्यादयोरेवाक्षिचक्षुरिलक्षपादत्वंगताः अतिशठा अगस्त्यादयः वातापितरपितुंमां

दा० १०४

कृषिंकुर्वतः उद्दालकगुर्वादयः गोरक्षंगुरोरेवउपमन्युप्रभृतयः भैक्ष्यंदत्तात्रेयादयः चौराःवाल्मीकिविश्वामित्रादयः अनृताः कलहप्रियाःनार
दादयःनटनर्त्तकाः भरतादयः ११ सर्वकर्मसहाः समुद्रशोषणादावपिसमर्थाः १२ नानेति स्वस्वप्रत्यादनार्थंलोकरक्षार्थंलोकरक्षार्थंवानिषिद्धे

कृषिगोरक्ष्यमप्येकेभैक्ष्यमन्येप्यनुष्ठिताः चौराश्चान्येऽनृताश्चान्येतथान्येनटनर्त्तकाः ११ सर्वकर्म्मसहाश्चान्येपार्थिवेषु
तरेषुच विविधाकारयुक्ताश्चब्राह्मणाभरतर्षभ १२ नानाकर्म्मसुरक्तानांबहुकर्म्मोपजीविनां धर्म्मज्ञानांसतांतेषांनित्यमेवा
नुकीर्त्तयेत् १३ पितॄणांदेवतानांचमनुष्योरगरक्षसां पुरोपेतेमहाभागाब्राह्मणावैजनाधिप १४ नैतेदेवैर्नपितृभिर्नगंधर्वै
र्नराक्षसैः नासुरैर्नपि----पिशाचैश्चशक्याजेतुंद्विजातयः १५ अदैवंदैवतंकुर्युर्दैवतंचाप्यदैवतं यमिच्छेयुःसराजास्याद्योनेष्टः
सपराभवेत् १६ परिवादंचयेकुर्युर्ब्राह्मणानामचेतसः सत्यंब्रवीमितेराजन्विनश्येयुर्नसंशयः १७ निंदाप्रशंसाकुशलाःकीर्त्तकी
र्त्तिपरायणाः परिकुप्यंतितेराजन्सततंद्विषतांद्विजाः १८ ब्राह्मणायंप्रशंसंतिपुरुषःसप्रवर्द्धते ब्राह्मणैर्यःपराकृष्टःपराभूया
त्क्षणाद्धिसः १९ शकायवनकांबोजास्तास्ताःक्षत्रियजातयः वृषलत्वंपरिगताब्राह्मणानामदर्शनात् द्राविडाश्चकलिंगाश्च
पुलिंदाश्चाप्युशीनराः कोलिसर्प्पामहिषकास्तास्ताःक्षत्रियजातयः २१ वृषलत्वंपरिगताब्राह्मणानामदर्शनात् श्रेयान्परा
जयस्तेभ्योनजयोजयतांवर २२ यस्तुसर्वमिदंहन्यात्ब्राह्मणांचनतत्समं ब्रह्मवध्यामहान्दोषइत्याहुःपरमर्षयः परिवादोद्विजा
तीनांनश्रोतव्यः कथंचन आसीताधोमुखस्तूष्णींसमुत्थायव्रजेच्चवा २३ नसजातोजनिष्यद्वापृथिव्यामिहकश्चन योब्राह्मणविरोधे

नापिकर्मणावर्त्तमानाः वस्तुतस्तुधर्मज्ञास्तेषांनराणंचनित्यमेवानुकीर्त्तयेत् १३ एतेपूज्याअतिशेषःयतोमहाभागाः १५ यापणाःहेतवः १७ अदर्शनात्
अननुग्रहात् २० ब्राह्मणप्रशंसाप्रकाशः ३२

नसुखंजीवितुमुत्सहेत् दुर्ग्राह्योमुष्टिनावायुर्दुःस्पर्शः
पाणिनाशशी दुर्धरापृथिवीराजन्दुर्जयाब्राह्मणाभुवि २४
इतिदानधर्म्मेब्राह्मणप्रशंसा ३१

दा०
१०५

ब्राह्मणानिन्त्याणध्यापत्रेयेणदानपात्रत्वंब्राह्मणानामुच्यतेसोमोराजायेषांतेसोमराजानः १ किमिछसीतिमप्रश्नपूर्वकंयत्नादिष्टंदीयतेतत्किमिछकं १८ तेपिदातारोपितत्तप्रदेयं

भीष्मउवाच ब्राह्मणानेवसततंभृशंसंपरिपूजयेत् एतेहिसोमराजानईश्वराः सुखदुःखयोः १ एतेभोगैरलंकारैरन्यैश्चैवकिमिछकैः सदापूज्यानम
स्कारैरक्ष्याश्चपितृवन्नृपैः २ ततोराष्ट्रस्यशांतिर्हिभूतानामिववासवात् जायतांब्रह्मवर्चस्वीराष्ट्रेवैब्राह्मणःशुचिः ३ महारथश्चराजन्यएष्टव्यःशत्रु
तापनः ब्राह्मणंजातिसम्पन्नंधर्मज्ञंसंशितव्रतं ४ वासयेतगृहेराजन्नतस्मात्परमस्तिवै ब्राह्मणेभ्योहविर्दत्तंप्रतिगृह्णंतिदेवताः ५ पितरःसर्वभू
तानांनैतेभ्योविद्यतेपरं आदित्यश्चंद्रमावायुरापोभूर्वरंदिशः ६ सर्वेब्राह्मणमाविश्यसदान्नमुपभुंजते नतस्याश्नंतिपितरोयस्यविप्रानभुं
जते ७ देवाश्चाप्यस्यनाश्नंतिपापस्यब्राह्मणद्विषः ब्राह्मणेषुतुतुष्टेषुप्रीयंतेपितरःसदा ८ तथैवदेवताराजन्नात्रकार्याविचारणा त
थैवतेपिप्रीयंतेयेषांभवतितद्धविः ९ नचप्रेत्यविनश्यंतिगच्छंतिचपरांगतिं येनयेनैवहविषाब्राह्मणांस्तर्पयेन्नरः १० तेनतेनैवप्रीयं
तेपितरोदेवतास्तथा ब्राह्मणादेवतत्सर्वंप्रभवंतियतःप्रजाः ११ यतश्चायंप्रभवतिप्रेत्ययत्रचगच्छति वेदैषमार्गंस्वर्गस्यतथैवनरकस्यच
१२ आगतानागतेचोभेब्राह्मणोद्विपदांवरः ब्राह्मणोभरतश्रेष्ठस्वधर्मंचैववेदयः १३ येचैनमनुवर्तंतेतेनयांतिपराभवं नतेप्रेत्य
विनश्यंतिगच्छंतिनपराभवं १४ यद्ब्राह्मणमुखात्प्राप्तंप्रतिगृह्णंतिवैवचः भूतात्मानोमहात्मानस्तेनयांतिपराभवं १५ क्षत्रियाणां
प्रतपतांतेजसाचबलेनच ब्राह्मणेष्ववशाम्यंतितेजांसिचबलानिच १६ भृगवस्तालजंघांश्चनीपानांगिरसोजयन् भरद्वाजोवैत
हव्यानैलांश्चभरतर्षभ १७ चित्रायुधांश्चाप्यजयन्नेतेकृष्णाजिनध्वजाः प्रक्षिप्याथचकुंभार्थ्यपारगामिनमारभेत् १८ ॥ ॥ सात्विकोहि ५

द्रव्यं १० ततपश्चादिकंघृतमुत्पन्नं आग्नेप्रास्ताहुतिःसम्यगादित्यमुपतिष्ठते आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेः १४ भूतात्मानप्रभूतंप्राप्तंवशीकृतेतत्रा राम०
१०५

यत्किंचिदत्तं स्मृतीतानागतमव्यवहितस्थूलसूक्ष्मं ब्राह्मणो हार्दाकाशाख्य ब्रह्मविद्विकाष्ठाग्निवद्ध्याननिर्मथनादभिव्यज्यत इत्यर्थः २१ रजःध्यानेनैव तत्प्रभूतो विक्षेपः भू
तिरैश्वर्यं बुद्धिरज्ञानं सार्द्धश्लोकः २३ अपरो ब्राह्मणः सर्वभूतपरोऽक्षेऽदिस्माद्गुणरिति विपरिणामेनुषंगः २४ क्रुष्टः क्रोशतिकर्त्तरि कः २५ सीतानेष्टु लांगलपद्धतिं गतः

यत्किंचित्कथ्यते लोके श्रूयते पश्यतेपि वा सर्वं तद्ब्राह्मणेष्वेव गूढोऽग्निरिव दारुषु १९ अत्राप्युदाहरंतीममितिहासं पुरातनं संवादं वासुदेवस्य पृ
थ्व्याश्च भरतर्षभ २० वासुदेव उ० मातरं सर्वभूतानां पृच्छे त्वां संशयं शुभे केनस्वित्कर्म्मणा पापं व्यपोहति नरो गृही २१ पृथिव्युवाच ब्राह्मणा
नेव सेवेत पवित्रं ह्येतदुत्तमं ब्राह्मणान्सेवमानस्य रजः सर्वं प्रणश्यति २२ अतो भूतिरतः कीर्त्तिरतो बुद्धिः प्रजायते महारथश्च राजन्यपूज्यः श
त्रुतापनः २३ इति मां नारदः प्राह सततं सर्वभूतये ब्राह्मणां जातिसंपन्नं धर्म्मसंशंसितं शुचिं २४ अपरेषां परेषां च परेभ्यश्चैव ये परे ब्राह्मणा
यं प्रशंसंति स मनुष्यः प्रवर्द्धते २५ अथ यो ब्राह्मणान्क्रुष्टः पराभवति सोचिरात् यथा महार्णवे क्षिप्तो सीतानेष्टुर्विनश्यति २६ तथा
दुश्चरितं सर्वं पराभावाय कल्पते पश्य चंद्रे कृतं लक्ष्म समुद्रो लवणोदकः २७ तथा भगसहस्रेण महेंद्रः परिचिह्नितः तेषामेव प्रभावेन
सहस्रनयनो ह्यसौ २८ शतक्रतुः समभवत्पश्य माधव यादृशं इच्छन्कीर्त्तिं च भूतिं च लोकांश्च मधुसूदन ब्राह्मणानुमते तिष्ठेत्पुरुषः शुचि
रात्मवान् २९ भीष्म उ० इत्येतद्वचनं श्रुत्वा मेदिन्या मधुसूदनः साधु साध्विति कौरव्य मेदिनीं प्रत्यपूजयत् ३० एतां श्रुत्वोपमां पार्थ प्रयतो
ब्राह्मणर्षभान् सततं पूजयेथास्त्वं ततः श्रेयोभिपत्स्यसे ३१ इत्यनुशासनिके पर्वणि दानधर्म्मे पृथिवीवासुदेवसंवादः ३३॥ ॥

पांसुपिंडः लोष्टो लेष्टारातिकोशकारः अंतस्यादिति मंशवत्पठं तद्दुश्चरितं ब्राह्मणद्रोहः २८ विधेय माहब्राह्मणेत्यर्द्धेन ३१ अध्याय ३३ ॥॥ ॥

द्रा०
१०६

जन्मनैवसंस्काराप्रभावेपिब्राह्मणोनमस्यएव अभिगंतमस्तंपक्कमन्नंतस्मात्सेभोक्तुमर्हः प्रसृताग्रभुक् सर्वेत्वर्षाः धर्मादयोयेभ्यस्ते सुमनसांदेवानांमुख
मिवभूतास्सुमनोमुखाः २ नोस्माकंद्विषतःशत्रून् तैरपूजिताः ब्राह्मणाः दारुणयुक्ताभिः नवशत्रवेवानश्यंतिस्मादिभिर्गीर्भिः अभिध्यायंतुअभिहन्तु

भीष्मउवाच जन्मनैवमहाभागोब्राह्मणोनामजायते नमस्यः सर्वभूतानामतिथिः प्रसृताग्रभुक् १ सर्वेषांसुहृदस्तातब्राह्मणाः
सुमनोमुखाः गीर्भिर्मंगलयुक्ताभिरनुध्यायंतिपूजिताः २ सर्वान्नोद्विषतस्तातब्राह्मणाजातमन्यवः गीर्भिर्दारुणयुक्ताभिरभिध्यास्यु
रपूजिताः ३ अत्रगाथाः पुराणगीताः कीर्त्तयंतिपुराविदः सृष्ट्वाद्विजातीन्धातापियथापूर्वंसमादधत् नचान्यदिहकर्त्तव्यंकिंचि
दूर्ध्वंयथाविधि गुप्तोगोपायतेब्रह्मश्रेयोवस्तेनशोभनं ५ स्वयमेवकुर्वतांकर्म्मश्रीर्वोब्राह्मीभविष्यति प्रमाणांसर्वभूतानांप्र
ग्रहाश्चभविष्यथ ६ नशौद्रंकर्म्मकर्त्तव्यंब्राह्मणेनविपश्चिता शौद्रंहिकुर्वतः कर्म्मधर्मः समुपरुध्यते ७ श्रीश्चबुद्धिश्चतेज
श्चविभूतिश्चप्रतापिनी स्वाध्यायेनैवमाहात्म्यंविपुलंप्रतिपत्स्यते ८ हुत्वाचाहवनीयस्थंमहाभागेप्रतिष्ठिता अग्रभोज्याः प्रसू
तीनांश्रियाब्राह्म्यानुकल्पिताः ९ श्रद्धयापरयायुक्ताह्यनभिद्रोहलब्धया दमस्वाध्यायनिरताः सर्वान्कामानवाप्स्यथ १० यच्चैवमा
नुषेलोकेयच्चदेवेषुकिंचन सर्वंतत्तपसासाध्यंज्ञानेननियमेनच ११ इत्येवंब्रह्मगीतास्तेसमाख्यातामयानघ विप्राणामनुकंपार्थंतेन
प्रोक्तंहिधीमता १२

रितिसप्तार्थः पाठः ३ समादधत्तत्समाधिं नियमंकृतवान् ४ ब्रह्मब्राह्मणाः वः शोभनंश्रेयस्तेनैव ५ स्वंकर्मब्राह्मणगोपनं प्रग्रहादमनक्षमाद्गुणश्च ६
शौद्रंकर्मसेवा कर्त्तव्यंकारयितव्यमकुर्वतः कारयतः ७ श्रीश्चत्यादिःश्रियमित्यर्थः ८ अहवनीयस्थंदेवतागणंप्रसूतोनाशिश्रुभ्योयग्रेभोज्यमेषांतेब्राह्मी श्रियाविद्ययाऽनुकल्पितापात्रीताः १२

राम०
१०६

न्वयइतिवंडत्वाद्दिदोषवंतोपिप्रश्ञाएवेत्यर्थः १७ अमर्षणात्तत्राह्मणकोपासहनात् १३ तेभ्योरक्ष्यंस्वकुलमितिशेषः १२ अध्यायः अत्रापीत्यधायस्यतात्पर्यमिअसुराणा

भूमस्तेषांवलंमन्येयथाराजंस्तपस्विनः दुरासदाश्चचंडाश्चरभसाःक्षिप्रकारिणः १३ संत्येषांसिंहसत्वाश्चव्याघ्रसत्वास्तथापरे
वराहमृगसत्वाश्चजलसत्वास्तथापरे १४ सर्पस्पर्शसमाःकेचित्तथान्येमकरस्पृशः विभाष्यघातिनःकेचित्तथाचक्षु
र्हणोपरे १५ संतिचाशीविषसमाःसंतिमंदास्तथापरे विविधानीहवृत्तानिब्राह्मणानांयुधिष्ठिर १६ मेकलाद्राविडालाटाः
पौंड्राःकोन्वशिरास्तथा शौंडिकाःदरदाःदर्वाश्चौराःशवरवर्बराः १७ किरातायवनाश्चैवतास्ताःक्षत्रियजातयः वृषलत्व
मनुप्राप्ताब्राह्मणानाममर्षणात् १८ ब्राह्मणानांपरिभवादसुराःसलिलेशयाः ब्राह्मणानांप्रसादाच्चदेवाःस्वर्गनिवासि
नः १९ अशक्यंस्प्रष्टुमाकाशमचाल्योहिमवान्गिरिः अधार्यासेतुनागंगादुर्जयाब्राह्मणाभुवि २० नब्राह्मणविरोधेनश
क्याशास्तुंवसुंधरा ब्राह्मणाहिमहात्मानो देवानामपिदेवताः २१ तान्पूजयस्वसततंदानेनपरिचर्यया यदीच्छसिमहीं
भोक्तुमिमांसागरमेखलां २२ प्रतिग्रहेणतेजोहिविप्राणांशाम्यतेनघ प्रतिग्रहंयेनेच्छेयुस्तेभ्योरक्ष्यंत्वयानघ २३ इतिदानध
र्मेब्राह्मणप्रशंसायांब्राह्मगीता २४ भीष्मउ० अत्राप्युदाहरंतीममितिहासंपुरातनं शक्रशंवरसंवादंतन्निबोधयुधिष्ठिर
१ शक्रोह्यज्ञातरूपेणजटीभूत्वारजोरुणः विरूपंरथमास्थायप्रश्नंपप्रच्छशंवरं २ शक्रउ० केनशंवरवृत्तेनस्वजात्यानधि
तपिश्रीर्ब्राह्मणप्रसादलभ्येवेति ४ ॥ ॥ ॥ ॥ तिष्ठसि श्रेष्ठंत्वांकेनमन्यंतेतद्धिमेब्रूहितत्त्वतः ३ शंवरउ० नासूयामियदाविप्रान्

ब्राह्मणेषुचमेमतं शास्त्राणिवदतोविप्रान्सममन्यामियथा सुखं ४

दा० मांसपिनमधुञ्चमन्नतुल्यावियांसमासिंवंति क्षौद्रंमधुपटलंमक्षिकामक्षिवेत्यायोऽर्थः ७ समाधिंब्राह्मणेषुनिष्ठां ८ वागग्रेजिह्वाग्रेनिष्ठं विद्यामतेयेषां ब्राह्मणा
१०१ नांरसानामुक्तानांसुधानां १३ ब्राह्मणाःवेदार्थाः दुर्वसतीः गुरुकुलवासक्लेशात् अपिअपिवासतिवैराग्येकइतिः स्यात्नैष्ठिकब्रह्मचर्यात्पारिव्राज्यमेवकुर्यादित्यर्थः १४

ञ्ज्ञात्वाचनावज्ञानामिनापराधामिकर्हिचित् अभ्यर्थ्यामनुपृच्छामिपादौगृह्णामिधीमतां ५ तेविश्रब्धाःप्रभाषंतेसंपृच्छन्तेचमांसदा
प्रमत्तेष्वप्रमत्तोस्मिसदासुप्तेषुजागृमि ६ तेमांशास्त्रपथेयुक्तंब्राह्मणपमनुसूयकं समांसिंचंतिशास्तारःक्षौद्रंमक्षिवमक्षिकाः ७ यच्च
भाषंतिसंतुष्टास्तच्च गृह्णामिमेधया समाधिमात्मनोनित्यमतुलोममचिंतयं ८ सोहंवागग्रमिष्टानांरसानामवलेहकः स्वजात्यानधितिष्ठामिनक्षत्राणीवचंद्रमाः ९ एतत्पृथिव्याममृतमेतच्चक्षुरनुत्तमं यद्ब्राह्मणमुखाच्छास्त्रमिहश्रुत्वाप्रवर्तते १० एतत्कारणमास्थायदृष्ट्वा
दैवासुरंपुरा युद्धंपितामहःप्रात्माविस्मितःसमपद्यत ११ दृष्ट्वाचब्राह्मणानांतुमहिमानंमहात्मनां पर्यपृच्छत्कथमिमांसिद्धाइतिनिशाकरं १२
सोमउ० ब्राह्मणास्तपसासेवंसिध्यंतेवाग्बलाःसदा भुजवीर्याश्चराजानोवाग्अस्त्राश्चद्विजातयः १३ प्रणवंचाप्यधीयीतब्राह्मीर्दुर्वसतीर्वसन्
निर्मन्युरपिनिर्वीरोपतिःस्यात्समदर्शनः १४ अपिचज्ञानसंपन्नःसर्वान्वेदान्पितुर्गृहे श्लाघमानइवाधीयाद्ग्राम्यइत्येवतंविदुः १५ भूमिरेतो
निगिरतिसर्पोबिलशयानिव राजानंचाप्ययोद्धारंब्राह्मणंचाप्रवासिनं १६ अभिमानःश्रियंहंतिपुरुषस्याल्पमेधसः गर्भेणादुष्यतेकन्या
गृहवासेनचद्विजः १७ इत्येतन्मेपिताश्रुत्वासोमाद्द्भुतदर्शनात् ब्राह्मणान्पूजयामासतथैवाहंमहाव्रतान् १८ भीष्मउ० श्रुत्वेतद्वचनं
शक्रोदानवेंद्रमुखाच्च्युतं द्विजान्संपूजयामासमहेंद्रत्वमवापच १९ इतिदानधर्मेब्राह्मणप्रशंसायामिंद्रशंबरसंवादः ३५ ॥
पितुर्गृहेवेदाध्ययनंघनिंदतिअपिचेत् १५ अप्रवासिनंमोवात्स्येयानतेवेदार्थग्रामांतरेवासमकुर्वाणाः १६ अध्यायः ॥ ॥ ॥ ॥ ॥ ॥ एम०
१०७

अपूर्वश्चेत्यध्यायः ब्राह्मणेष्वपि पात्रविशेषपरीक्षार्थः १ तत्र अपूर्वश्चिरोषितो दूराद्‌ागतश्च पात्रं तेषां मध्ये कश्चिद्धर्मार्थं कश्चित्कुरुदक्षिणार्थं कश्चित्कुटुंबभरणार्थ मिति एवंरूपा क्रिया केषांचित्पात्रत्वे प्रधानं भवति केषांचिदुपांशुव्रतं मौनं पारिव्राज्यमिति तया क्रियया मौनेन योऽसौ रतस्तस्माद्देयं तान् अनेन स्वरूपतः इत्याह क्रियेति द्व्या मः दद्यामहं इत्येवं वक्तव्यं न त्वेतेषु कंचित्प्रत्याचक्षीतेत्यर्थः ४ दत्तं प्रदेयं वस्तु अभिमानिनी देवता न संतपेत् यया तादृशाय देयं नान्यस्मै स्मर्यते हि न ष्टशौचेव्रतभ्रष्टे वि

युधिष्ठिर उ० अपूर्वश्चाभवेत्पात्रमथवापि चिरोषितः दूरादभ्यागतं चापि किं पात्रं स्यात्पितामह १ भीष्म उवाच क्रिया भवति केषांचि दुपांशुव्रतमुत्तमं यो यो याचेत यत्किंचित्सर्वं दद्याम इत्यपि २ अपीडयन्भृत्यवर्गमित्येवमनुशुश्रुम पीडयन्भृत्यवर्गं हि आत्मानम पकर्षति ३ अपूर्वं भावयेत्पात्रं यच्चापि स्याच्चिरोषितं दूरादभ्यागतं चापि तत्पात्रं च विदुर्बुधाः ४ युधिष्ठिर उ० अपीडया च भूतानां ध र्मस्याहिंसया तथा पात्रं विद्यात्तु तत्त्वेन यस्मै दत्तं न संतपेत् ५ भीष्म उ० ऋत्विक्पुरोहिताचार्याः शिष्यसंबंधिबांधवाः सर्वे पूज्या श्च मान्याश्च श्रुतवृत्तोपसंपकाः ६ अतोऽन्यथा वर्तमानाः सर्वे नार्हन्ति सत्क्रियां तस्मात्सुसंपरीक्षेत पुरुषान्प्रणिधाय वै ७ अ क्रोधः सत्यवचनमहिंसा दम आर्जवं अद्रोहो नाभिमानश्च ह्रीस्तितिक्षा दमः शमः ८ यस्मिन्नेतानि दृश्यंते न चाकार्याणि भा रत स्वभावतो निविष्टानि तत्पात्रं मानमर्हति ९ तथा चिरोषितं चापि संप्रत्यागतमेव च अपूर्वं चैव पूर्वं च तत्पात्रं मानमर्हति--

-- १० अप्रामाण्यं च वेदानां शास्त्राणां चाभिलंघनं अव्यवस्था च सर्वत्र एतन्नाशनमात्मनः ११ ॥ ॥ ॥ ॥

प्रवेदविवर्जिते दीयमानं दत्तं स त्वं किं मया दुष्कृतं कृतमिति अतः कस्मादृश इति प्रश्नः ५ मुख्यं पात्रविशेषणं श्रुतवृत्तोपसंपका इति ९ तथा अक्रोधादिगु णविशिष्टः १० अपात्रता वा नमाह अप्रामाण्यमिति आत्मनः पात्रतायाः इति शेषः ११ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥((

दा० १०८ निरर्थिकाश्रुतिविरोधित्वेनमोक्षानुपयोगिनी १२ हेतुवादानब्रुवन्सत्सुतांजयन्कारणगोष्ठीः कुर्वन्नपिअहेतुवादिकःशास्त्रोक्तहेतुवादविरोधात् १३ वोद्धव्यः अस्पृश्य
त्वेनेतिशेषः तत्रहेतुमाहश्वानंहितंविदुःशिष्टाइतिशेषः एतदेवोपपादयतियथेति १५ लोकयात्राशिष्टाचारादिव्यवहारः धर्मः श्रुतिस्मृत्युक्तः आत्महितानिश
मदमादीनि १६ देवानामृणंयज्ञेन ऋषीणांवेदाधिगमेन पितॄणांप्रजोत्पादनेन विप्राणांदानमानेन विप्राणांदानमानेनअतिथीनांवैश्वदेवांतेआग
तानांसम्मानातिथ्येनच उन्मुच्यअपाकृत्यकर्माणिकुर्वन्नित्यत्रैरणान्वयः १७ पर्यायेणयथाक्रमेणप्रशिक्षिते नकर्म्मणापत्नेकर्माणियज्ञादीनि १९

भवेत्पंडितमानीयोब्राह्मणोवेदनिंदकः आन्वीक्षिकींतर्कविद्यामनुरक्तोनिरर्थिकां १२ हेतुवादान्ब्रुवन्सत्सुविजेताहेतुवादिकः
आक्रोष्टाचातिवक्ताचब्राह्मणानांसदैवहि १३ सर्वाभिशंकीमूढश्चबालःकटुकवागपि बोद्धव्यस्तादृशस्तातनरश्वानंहितंविदुः १४ यथा
श्वाभषितुंचैवहंतुंचैवावसृज्यते एवंसंभाषणार्थायसर्वशास्त्रवधायच १५ लोकयात्राचद्रष्टव्याधर्म्मश्चात्महितानिच एवंनरोव
र्तमानःशाश्वतीर्वर्द्धतेसमाः १६ ऋणमुन्मुच्यदेवानामृषीणांचतथैवच पितॄणामथविप्राणामतिथीनांचपंचमं १७ पर्याये
णविशुद्धेनसुविनीतेनकर्म्मणा एवंगृहस्थःकर्माणिकुर्वन्धर्म्मान्नहीयते १८ इतिदानधर्म्मेपात्रपरीक्षा ३६ युधिष्ठिर
उवाच स्त्रीणांस्वभावमिच्छामिश्रोतुंभरतसत्तम स्त्रियोहिमूलंदोषाणांलघुचित्ताहिताःस्मृताः १ भीष्मउवाच अत्राप्युदा
हरंतीममितिहासंपुरातनं नारदस्यचसंवादंपुंश्चल्यापंचचूडया २ लोकाननुचरन्सर्वान्देवर्षिर्नारदःपुरा ददर्शाप्सरसंब्राह्मीपंच
चूडामनिंदितां ३

पात्रपरीक्षाप्रकाशःस्त्रीणामिति पूर्वस्मिन्मेघवाहनपर्वणिवेद्यंवस्तूक्तंतेद्वदनंधर्मवलादेवप्रवर्ततीतियत्तेद्धिर्मोविक्तव्यःसचकामप्रकारविहितदारपरिग्रहाधीन
इत्यष्टावक्रादिकंसंवादेप्रदर्शितंतत्रापित्र्यग्निविगास्माधनगायाशुद्धंस्पसचतुष्टयंतस्याग्निहोत्रेस्वर्गायनरकायेतरस्येचेतिस्मृतेर्यज्ञांगभूतात्र्यात्मशुद्धि
र्हीत्विकृष्णुद्धिस्वतोर्पब्राह्मणानाहान्यामांउक्तात्रयपत्नीशुद्धिर्द्वयसुद्धिस्वमहत्ताप्रवंधेनप्रस्तूयते तत्रतावद्दर्शयतिस्त्रीणामित्यादिनालघुचित्ताः दानं १०८
वायुवच्चलचित्ताः १ ब्राह्मीब्राह्मस्यलोकस्था ३

४ विषयेवर्त्तमोऽपत्वे ६ कृतमतिःवक्ष्यामीतिकृतनिश्चयाभवत् १९

तांदृष्ट्वाचारुसर्वांगींपप्रच्छाप्सरसंमुनिः संशयोहृदिकश्चिन्मेब्रूहितन्मेसुमध्यमे ४ भीष्म उ० एवमुक्ताथसाविप्रंप्रत्युवाचाथना
रदंविषयेसतिवक्ष्यामिसमर्थामन्यसेचमां ५ नारद उ० नत्वामविषयेभद्रेनियोक्ष्यामिकथंचन स्त्रीणांस्वभावमिच्छामित्वत्तःश्रोतुंव
रानने ६ भीष्म उ० एतच्छ्रुत्वावचस्तस्यदेवर्षेरप्सरोत्तमा प्रत्युवाचनशक्ष्यामिस्त्रीसतीनिंदितुंस्त्रियः ७ विदितास्तेस्त्रियोयाश्चयादृ
शाश्चस्वभावतः नमामर्हसिदेवर्षेनियोक्तुंकार्यईदृशं ८ तामुवाचसदेवर्षिःसत्यंवदसुमध्यमे मृषावादेभवेद्दोषःसत्येदोषोनविद्यते
९ इत्युक्तासाकृतमतिरभवच्चारुहासिनी स्त्रीदोषान्छाश्वतान्सत्यान्भाषितुंसंप्रचक्रमे १० पंचचूडोवाचकुलीनारूपवत्यश्चनाथ
वत्यश्चयोषितः मर्यादासुनतिष्ठंतिसदोषःस्त्रीषुनारद ११ नस्त्रीभ्यःकिंचिदन्यद्वैपापीयस्तरमस्तिवैस्त्रियोहिमूलंदोषाणां
तथात्वमपिवेत्थह १२ समाज्ञातानृद्धिमतःप्रतिरूपान्वशेस्थितान् पतीनंतरमासाद्यनालंनार्यःप्रतीक्षितुं १३ असद्धर्म
स्त्वयंस्त्रीणामस्माकंभवतिप्रभो पापीयसोनरान्यद्वैलज्जांत्यक्त्वाभजामहे १४ स्त्रियंहियःप्रार्थयतेसन्निकर्षंचगच्छति
ईषच्चकुरुतेसेवांतमेवेच्छंतियोषितः १५ अनर्थित्वान्मनुष्याणांभयात्परिजनस्यच मर्यादायाममर्यादाःस्त्रियस्तिष्ठंतिभ
र्तृषु १६ नासांकश्चिदगम्योस्तिनासांवयसिनिश्चयः विरूपंरूपवंतंवापुमानित्येवभुंजते १७ नभयान्नाप्यनुक्रोशान्नार्थ
हेतोःकथंचन नज्ञातिकुलसंबंधात्स्त्रियस्तिष्ठंतिभर्तृषु १८ यौवनेवर्त्तमानानांमृष्टाभरणवाससां नारीणांस्वैरवृ
त्तीनांस्पृहयंतिकुलस्त्रियः १९ ॥

दा०
१०९

११ गतिः प्राप्तिः अन्योन्यमकृत्रिमलिंगधारिणो ध्वस्त्वा मैथुनार्थं प्रवर्त्तन्ते एतच्च लोकप्रसिद्धं भर्तृषु दूरस्थेषु इति शेषः नहि तिष्ठंति धैर्ये इति शेषः १३ तं चलस्वभावा सा ला
हृकाणां हृदयान्येनितिश्रुतेर्यथा हृक विशेषाः प्रत्यहं नवं नवं मां समिच्छंति घासलं नरं मंतस्वं स्त्रियः पुरुषमित्यर्थः १४ काष्ठानां काष्ठैः १८ अंतकादिवत्सर्वघोना

यादृशाश्च बहुमता रक्ष्यंते दयितैः स्त्रियः अपि ताः संप्रसज्जंते कुब्जांधजडवामनैः १० पंगुष्वथ च देवर्षे ये चान्ये कुत्सिता नराः स्त्री
णामगम्यो लोकेस्मिन्नास्ति कश्चिन्महामुने ११ यदि पुंसां गतिर्ब्रह्मन्कथंचिन्नोपपद्यते अप्यन्योन्यं प्रवर्त्तंते नहि तिष्ठंति भर्तृषु
१२ अलाभात्पुरुषाणां हि भयात्परिजनस्य च वधबंधभयाच्चापि स्वयं गुप्ता भवंति ताः १३ चलस्वभावा दुःसेव्या दुर्ग्राह्या भवतस्तथा
प्राज्ञस्य पुरुषस्येह यथा वाचस्तथा स्त्रियः १४ नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः नांतकः सर्वभूतानां न पुंसां वामलोचनाः
१५ इदमन्यच्च देवर्षे रहस्यं सर्वयोषितां दृष्ट्वैव पुरुषं हृद्यं योनिः प्रक्लिद्यते स्त्रियः १६ कामानामपि दातारं कर्त्तारं मनसां प्रियं रक्षिता
रं न मृष्यंति स्वभर्त्तारमलं स्त्रियः १७ न कामभोगान्विपुलान्नालंकारान्नसंश्रयान् तथैव बहु मन्यंते यथा रत्यामनुग्रहं १८ अंत
कः पवनो मृत्युः पातालं वडवामुखं क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः १९ यतश्च भूतानि महांति पंच यतश्च लोका विहिता विधात्रा यतः
पुमांसः प्रमदाश्च निर्म्मितास्तदैव दोषाः प्रमदासु नारद २ इति दानधर्मे पंचचूडानारदसंवादः ३१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

शकाइत्यर्थः १९ यत इति वह्नेरौष्ण्यवत्स्वाभाविका एते स्त्रीणां दोषा इत्यर्थः यथोक्तं नीतौ अनृतं साहसं माया मूर्खत्वमति लोभिता अशौचं निर्दयत्वं च स्त्रीणां दोषाः स्व
भावजा इति कामश्चाष्टगुणः स्मृत इति च ३० अध्यायः ३१ ॥

राम०
१०९

इमे वै एवंस्वभावदुष्टा अपि स्त्रियः परेभ्यो दुःसंरक्ष्या इत्याख्यापिका तात्पर्यं ९ स्त्रीणामिति स्त्रीबुद्धिमनुसृत्यैव बृहस्पत्यादिभिर्वचनाः शास्त्रं प्रवर्तितमित्य

युधिष्ठिर उ० इमे वै मानवा लोके स्त्रीषु सज्जन्त्यभीक्ष्णशः मोहेन परमाविष्टा दैवसृष्टेन पार्थिव १ स्त्रियश्च पुरुषेष्वेव प्रत्यक्षं लोकसा
क्षिकं अत्र मे संशयस्तीव्रो हृदि संपरिवर्त्तते २ कथमासां नराः संगं कुर्वते कुरुनंदन स्त्रियो वा केषु रज्यन्ते विरज्यन्ते च ताः पुनः ३ इ
ति ताः पुरुषव्याघ्र कथं शक्यास्तु रक्षितुं प्रमदाः पुरुषेणेह तन्मे व्याख्यातुमर्हसि ४ एता हि रममाणास्तु वंचयन्तीह मानवान् न चासां मु
च्यते कश्चित्पुरुषो हस्तमागतः ५ गावो नवतृणानीव गृह्णंत्येता नवं नवं शंबरस्य च या माया या माया या नमुचेरपि ६ बलेः कुंभीनसेश्चै
व सर्वास्ता योषितो विदुः हसंतं प्रहसंत्येता रुदंतं प्ररुदंति च ७ अप्रियं प्रियवाक्यैश्च गृह्णते कालयोगतः उशना वेद यच्छास्त्रं यच्च
वेद बृहस्पतिः ८ स्त्रीबुद्ध्या न विशिष्येते तास्तु रक्ष्याः कथं नरैः अनृतं सत्यमित्याहुः सत्यं चापि तथानृतं ९ इति यास्ताः कथं वी
र संरक्ष्याः पुरुषैरिह स्त्रीणां बुद्ध्यर्थनिष्कर्षादर्थशास्त्राणि शत्रुहन् १० बृहस्पतिप्रभृतिभिर्मन्ये सद्भिः कृतानि वै संपूज्यमानाः
पुरुषैर्विकुर्वंति मनो नृषु ११ अपास्ताश्च तथा राजन्विकुर्वंति मनः स्त्रियः इमाः प्रजा महाबाहो धार्मिका इति नः श्रुतं १२ सत्कृता
सत्कृताश्चापि विकुर्वंति मनः सदा कस्ताः शक्तो रक्षितुं स्यादिति मे संशयो महान् १३ तथा ब्रूहि महाभाग कुरूणां वंशवर्द्धन यदि श
क्या कुरुश्रेष्ठ रक्षा तासां कदाचन कर्तुं वा कृतपूर्वा वा तन्मे व्याख्यातुमर्हसि १४ दानधर्मे विपुलोपाख्याने ३८ ॥ ॥ ॥

युक्तिः १० एताः प्रजेता धिक्कृता वा तुल्यवद्विकारं जनयंतीत्यर्थः ११ एतदेवाह इमा इति इमाः स्त्रीरूपाः धार्मिक्य इति श्रुतिमात्रं सावित्र्यादिषु दृष्टं अनुभवस्तु न तथेत्याह
सत्कृतेति १४ अष्टाध्यायः ३८ ॥

दा० ११० एवमेवेत्सध्यायमसतान्स्पर्यनारूपेम्मोविदेप्मोयोगवलेनैवंस्वभावचपलाः स्त्रियः संक्षितुंशक्यानान्यथेति १६ ॥ ॥

भीष्म उ० एवमेवमहावाहोनात्रमिथ्यास्तिकिंचन यथाब्रवीषिकौरव्यनारीप्रतिजनाधिप १ अत्रतेवर्त्तयिष्यामिइतिहासंपुरातनं
यथारक्षाकृतापूर्वंविपुलेनमहात्मना २ प्रमदाश्चयथासृष्टाब्रह्मणाभरतर्षभ यदर्थंतच्चतेतातप्रवक्ष्यामिनराधिप ३ नहिस्त्रीभ्यः
परंपुत्रपापीयःकिंचिदस्तिवै अग्निर्हिप्रमदादीप्तोमायाश्चमयजाविभो ४ क्षुरधाराविषंसर्पोवह्निरित्येकतःस्त्रियः प्रजाइ
मामहावाहोधार्म्मिकाइतिनःश्रुतं ५ स्वयंगच्छंतिदेवत्वंततोदेवानियान्द्रयं अथाभ्यगच्छन्देवास्तेपितामहमरिंदमः ६ नि
वेद्यमानसंचापितूष्णींतास्तन्नधोमुखाः तेषामंतर्गतंज्ञात्वादेवानांसपितामहः ७ मानवानांप्रमोहार्थंकृत्यानार्योसृजत्प्रभुः
पूर्वसर्गेतुकौन्तेयसाध्वीनार्य्यइहाभवन् ८ असाध्व्यस्तुसमुत्पन्नाःकृत्यासर्गात्प्रजापतेः ताभ्यःकामान्यथाकामंप्रादाद्धिस
पितामहः ९ ताःकामलुब्धाःप्रमदाःप्रवाधंतेनरान्सदा क्रोधंकामस्यदेवेशःसहायंचासृजत्प्रभुः १० असज्जंतप्रजाःस
र्वाःकामक्रोधवशंगताः नचस्त्रीणांक्रियाकाचिदितिधर्म्मोव्यवस्थितः ११ निरिंद्रियाह्यमंत्राश्चस्त्रियोनृतमितिश्रुतिः
शय्यासनमलंकारमन्नपानमनार्य्यतां १२ दुर्वाग्भावंरतिंचैवददौस्त्रीभ्यःप्रजापतिः नतासांरक्षणंशक्यंकर्त्तुंपुंसाकथंचन
१३ अपिविश्वकृतातातकुतस्तुपुरुषैरिह वाचावावधवंधैर्वाक्लेशैर्वाविविधैस्तथा १४ नशक्यारक्षितुंनार्य्यस्ताहिनित्य
मसंयताः इदंचपुरुषव्याघ्रपुरस्तात्कृतवानहं १५ यथारक्षाकृतापूर्वंविपुलेनगुरुस्त्रियः ऋषिरासीन्महाभागोदेवशर्मेति राम० ११०
विश्रुतः १६ ॥

तस्यभार्यारुचिर्नामरूपेणासदृशीभुवि तस्यारूपेणसंमत्तादेवगंधर्वदानवाः १७ विशेषेणतुराजेंद्रवृत्रहापाकशासनः नारीणांचरितज्ञश्चदेव
शर्म्मामहामुनिः १८ यथाशक्तियथोत्साहंभार्यातामभ्यरक्षत पुरंदरंचजानीतेपरस्त्रीकामचारिणं तस्माद्यत्नेनभार्यायारक्षणंसचकारह
१९ सकदाचिदृषिस्तातयज्ञंकर्तुंमनास्तदा भार्यासंरक्षणंकार्यंकथंस्यादित्यचिंतयत् २० रक्षाविधानंमनसासचिंत्यमहातपाः
आहूयदयितंशिष्यंविपुलंप्राहभार्गवं २१ देवशर्म्मोवाच यज्ञकारोगमिष्यामिरुचिंचेमांसुरेश्वरः यतःप्रार्थयतेनित्यंतांरक्षस्वयथाबलं
२२ अप्रमत्तेनतेभाव्यंसदाप्रतिपुरंदरं सहिरूपाणिकुरुतेविविधानिभृगूत्तम २३ भीष्मउ० इत्युक्तोविपुलस्तेनतपस्वीनियतेंद्रियः स
दैवोग्रतपाराजन्नग्न्यर्कसदृशद्युतिः २४ धर्म्मज्ञःसत्यवादीचतथेतिप्रत्यभाषत पुनश्चेदंमहाराजपप्रच्छप्रस्थितंगुरुं २५ विपुलउ०
कानिरूपाणिशक्रस्यभवंत्यागच्छतोमुने वपुस्तेजश्चकीदृग्वैतन्मेव्याख्यातुमर्हसि २६ भीष्मउ० ततस्सभगवांस्तस्मैविपुलायम
हात्मने आचचक्षेयथातत्वंमायांशक्रस्यभारत २७ देवशर्म्मोवाच बहुमायःसविप्रर्षेभगवान्पाकशासनः तांस्तान्विकुरुतेभावा
न्बहून्यथमुहुर्मुहुः २८ किरीटीवज्रधृग्धन्वीमुकुटीबद्धकुंडलः भवत्यथमुहूर्तेनचंडालसमदर्शनः २९ शिखीजटीचीरवासाःपुन
र्भवतिपुत्रक बृहच्छरीरश्चपुनश्चीरवासाःपुनःकृशः ३० गौरंश्यामंचकृष्णंचवर्णंविकुरुतेपुनः विरूपोरूपवांश्चैवयुवावृद्धस्तथैव
च ३१ प्रतिलोमानुलोमश्चभवत्यथशतक्रतुः शुकवायसरूपीचहंसकोकिलरूपवान् ३२ सिंहव्याघ्रगजानांचरूपंधारयतेपुनः
दैवंदैत्यमथोराज्ञांवपुर्द्धारयतेपिच ३३ अकृशोवायुभग्नांगःशकुनिर्विकृतस्तथा चतुष्पाद्बहुरूपश्चपुनर्भवतिबालिशः ३४ मक्षि

द्रा०
१११

कामशक्रादीनांवपुर्धरिपतेपिच नशक्यमस्यग्रहणंकर्त्तुंविपुलकेनचित् ३५ अपिविश्वकृतातातयेनसृष्टमिदंजगत् पुनरन्तर्हितःश
क्रोदृश्यतेज्ञानचक्षुषा ३६ वायुभूतश्चसपुनर्देवराजोभवत्युत एवंरूपाणिसततंकुरुतेपाकशासनः ३७ तस्माद्विपुलयत्नेनरक्षेयंतनु
मध्यमा यथारुचिंनावलिहेद्देवेंद्रोध्वरगुसत्तम कृतावुपहितंन्यस्तंहविःश्ववदुरात्मवान् ३८ एवमाख्यायसमुनिर्यस्तकोरागमत्तदा
देवशर्मामहाभागस्ततोभरतसत्तम ३९ विपुलस्तुवचःश्रुत्वागुरोस्त्विंतामुपेयिवान् रक्षांचपरमांचक्रेदेवराज्ञान्महावलात् ४० किं
नुशक्यमयाकर्त्तुंगुरुदाराभिरक्षणे मायावीहिसुरेंद्रोसौदुर्धर्षश्चापिवीर्यवान् ४१ नापिधायाश्रमंशक्योरक्षितुंपाकशासनः उट
जंवातथाह्यस्यनानाविधसरूपता ४२ वायुरूपेणवाशक्रोगुरुपत्नींप्रधर्षयेत् तस्मादिमांसंप्रविश्यरुचिंस्थास्येहमद्यवै ४३
अथवापौरुषेणेयंनशक्यारक्षितुंमया वहुरूपोहिभगवाञ्छ्रूयतेपाकशासनः ४४ सोहंयोगवलादेनांरक्षिष्येपाकशासनात्
गात्राणिगात्रैरस्याहंसंप्रवेक्ष्येभिरक्षितुं ४५ यद्युच्छिष्टामिमांपत्नीमद्यपश्यतिमेगुरुः शप्स्यत्यसंशयंकोपाद्दिव्यज्ञानोमहातपाः
४६ नचेयंरक्षितुंशक्यायथान्याप्रमदानृभिः मायावीहिसुरेंद्रोसावहोप्राप्तोस्मिसंशयं ४७ अवश्यकरणीयंहिगुरोरिहहिशा
सनं यदिलेनदहंकुर्यामाश्चर्यंस्यात्कृतंमया ४८ योगेनानुप्रवेशोहिगुरुपत्न्याःकलेवरे असक्तःपद्मपत्रस्थोजलविंदुर्यथाचलः
४९ ॥ ॥

५१

राम०
१११

अध्यायः ३९ ततःकदाचित् १ २ ३ ४ ५ ६ ७ ८

म

निर्मुक्तसर्वदोषोऽहमन्यापराधोभवेन्मम मयाहिशून्यंपाथिकःसभामध्यावसेत्तथा ५० तथायथावासपि
ष्यामिगुरुपत्न्याःकलेवरं एवमेवशरीरस्थानिवत्स्यामिसमाहितः ५१ इत्येवंधर्म्ममालोक्यवेदवेदांश्चसर्वशः त
पश्चविपुलंदृष्ट्वागुरोरात्मानमेवच ५२ इतिनिश्चित्यमनसारक्षांप्रतिसभार्गवः अन्वतिष्ठत्परंयत्नंयथात
च्छृणुपार्थिव ५३ गुरुपत्नींसमासीनोविपुलःसमहातपाः उपासीनामनिंद्यांगींयथार्थेःसमलोभयत् ५४
नेत्राभ्यांनेत्रयोरस्यारश्मिंसंयोज्यरश्मिभिः विवेशविपुलःकायमाकाशंपवनोयथा ५५ लक्षणंलक्षणे
नैववदनंवदनेनच अविचेष्टन्नतिष्ठद्वैछायेवांतर्हितोमुनिः ५६ ततोविष्टभ्यविपुलोगुरुपत्न्याःकलेवरं उवासरक्षणेयुक्तो
नचसातमबुध्यत ५७ यंकालंनागतोराजन्गुरुस्तस्यमहात्मनः क्रतुंसमाप्यस्वगृहंतंकालंसोभ्यरक्षत ५८ इतिदानध
र्मेविपुलोपाख्याने ३९ भीष्मउ० ततःकदाचिद्देवेंद्रोदिव्यरूपवपुर्धरः इदमंतरमित्येवमभ्यगात्तमथाश्रमं १ रूपमप्रतिमंकृत्वा
लोभनीयंजनाधिप दर्शनीयतमोभूत्वाप्रविवेशतमाश्रमं २ सददर्शतमासीनंविपुलस्यकलेवरं निश्चेष्टंस्तब्धनयनंयथा
लेख्यागतंयथा ३ रुचिंचरुचिरापांगींपीनश्रोणिपयोधरां पद्मपत्रविशालाक्षींसंपूर्णेंदुनिभाननां ४ सातमालोक्यसहसाभ्य
त्तुत्थातुमियेषह रूपेणविस्मिताकोसीत्यथवक्तुमिवेच्छती ५ उत्थातुकामातुसतीविष्टब्धाविपुलेनसा निगृहीतामनुष्येंद्रनश
शाकविचेष्टितुं ६ तामाबभाषेदेवेंद्रःसाम्नापरमवल्गुना त्वदर्थमागतंविद्धिदेवेंद्रंमांशुचिस्मिते ७ क्लिश्यमानमनंगेनत्वत्संकल्पमेव

॥ ८ [illegible] ॥

तमेववादिनंशक्रंसुश्रावविपुलोमुनिः गुरुपत्न्याःशरीरस्थोददर्शत्रिदशाधिपं ९ नशशाकचसाराजन्प्रत्युत्थातुमनिंदिता वक्तुंचना
शकद्राजन्विष्टब्धाविपुलेनसा १० आकारंगुरुपत्न्यास्तुसविज्ञायभृगूद्वहः निजग्राहमहातेजायोगेनबलवत्प्रभो ११ बबंधयोगबंधैश्च
तस्याःसर्वेंद्रियाणिसः तांनिर्विकारांदृष्ट्वातुपुनरेवशचीपतिः १२ उवाचव्रीडितोराजंस्तांयोगबलमोहितां एह्येहीतिततःसातुप्रतिवक्तुमियेष
षतं १३ सतांवाचंगुरोःपत्न्याविपुलःपर्यवर्तयत भोःकिमागमनेकृत्यमितितस्यास्तुनिःसृता १४ वक्त्राच्छशांकसदृशाद्वाणीसंस्का
रभूषणा व्रीडितासातुतद्वाक्यमुक्त्वापरवशातदा १५ पुरंदरश्चतत्रस्थोबभूवविमनाभृशं सतद्वैकृतमालक्ष्यदेवराजोविशांपते १६
अवैक्षततसहस्राक्षस्तदादिव्येनचक्षुषा सददर्शमुनिंतस्याःशरीरांतरगोचरं १७ प्रतिबिंबमिवादर्शेगुरुपत्न्याःशरीरगं सतंघोरेणतपसा
युक्तंदृष्ट्वापुरंदरः १८ प्रावेपतसुसंत्रस्तःशापभीतस्तदाविभो विमुच्यगुरुपत्नींतुविपुलःसुमहातपाः सकलेवरमाविश्यशक्रंभीत
मथाब्रवीत् १९ विपुलउवाच अजितेंद्रियदुर्बुद्धेपापात्मकपुरंदर नचिरंपूजयिष्यंतिदेवास्त्वांमानुषास्तथा २० किंनुतद्विस्मृतंतेश
क्रनतन्मनसितेस्थितं गौतमेनासियन्मुक्तोभगांकपरिचिह्नितः २१ जानेत्वांबालिशमतिमकृतात्मानमस्थिरं मयेयंरक्ष्यतेमूढ
गच्छपापयथागतं २२ नाहंत्वामद्यमूढात्मन्दहेयंहिस्वतेजसा कृपायमानस्तुनतेदग्धुमिच्छामिवासव २३ सचघोरतमोधीमान्
गुरुस्त्वांपापचेतसं दृष्ट्वात्वांनिर्दहेदद्यक्रोधदीप्तेनचक्षुषा २४ नैवंतुशक्रकर्तव्यंपुनर्मान्याश्चतेद्विजाः मागमःससुतामात्योत्ययं
ब्रह्मबलार्दितः २५ ॥ ॥ ॥

३६ अध्यायः ७० विपुलस्त्वित्यध्यायद्वयस्यतात्पर्यंपद्मपत्रांबुवदसंगस्यापियोगिनोमातुरपिस्पर्शमात्राद्दोषोभवतीति गुरावप्युक्तमपिकर्मनिवेदन

अपरोस्मीतियद्बुद्धिंसमास्थायप्रवर्त्तसे मावमंस्थाननतपसामसाध्यंनामकिंचन १६ भीष्मउ० तच्छ्रुत्वावचनंशक्रोविपुलस्य
महात्मनः अकिंचिदुक्त्वाव्रीडार्त्तस्तत्रैवान्तरधीयत १७ मुहूर्त्तेयातेतस्मिंस्तुदेवशर्मामहातपाः कृत्वायज्ञंयथाकाममाज
गामस्वमाश्रमं १८ आगतेथगुरौराजन्विपुलःप्रियकर्मकृत् रक्षितांगुरवेभार्यांन्यवेदयदनिंदितां १९ अभिवाद्यचशां
तात्मासगुरुंगुरुवत्सलः विपुलःपर्युपातिष्ठद्यथापूर्वमशंकितः २० विश्रांतायततस्तस्मैसहासीनायभार्यया निवेदयामा
सतदाविपुलःशक्रकर्मतत् २१ तच्छ्रुत्वासमुनिश्रेष्ठोविपुलस्यप्रतापवान् बभूवशीलवृत्ताभ्यांतपसानियमेनच २२
विपुलस्यगुरौवृत्तिंभक्तिमात्मनितत्प्रभुः धर्मेचस्थिरतांदृष्ट्वासाधुसाध्वित्यभाषत २३ प्रतिलभ्यचधर्मात्माशिष्यंधर्म
परायणं वरेणच्छंदयामाससदेवशर्मामहामतिः २४ स्थितिंचधर्मेजग्राहसतस्माद्गुरुवत्सलः अनुज्ञातश्चगुरुणाचचा
रानुत्तमंतपः २५ तथैवदेवशर्मापिसभार्यःसमहातपाः निर्भयोवलवृत्रघ्नाच्चचारविजनेवने २६ इतिदानधर्मेविपुलोपा
ख्याने ७० भीष्मउवाच विपुलस्त्वकरोत्तीव्रंतपःकृत्वागुरोर्वचः तपोयुक्तमथात्मानममन्यतसवीर्यवान् १ सतेनकर्म
णास्पर्द्धन्पृथिवींपृथिवी पतेचचारगतभीःप्रीतोलब्धकीर्त्तिर्वरोनृप २ उभौलोकौजितौचापितथैवामन्यतप्रभुः कर्मणा
तेनकौरव्यतपसाविपुलेनच ३ अथकालेव्यतिक्रांतेकस्मिंश्चित्कुरुनंदन रुच्याभगिन्याआदानंप्रभूतधनधान्यवत् ४ ए
तस्मिन्नेवकालेतुदिव्याकाचिद्वरांगना बिभ्रतीपरमंरूपंजगामाथविहायसा ५ तस्याःशरीरात्पुष्पाणिपतितानिमहीतले तस्मा

स्यातथ्यामितिच ३ आदीयतेऽस्मिन्वाचवैर्दत्तंउपायनादिकंसआदानंविवाहाद्युत्सवःप्रभूतंबहुधनादिकंयत्र ६ ॥ ॥ ॥ ॥

रा० निमंत्रकः आकरणार्थदूतः ६ चोदयामासमदर्थमप्येतानिपुष्पाणिआनायेपेतिप्रेरितवती १६ परिवर्त्तनमितिपुंस्त्वंतद् भावस्वार्थः १७ तस्मदेहतरस्य
११३ देयासुषुप्ते आकर्षणेनविवर्त्तयन्विषमत्वंनयन् १८ नेतिनेतिअन्योन्यवचनंदूषयंतौविसर्पः अयंभावःमिथुनस्यैकैशीघ्रंगच्छंतीरात्रिंत्र

तामगच्छत्ततोराजन्नुचिन्मीलितलोचना तदानिमंत्रकस्तस्याआगेम्पःक्षिप्रमागमत् ७ तस्याहिभगिनीतातज्येष्ठानाम्नाप्रभा
वतीभामिनीचित्ररथस्यसाप्यवभूवांगेश्वरस्यवै ८ पिनद्धानिपुष्पाणिकेशेषुवरवर्णिनी आमंत्रितातततोगच्छत्तु चिरंगयतेर्गृहं
९ पुष्पाणितानिदृष्ट्वातुतदांगेंद्रवरांगना भगिनीचोदयामासपुष्पार्थेचारुलोचना १० साभर्त्रेसर्वमाचष्टरुचिःसुरुचिरानना
भगिन्याभावितंसर्वमन्वेषितस्याग्रमनंदन ११ ततोविपुलमानाय्यदेवशर्मामहातपाः पुष्पार्थेचोदयामासगच्छगच्छेतिभारत १२ विपुल
स्तुगुरोर्वाक्यमविचार्यमहातपाः सतथेत्यब्रवीद्राजंस्तंचदेवंजगामह १३ यस्मिन्देशेतुतान्यासन्पतितानिनभस्तलात् अम्ला
नान्यपितत्रासन्कुसुमान्यपराण्यपि १४ सततस्तानिजग्राहदिव्यानिरुचिराणिच प्राप्तानिस्वेनतपसादिव्यगंधानिभारत १५ सं
प्राप्यतानिप्रीतात्मागुरोर्वचनकारकः तदाजगामतूर्णंचचंपांचंपकमालिनीं १६ सवनेनिर्जनेतातददर्शमिथुनंनृणां चक्रव
त्परिवर्त्ततंगृहीत्वापाणिनाकरं १७ तत्रैकस्तूर्णमगमत्तत्पदंचविवर्त्तयत् एकस्तुननदाराजन्नप्यक्रतुःकलहंततः १८ त्वंशीघ्रं
गच्छसीत्येकोब्रवीन्नेतितथापरः नेतिनेतिचतौराजनपरस्परमथोचतुः १९ ॥

हेदेविताशीघ्रंगच्छसीतिलोकद्वयापर्यनुयुक्ते रात्रिस्तुसमानेनैवाद्धंगच्छामिनशीघ्रमितिपरिहरति एवंउभावपिसमयादिनोनानृतंशपथंचक्रतुरिति

१९ रा०
११३

अयंमिथुनस्यपरिश्रमः कष्टश्चायंगतिरनिष्टेतिसार्द्धः २४ षड्ऋतवो दीव्यमानानन्योन्यंजेतुमिच्छंतः वसंतादयोहिद्विपादीन्मासराशीनभिसंधायायंमंदी
योयंमंदीयइतिविवदंते तेपिमतभेदान्नानृतवादिनः मीनादिर्वसंतइतिपक्षेहिद्विपोयोग्रीष्मांतर्गतः मेषादिपक्षेवसंतांतर्गतइति २८ रुच्याः गुरुभार्यायाः २९

तयोर्विसृष्टयोरेवंशपथ्योपमभ्यतदा सहसोद्दिश्यविपुलंततोवाक्यमथोचतुः २० आवयोरनृतंप्राहयस्तस्याभूत्द्विजस्यवै विपुलस्य
परेलोकेयागतिःसाभवेदिति २१ एतछ्रुत्वातुविपुलोविषण्णवदनोभवत् एवंतीव्रतपाश्चाहंकष्टश्चायंपरिश्रमः २२ मिथुनस्यास्य
किंमेस्यात्कृतंपापंययागतिः अनिष्टासर्वभूतानांकीर्तितानेनमेघवे २३ एवंसंचिंतयन्नेवविपुलोराजसत्तम अवाङ्मुखोदी
नमनादध्यौदुष्कृतमात्मनः २४ ततःषडन्यान्पुरुषानक्षैःकांचनराजतैः अपश्यद्दीव्यमानान्वैलोभहर्षान्वितांस्तथा २५
कुर्वतःशपथंतेनयःकृतोमिथुनेनतु विपुलंवैसमुद्दिश्यतेपिवाक्यमथाब्रुवन् २६ लोभमास्थाययोस्माकंविषमंकर्तु
मुत्सहेत् विपुलस्यपरेलोकेयागतिस्तामवाप्नुयात् २७ एतछ्रुत्वातुविपुलोनापश्यद्धर्मसंकरं जन्मप्रभृतिकौरव्यकृ
तपूर्वमथात्मनः २८ संप्रदध्यौतथाराजन्नग्नावग्निरिवाहितः दह्यमानेनमनसाशापंश्रुत्वातथाविधं २९ तस्यचिंतयत
स्तातवह्व्योदिननिशाययुः इदमासीन्मनसिचरुच्यारक्षणकारितं ३० लक्षणंलक्षणेनैववदनंवदनेनच विधाय
नमयाचोक्तंसत्यमेतद्गुरोस्तथा ३१ एतदात्मनिकौरव्यदुष्कृतंविपुलस्तदा अमन्यतमहाभागतथातच्चनसंशयः ३२ स
चंपांनगरीमेत्यपुष्पाणिगुरवेददौ पूजयामासचगुरुंविधिवत्सगुरुप्रियः ३३ इतिदानधर्मेविपुलोपाख्याने ४१॥

लक्षणस्त्रीपुंसयोरसाधारणंचिह्नं विधायएकीकृत्यपिधायेतिपाठेपिसएवार्थः ३२ विपुलोपाख्याने २ ४१ ॥ ॥ ॥ ॥ ४१ ॥ ॥

द्रा०
११४

तमागतमित्यध्यायेन पूर्वोक्तार्थविवरणपूर्वकं आरब्धाधिकार्थमुपसंहरति १ तेत्वया १० हर्षस्मितं हर्षेणागर्वितं ११ तेनैव चाख्यानेनैव १२ अ
भीष्म उ० तमागतमभिप्रेक्ष्य शिष्यं वाक्यमथाब्रवीत् देवशर्म्मा महातेजा यत्तच्छृणु जनाधिप १ देवशर्म्मो उ० किं ते विपुल दृष्टं
वै तस्मिन् शिष्य महावने ते त्वां जानंति विपुल आत्मा च रुचिरेव च २ विपुल उ० ब्रह्मर्षे मिथुनं किं तत् के च ते पुरुषा विभो ये मां
जानंति तत्त्वेन यन्मां त्वं परिपृच्छसि --- ३ देवशर्म्मोवाच यदेतन्मिथुनं ब्रह्मन्नहोरात्रं हि विद्धि तत् चक्रवत्परिवर्त्तेते तत्ते जा
नाति दुष्कृतं ४ ये च ते पुरुषा विप्र अक्षैर्दीव्यंति हृष्टवत् ऋतूंस्तानभिजानीहि ते ते जानंति दुष्कृतं ५ न मां कश्चिद्विजानीत इति कृ
त्वा न विश्वसेत् नरो रहसि पापात्मा पापकं कर्म्म वै द्विज ६ कुर्वाणं हि नरं कर्म्म पापं रहसि सर्वदा पश्यंति ऋतवश्चापि तथा दिव
निशे पुनः ७ ते ये वहि भवेयुस्ते लोकाः पापकृतो यथा कृत्वा नाचक्षतः कर्म्म मम तच्च यथाकृतं ८ ते त्वां हर्षस्मितं दृष्ट्वा गु
रोः कर्म्मानिवेदकं स्मारयंतस्तथा प्राहुस्ते यथा स्मृतवाननुभवान् ९ अहोरात्रं विजानाति ऋतवश्चापि नित्यशः पुरुषे पापकं
कर्म्म शुभं वा शुभकर्म्मिणः --- १० तत्त्वया मम यत्कर्म व्यभिचारात्तथा यात्मकं नाख्यातमिति जानंतस्ते त्वामाहुस्तथा द्वि
ज ११ तेनैव हि भवेयुस्ते लोकाः पापकृतो यथा कृत्वा नाचक्षतः कर्म्म मम यच्च त्वया कृतं १२ तथा शक्याच दुर्वृत्ता रक्षितुं मम
द्विज न च त्वं कृतवान् किंचिदतः प्रीतोस्मि ते न ते १३ यदि त्वहं त्वां दुर्वृत्तां मद्भार्यां द्विजसत्तम शपेयं त्वामहं क्रोधान्न मे त्रासि
विवारणा १४ सज्जंति पुरुषे नार्यः पुमांसो यश्च पुष्कलः अन्यथा रक्षतः शापो भविष्यन्ते मतिर्मम १५ ॥ ॥ ॥ ॥

शकुंतिच्छेदः श्रीरामजयजय श्रीकृष्णजय ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम०
११४

रक्षूरैः
पाणिपादोरस्वादिभिः २२ यः संगमेतिसरः वप्रियोन्यः प्रियोनामनास्तीतियोजना २३ कृत्याः अणग्राहिदेवतारूपाः कार्याः कृताश्चपूर्वमेकेनकृताःस्त्री
कृताअपियस्मादन्येनापिकर्तुंयोग्याः व्यभिचारिण्यः आराग्राहिण्यश्चेत्यर्थः २७ खेदमास्थायअप्रीत्याविष्टोगृहीतवतत्तुंतीननतुप्रीत्याधर्मंकातुका

रक्षिताचत्वयापुत्रममचापिनिवेदिता अहंतेप्रीतिमांस्तातस्वस्त्यःस्वर्गंगमिष्यमि १६ इत्युक्त्वाविपुलंप्रीतोदेवशर्मामहान्रुषिः मुमोदस्वर्गमास्थायसहभार्यःसशिष्यकः १७ इदमाख्यातवांश्चापिममाख्यानेमहामुनिः मार्कंडेयः पुराराजनगंगा
कूलेकथांतरे १८ तस्माद्ब्रवीमिपार्थत्वांस्त्रियःसर्वाःसदैवच उभयंदृश्यतेतासु सततंसाध्वसाधुच १९ स्त्रियःसाध्व्योमहा
भागाःसमंताल्लोकमातरः धारयंतिमहींराजन्निमांसवनकाननां २० असाध्व्यश्चापिदुर्वृत्ताःकुलघ्नाःपापनिश्चयाः विज्ञेयाल
क्षणैर्दुष्टैःस्वगात्रसहजैर्नृप २१ एवमेताःसुरक्ष्यावैशक्याःकर्तुंमहात्मभिः अन्यथाराजशार्दूलनशक्यारक्षितुंस्त्रियः २२
एताहिमनुजव्याघ्रतीक्ष्णास्तीक्ष्णपराक्रमाः नासामस्तिप्रियोनामनैथुनेसंगमेतियः २३ एताःकृत्याश्चकार्याश्चकृताश्चभर
तर्षभ नचैकस्मिन्रमंत्येताःपुरुषेपांडुनंदन २४ नासांस्नेहोनरैःकार्यस्तथैवेर्ष्याजनेश्वर खेदमास्थायभुंजीतधर्ममास्था
यचैवह २५ निघ्नन्नादन्यथाकुर्वन्नरःकौरवनंदन सर्वथाराजशार्दूलयुक्तिःसर्वत्रपूज्यते २६ तेनैकेनतुरक्षावैविपुलेन
कृतास्त्रियः नान्यःशक्तस्त्रिलोकेस्मिन्रक्षितुंनृपयोषितं २७ इत्यनुशासनिकेपर्वणिदानधर्मेविपुलोपाख्यानंसमाप्तं ॥

तावुरोवं २५ निघ्नन्नानवधप्राप्नुघातमुक्तिः अनासक्तिःयुक्तिरितिपाठेसमाधिः २७ अध्यायः ४२ ॥ छ ॥ ॥ ॥ ॥

दा॰ यन्मूलं २ योनिंमातृतःपितृतश्चशुद्धिं अत्रब्राह्मइत्यनेनार्षदैवयोरपिग्रहणंब्राह्मणयोग्यत्वाएतेविवाहःपरहाश्वलायनः अलंकृत्यकन्यामुदक
११५ पूर्वीदद्यादेषब्राह्मोविवाहः आत्विजेतत्वितंतेकर्मणिदद्यादलंकृत्यसदैवः गोमिथुनेदत्वापयच्छतसआर्षइति ३ एवउक्तगुणवंतआवाह्यंविवाहयो
ग्यंआवहेत्आकारयेततत्तश्च अनुकूलतः धनदानादिनाअभिमुखीकृतायदद्यात अयंचतुर्थः प्राजापत्यःब्राह्मणानांक्षत्रियाणांचप्रशस्ततरः

युधिष्ठिरउ॰ यन्मूलंसर्वधर्म्माणांस्वजनस्यगृहस्यच पितृदेवातिथीनांचतन्मेब्रूहिपितामह १ अयंहिसर्वधर्म्माणांधर्म्म
श्चिंत्यतमोमतः कीदृशस्यप्रदेयास्यात्कन्येतिवसुधाधिप २ भीष्मउ॰ शीलवृत्तेसमाज्ञायविद्यांयोनिंचकर्म्मच सद्भिरेवं
प्रदातव्याकन्यागुणयुतेवरे ब्राह्मणानांसतामेषप्रोक्तोधर्म्मोयुधिष्ठिर ३ आवाह्यमावहेदेवंयोदद्यादनुकूलतः शिष्टानां
क्षत्रियाणांचधर्म्मएषःसनातनः ४ आत्माभिप्रेतमुत्सृज्यकन्याभिप्रेतएवयः अभिप्रेताचयायस्यतस्मैदेयायुधि
ष्ठिर ५ गांधर्वमितितंधर्म्मप्राहुर्वेदविदोजनाः धनेनबहुधाक्रीत्वासंप्रलोभ्यचबांधवान् ६ असुराणांन्टपैतंवैधर्म्म
माहुर्मनीषिणः हत्वाछित्वाचशीर्षाणिरुदतांरुदतींगृहात् ७ प्रसह्यहरणंतातराक्षसोविधिरुच्यते पंचानांतुत्रयोध
र्म्माद्वावधर्मौयुधिष्ठिर ॥ ८ ॥

द्वितीयत्वेनात्रगणयते ४ वरस्यस्त्रोरन्योन्यप्रेम्णायोविवाहःसगांधर्वस्तृतीयःसार्धश्लोकः ५ आसुंचतुर्थमाहधनेनेति ६ हत्वेतिराक्षसः दान॰
पंचमः अत्रैवप्रमत्तानांवधूनांकन्याहरणात्पैशाचोहरणसामान्यादंतर्भवति ७ त्रयःब्राह्मक्षात्रेगांधर्वीःदैवआसुरराक्षसौतत्रापिआसु ११५
रःस्वरूपणराक्षसांतर्गतःपैशाचश्चातंतवकर्त्तव्यो अर्थात्राक्षसःकर्त्तव्यःक्षत्रियाणामित्यर्थः ८

दमयंतीस्वयंवरोब्राह्मक्षात्रयोर्मिश्रत्वं रुक्मिण्याविवाहे राक्षसगांधर्वमिश्रः सुभद्रायास्तुक्षात्रराक्षसमिश्र इत्यागूह्यं ९ तिस्रइतिसर्वेषांशूद्राव
र्ज्याइतरयोरुत्कृष्टवर्णाचववर्ज्येतिज्ञेयं १० वैश्यस्यत्वेकैवभार्येतिसेवश्रेष्ठा उक्ताभ्योऽधिकाशूद्रापिचतुर्णामपिस्यात्सा चरत्यर्थमेव नतु धर्मप्रजार्थं अप
रेयाज्ञवल्क्यादयोनेत्याहुः यथाह यदुच्यते द्विजातीनांशूद्राद्दारोपसंग्रहः नैतन्ममतं यस्मात्तत्रात्माजायते स्फुटमितितदुक्तेः १२ स्वमतंतिस्र

पैशाचश्चासुरश्चैव नकर्त्तव्यौकथंचन ब्राह्मःक्षात्रोथगांधर्वः एतेधर्म्मानरर्षभ ९ पृथग्वायदिवामिश्राःकर्त्तव्यानात्रसंश
यः तिस्रोभार्याब्राह्मणस्यद्वेभार्येक्षत्रियस्यतु १० वैश्यःस्वजात्यांविंदेततास्वपत्यंसमंभवेत् ब्राह्मणीतुभवेज्ज्येष्ठाक्षत्रियाक्ष
त्रियस्यतु ११ रत्यर्थमपिशूद्रास्यान्नेत्याहुरपरेजनाः अपत्यजन्मशूद्रायांनप्रशंसंतिसाधवः १२ शूद्रायांजनयन्विप्रःप्रायश्चित्ती
विधीयते त्रिंशद्वर्षोदशवर्षांभार्यांविंदेतनग्निकां १३ एकविंशतिवर्षोवासप्तवर्षामवाप्नुयात् यस्यास्तुनभवेद्भ्रातापितावा
वाभरतर्षभ १४ नोपयच्छेतताञ्जातुपुत्रिकाधर्मिणीहिसा त्रीणिवर्षाण्युदीक्षेतकन्याऋतुमतीसती १५ चतुर्थेत्वथ
संप्राप्तेस्वयंभर्त्तारमर्ज्जयेत् प्रजानहीयतेतस्यारतिश्चभरतर्षभ अतोन्यथावर्त्तमानाभवेद्वाच्याप्रजापतेः १६ ॥ ॥

इत्यत्रसूचितंस्फुटीकरोतित्रिस्रइति १२ नग्निकाएकवाससंत्रज्ञाताक्षीव्यंजनामितियावत्तथैःस्यादेकवासाइतिस्मृतिः यस्मादशमेपिवर्षेकुचो
द्भेदस्तस्यानिषेधार्थमेतद्विशेषणं १३ पुत्रिकाधर्मिणीहिसाइत्यत्रपुत्रिकाधर्मशंकयेतिमनुः पपाठयस्याःपिताह्यमेवदुहितामपुत्रस्यानेदृश्याभि
प्रायवान्नचेतिनत्वामेतांचापयच्छेदितितद्भावात्तारः १५ वाच्यानिंद्याभवेत् १६ ॥

रव्या१

दा०
११६

असपिंडेति अत्रचकारद्वयादुभयमुभयत्रानुषज्य व्याचक्षते यामातुरसपिंडा असगोत्रा चेति केचित् अन्येतु एकत्वं सागता भर्त्तुः पिंडगोत्रे च सूतके इति
वचनात् भ्रातुर्गोत्रांतरभावात् यामातुरसपिंडा इत्येव ग्राह्यं न त्वत्रापि असगोत्रेति विशेषणं योज्यमिति अन्ये तु यस्याः माता स्वपित्रा पुत्रत्वेन कल्पिता तां
स्यां मातुरस्य गोत्रत्वविवक्षया एतद्व्याख्यानमिति तत्र सापिंड्यनिवृत्तिसंग्रहश्लोकः बध्वावरस्य वा तातः कूटस्थाद्यदि सप्तमः पंचमी चेत्तयोर्माता तत्सा ४
पिंड्यं निवर्त्तत इति असगोत्रामित्यत्र असमानार्षगोत्रामिति दृष्टव्यं असमानार्षगोत्रजामिति स्मृतेः आर्षविषये प्रतिप्रसवश्च स्मर्यते पंचानां त्रिषु
सामान्यादविवाहस्त्रिषु द्वयोः भृग्वंगिरोगणेष्वेव शेषेष्वेकोपि वारयेदिति अनुगच्छेत विवाहमनु मैथुनाय एतां मे वगच्छेत् एतेनास्य श्लोकस्य मनुपठि
तं उत्तरार्द्धं सा प्रशस्ता द्विजातीनां दारे कर्मणि मैथुने इति तद्व्याख्यातं अत्र मातृपितृसंबंधात् सवर्णा च दारकर्मणि यता द्वैमैथुने च प्रशस्ता एव सति

असपिंडा च या मातुरसगोत्रा च या पितुः इत्येतामनुगच्छेत तं धर्म्मं मनुरब्रवीत् १७ युधिष्ठिर उ० शुल्कमन्येन दत्तं स्याद्ददा
मीत्याह चापरः बलाद्न्यः प्रभाषेत धनमन्यः प्रदर्शयेत् १८ पाणिगृहीता चान्यः स्यात्कस्य भार्या पितामह तत्वं जिज्ञासमाना
नां चक्षुर्भवतु नो भवान् १९ भीष्म उ० यत्किंचित्कर्म्म मानुष्यं संस्थानाय प्रदृश्यते मंत्रवन्मंत्रितं तत्स्यान्मृषावादस्तु पातकः २०

पुनर्मैथुनग्रहणं स्मृत्यंतरे दृष्टार्थत्वान्मैथुने स्मृत्यंतं सर्वासां साधारणं पनिवर्त्तितुं मैथुनेपि यत्वाद्वाविचसवर्णो विमुखानंतु तस्या इतरस्या वारणमिति
एतदेवाभिसंधाया त्रोक्तं इत्येतामनुगच्छेतेति येतुमिथुनस्य पृथग्ग्रहणाद्दारकर्म परेन तद्व्यतिरिक्ते पश्चाद्वा एव सवर्णायाः प्राधान्यं मैथुने त्वितर
साधारणमिति व्याचक्षते तदनेन विरुध्यते हीनवर्णायां जातस्याप्येनोपि हीनत्वापत्तेश्च तत्रात्माजायते स्वयमिति वचनात् १७ शु
ल्कमिति पंचानां पृच्छा णामुपन्यासः १९ तत्र तत्रापि चतुर्थ्यां दातुर्न दोषाद्वृहीविसुपेक्ष्यादितीयेभार्यात्वानुसन्निवन्ध दोषमात्रं चाहयत्किंचिदिति
मानुष्यं मानुषाणां हितं सांबंधिकं संस्थिना पश्यमेस भार्येत्यादि व्यवस्थापि मंत्रवन्मंत्रितं विचारवद्भिः सर्वैरंगीकृतं मंत्रितत्वं यमसेदं पेतिविचा दा०
११६

मृषोक्तेतवाहंभार्येत्याद्युक्त्वापराह्नेनौदंडंप्राप्यश्चित्तं २१ तत्रनेतिपक्षांनिंदन्नत्यागमंगीकरोतिनहीति २२ नेतिप्रथमचरमपक्षयोर्यथेहं
एकेनेतरबाधेपिनदोषोस्तीत्यर्थः धर्मतःपाणिग्रहणविधितः प्रयच्छंतिअबाधवाइतिशेषः तस्माद्धरणे नात्यंतंतद्दोषः नपिग्रहीतशुल्का
याइत्यर्थः २३ तत्राद्यमुपपादयति बंधुभिरितिकात्तायास्त्कहरणेदोषाभावमग्रेवक्ष्यति २४ उभयसन्निपातेसिद्धांतमाहयस्त्विति

भार्यापत्यर्त्विगाचार्यःशिष्योपाध्यायएवच मृषोक्तेदंडमर्हंतिनेत्याहुरपरेजनाः २१ नह्यकामेनसंवासंमनुरेवंप्रशंस
ति अयशस्यमधर्म्यंचयन्मृषाधर्मकोपनं २२ नैकान्तेदोषएकस्मिंस्तदाकेनोपपद्यते धर्मतोयांप्रयच्छंतियांचक्रीणं
तिभारत २३ बंधुभिःसमनुज्ञातेमंत्रहोमौप्रयोजयेत् तथासिद्ध्यंतितेमंत्रानादत्तायाःकथंचन २४ यस्त्वत्रमंत्रसमयोभा
र्यापत्योर्मिथःकृतः तमेवाहुर्गरीयांसंयश्चासौज्ञातिभिःकृतः २५ देवदत्तांपतिर्भार्यांवेत्तिधर्मस्यशासनात् सदैवीमा
नुषींवाचमनृतांपर्युदस्यति २६ युधिष्ठिरउ० कन्यायांप्राप्तशुल्कायांज्यायांश्चेदावृजेद्वरः धर्मकामार्थसम्पन्नोवाच्य
मत्रानृतंनवा २७ तस्मिन्नुभयतोदोषेकुर्वञ्छ्रेयःसमाचरेत् अयंनःसर्वधर्माणांधर्मश्चिंत्यतमोमतः २८ तत्त्वंजिज्ञा
समानानांचक्षुर्भवतुनोभवान् तदेतत्सर्वमाचक्ष्वनहितृप्यामिकथ्यतां २९ ॥

यश्चासौज्ञातिभिःकृतःसमयोगुरुतरइत्यर्थः २५ अत्रागमंमानमाहदेवेति देवःप्राक्कर्मईश्वरोवावेत्तिलभते २६ उभयजे दोषेशिष्टाति
क्रमात्तबंधुसंमानपूर्वकविक्रयातिक्रमाद्वदोषेसतिकुर्वन्कृतीश्रेयःप्रशस्ततरंकिंसमाचरेदित्यर्थः अयंचिंत्यतमःसंदिग्धत्वेनविवा
र्यतमः २८ आचक्ष्वयतोनहितृप्यामितस्मात्कथ्यतामित्यादरसूचनार्थापुनरुक्तिः २९ ॥ ॥ ॥ ॥ ॥ ॥ ॥

समयोगुरुतत्वापिमंत्रपूर्वः २

दा०
११७
नैवेतितेनक्रेत्राशुल्कंमौल्यंनिष्ठाकारःस्त्रीत्वनिश्चयकरमितिज्ञात्वानआहृतंकिंतुक्रयार्पेनक्रयमात्रेणाभार्यात्वंसिध्यतीत्यर्थः नापिशुल्कपराःददा
ति दानंकुर्वंतिआपतविक्रीणंतितस्याधार्ष्ट्यकेस्मिन्क्रयविक्रयव्यवहारेकन्यापहारजोदोषोनास्तीत्यर्थः गुणैर्वेयाधिकत्वादिभिः ३० कन्याप्य
लंकारग्रहणेनदोषोस्तीत्याहसोर्द्धेनअलंकृतेति ३१ यद्येपूर्वंदास्यामीत्याहुः येचनदास्यामीत्याहुः येवअवश्यंदास्यामीति वदंतितत्सर्वंनभाषि

भीष्मउ० नैवनिष्ठाकरंशुल्कंज्ञात्वासीत्तेननाहृतं नहिशुल्कपराःसंतःकन्यांददतिकर्हिचित ३० अन्यैर्गुणैरुपेतंतुशुल्कंयाचं
तिबांधवाः अलंकृत्वावहस्वेतियोदद्यादनुकूलतः ३१ यच्चतांचददत्येवंनशुल्कंविक्रयोनसः प्रतिगृह्यभवेद्देयमेषधर्मः सना
तनः ३२ दास्यामिभवतेकन्यामितिपूर्वंनभाषितं येचाहुर्येचनाहुर्येयेचावश्यंवदंत्युत ३३ तस्मादाग्रहणात्पाणेर्याचयंतिपर
स्परं कन्यावरःपुरादत्तोमरुद्भिरितिनःश्रुतं ३४ नानिष्टायप्रदातव्याकन्याइत्यृषिचोदितं तन्मूलंकाममूलस्यप्रजननस्ये
तिमेमतिः ३५ समीक्ष्यचबहून्दोषान्संवासाद्विद्विषाणयोः यथानिष्ठाकरंशुल्कंनजात्वासीत्तथाशृणु ३६ अहंवि
चित्रवीर्यस्यद्वेकन्येसमुदावहं जित्वाचमागधान्सर्वान्काशीनथचकोशलान ३७ ॥

तंअनुक्तवदेवेत्यर्थः ३३ यस्मादेवंतस्मात्आपाणिग्रहणात्कन्यांयाचेतेतिमरुतांवरस्तेननतःपूर्वंविशिष्टवरार्थमपहारेपिनदोषइतिभावः
यथोक्तंदत्तामपिहरेत्कन्यांश्रेयांश्चेद्वरआव्रजेदिति ३४ तत्कन्याकामोमूलंयस्यतस्मादुत्तमदौहित्रार्थिनाश्रेयसेकन्याप्रदेयेतिभावः ३५
संवासात्तविपरिचयात्पाणयोःक्रयविक्रययो ३६ वीर्यमपिशुल्कंभवतीत्यभिप्रायेणाहअहमिति अंबिकांबालिकयोरेकत्वविव सम०
वक्षयोद्वेइत्युक्तं ३७॥ ११७

वै२

प्राप्तशुल्कवीर्येणानिर्जितापि कन्यागृहीता अप्राप्तपाणिग्रहादयं अंबाविसर्जो उन्मुष्टुं योग्यादिति पिता [illegible] वाह्लीकः अब्रवीदित्युत्तरेणान्वयः ३८
अनुपप्रच्छ अनुष्टवानहं शंकमान इति विचार्यापरोक्ष्यमभिसंधाय उत्तमपुरुषप्रयोगः वहुडागइ किलाहं तस्य मन्त्रापुरस्तादिति वत् ४१ यदीति
प्राप्तशुल्केपेनपाठांतरे सस्याः स्मसावाकन्यापिता कन्या वलाजांतरं वराणांतरं उपासीतयूतिपास्मृतिस्तर्हि वाध्येतेत्याह त्स्योजनालाजः विधंते

गृहीतपाणिरेकासीत्प्राप्तशुल्कापराभवत् कन्यागृहीतातत्रैवविसर्ज्याइतिमेपिता अब्रवीदितरांकन्यामावहेतिसकौरवः ३८
अपृच्छ्यानानुपप्रच्छशंकमानः पितुर्वचः अतीवह्यस्यधर्मेप्साप्पितुर्मेभ्यधिकाभवत् ३९ ततोहमब्रुवंराजन्नाचारेप्सुरिदंवचः
आचारंतत्वतोवेत्तुमिच्छामिचपुनःपुनः ४० ततोमयेवमुक्तेतुवाक्येधर्मभृतांवर पितामममहाराजवाह्लीकोवाक्यमब्रवीत् ४१
यदिवःशुल्कतोनिष्ठानपाणिग्रहणात्तथा लाजांतरमुपासीतप्राप्तशुल्कामितिस्मृतं ४२ नहिधर्मविदःप्राहुःप्रमाणंवा
क्यतःस्मृतं येषांवैशुल्कतोनिष्ठानपाणिग्रहणात्तथा ४३ प्रसिद्धंभाषितंदानेतेषांप्रत्यायनंपुनः येमन्यंतेत्रयंशुल्कनते
धर्मविदोनराः ४४ नचैतेभ्यःप्रदातव्यानवोढव्यातथाविधा नह्येवभार्याक्रेतव्यानविक्रेयाकथंचन ४५ येचक्रीणंतिदा
सींचविक्रीणंतितथैवच भवेत्तेषांतथानिष्ठालुब्धानांपापचेतसां ४६ अस्मिन्विषयेसत्यवन्तंपर्यपृच्छंतवैजनाः कन्यायाःप्रा
प्तशुल्कायाःशुल्कदःप्रशमंततः ४७

होमद्रव्यमसहितलाजशब्देनात्राघचमत्यर्थः ४२ येषांशुल्कतोनिष्ठातेषांवाक्यतःवाक्यंप्रमाणंस्मृतमितिधर्मविदोनहिआहुरित्यन्वयः
४२ एवंबाधकमन्त्रादंवंसाधकाभावंचोक्त्वालोकविरोधमप्याहाद्वेतप्रसिद्धमिति कन्यायादानंइत्येवोच्यतेनतुक्रयोवति एवाशुल्कमादिनो
प्रत्यायकंभीयोत्तस्थापकंकिमपिनास्ति परिणयनादेवभार्याभवतिनशुल्कमात्रदितिलोकव्यवहारस्यस्पष्टत्वादित्यर्थः एतदेवोपपादयतियइति

कपमितिजयसापुलक्षणं ४७

श्री

ष्टे जीवत इत्यनादरे षष्ठी जीवंतमपि मुक्त्वा दत्त्वा अनादृत्य शोष्ठास्वं यथेष्टं दानं कुर्वंति इत्यर्थः ५० देवरमिति पुगांतरधर्मः कलौ देवरात्सुतोत्पत्तेर्निषेधात् ५१ लिखंतीति
केषांचिन्मते देवरादयः अलिखितां भ्रातृभार्यां लेखंति वसुते न योज्ञ यं तेव अपरेषां मते शौनेर्म्मध्यगं यं प्रवृत्तिः ऐच्छिकी न तु वैधीत्यर्थः ५२ अस्मिन्पक्षे हेयनिश्चयमाह तदि
ति सर्वाणि मंगलानि हरिद्रा स्नानादीनि मंत्राश्च प्राक्पाणिग्रहणीयाः यत्रानिषण्णां लग्नं दृशान्यं तरं काले व्यवधाने यत्र वर्त्तिते तत्रैव पूर्वोक्तो नियमविकल्पो प्रवर्त्तते न तु
पाणिग्रहणादूर्ध्वं तत्र संकल्पपूर्वकं दत्ता या अपि कन्यायोऽपहारे लज्जन्यो मृषावादः पातको भवति दातुर्न तु तावन्मात्रेण तस्या भार्यात्वमुत्पन्नमित्यर्थः ५३ कदाचिद्दित

पाणिग्रहीता चान्यः स्यादत्र नो धर्मसंशयः तं नष्टं हि विमह्य प्राप्तं त्वं हि वै प्राज्ञसंमतः ४८ तत्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् तानेवं ब्रुवतः सर्वान्मत्स्यवान्याक्यमब्रवीत् ४९ येन्नेष्टं तत्र देयाम्याम्नात्र कार्या विचारणा कुर्वंते जीवतोप्येवं मृते नैवास्ति संशयः ५० देवरं प्रविशेत्कन्या तत्पेद्वापि तपः पुनः तमेवानुव्रता भूत्वा पाणिग्राहस्य काम्यया ५१ लिखंत्येवं तु केषांचिदपरेषां शनैरपि इति येसंवदंत्यत्र तत एवं निश्चयं विदुः ५२ तत्पाणिग्रहणात्पूर्वमंतरं यत्र वर्त्तते सर्वमंगलमंत्राणां मृषावादस्तु पातकः ५३ पाणिग्रहणमंत्राणां निष्ठा स्यात्सप्तमे पदे पाणिग्राहस्य भार्या स्याद्यस्य चाद्भिः प्रदीयते ५४ इति देयं वदंत्यत्र तत एवं निश्चयं विदुः अनुकूलामनुवंशां भ्रात्रा दत्तामुपाग्निकां परिक्रम्य यथान्यायं भार्यां विंदेद्द्विजोत्तमः ५५ इति दानधर्मे विवाहेषु ० ॥

दुत्पद्यतेत आह पाणीति यत्रानुदानादूर्ध्वं सप्तमपदात्प्राक् भर्तुर्मरणं सगोत्रत्वादिज्ञानं वा जातं तत्राध्यस्येयं नेमृषावाददोषोपि नास्तीत्यर्थः ५४ देयं दानं एवं त
स्पर्शणां तमेवाह अनुकूलामिति अनुवंशां स्ववंशानुरूपां यभावः यथाऽधानपवमाने ष्टिभ्यां समुद्धिताभ्याम् अग्न्यपत्यघं तेनत्वेके केन एवं दानपाणिग्रहणाभ्यां भार्यात्वं
मुतनाघाभावे चौर्येण हृतायाः न धर्मपत्नीत्वं परस्याभावे तु तस्या दासीत्वान्न कर्मसंबंध इति ५५ इति दानधर्मेषु वैवाहिके ७३ ॥ ॥ ॥ ॥

मा१२ मा१२

कन्यायाः शुल्कदश्चेत्प्रोषितः तस्य पादन्यश्चेन्न वार्यते तदा तत्पित्रा किं कर्त्तव्यमिति प्रश्नार्थः १ या कन्या पितुः प्रतिपन्ना पिता च यदि तच्छुल्कं वरस्य क्षीयेभ्यः पराहृत्य न दद्यात्तत
र्हि सा कन्या शुल्कप्रदस्यैव स्त्रेया न तु पितुस्तस्या अन्यस्मै दातुं अधिकारोऽस्तीत्यर्थः २ तस्य शुल्कदस्यार्थे न्यायेन उत्तमा तत्रैतस्य ऋपोशा पुत्रं दहेतस्य चासा पुत्रस्य शुल्कद
स्य चोपकारय भवति न तु तस्मात् शुल्कदादन्यः कश्चित् मंत्रवत्कामीविधितः तस्याः पाणिग्रहणं कुर्वीत ३ स्वयं प्राप्तशुल्काया कर्त्तव्यशुल्कायाः सा दृश्यणाः काग
ति रिम्पत आह स्वयमिति पित्रा आसन्नप्राप्ता सती स्वयं तेनैव भर्त्रा योगं प्रत्यपद्यत एतच्चरते धर्मज्ञानप्रशंसंति ४ तत्र हेतुः सतत्तु नापरेज्ञातु चक्रुरिति अपरे पुनः शि

युधिष्ठिर उ० कन्यायाः प्राप्तशुल्कायाः पतिश्चेन्नास्ति कश्चन तत्र का प्रतिपत्तिः स्यात्तन्मे ब्रूहि पितामह १ भीष्म उ० या पुत्रकस्याऽऽढ्यस्य प्र
तिपाल्या तदा भवेत् अथ चेन्नाहरेच्छुल्कं क्रीता शुल्कप्रदस्य सा २ तस्यार्थेऽपत्यमीहेत येन न्यायेन शक्नुयात् न तस्या मंत्रवत्कार्यं कश्चित्कुर्वीत किं
चन ३ स्वयं वृते न सावित्री पित्रा वै प्रत्यपद्यत तत्तस्यान्ये प्रशंसंति धर्मज्ञा नेतरे जनाः ४ एतत्तु नापरे चक्रुरपरे जातु साधवः साधूनां पुनराचारो
गरीयान्धर्मलक्षणः ५ अस्मिन्नेव प्रकरणे सुक्रतुर्वाक्यमब्रवीत् नप्ता विदेहराजस्य जनकस्य महात्मनः ६ असदाचरिते मार्गे कथं स्या
दनुकीर्त्तनं अत्र प्रश्नः संशयो वा सतामिदमुपालभेत् ७ ॥ ॥ ॥ ॥ ॥

ष्टाचारत्वादिदमपि गरीय इत्याहुः ५ नेतरः इत्यस्मिन्पक्षे शिष्टाचारं प्रमाणयति अस्मिन्निति ६ न सन्निदाचरिते मार्गे स्थिति पितरि यत्कन्या वरमन्वेषयति इदं न च न स्त्री स्वातंत्र्यमर्हतीति
ति शास्त्रविरुद्धं कथमत्र शास्त्रार्थो वक्तव्यः प्रश्नः संशयो वा अर्थसंदिग्धत्वात्तस्यार्थस्य नायं संशयो उत्तिष्ठतीत्यर्थः उपालभेत् उपालंभं कथं कुर्यादित्यर्थः ७ ॥ ॥

धर्मस्त्रीणामस्वातंत्र्यलक्षणस्यधर्मस्यप्रदानंरवंडनंपतत्सआसुरोधर्मः एतांपद्धतिंपूर्वेषुदृष्टेषुकर्मसुविवाहेषु ८ सत्योदृष्टसंधानसूपःसूक्ष्मःशास्त्रैकगम्यःसचसंयोगोयमं
हारमंत्रैरेणानसिद्ध्यतिअसत्संविनाकेवलरत्यैर्थयथाकथंचिद्दारानतोहृतेदित्यर्थः ९ पुंसोपुरुषेःतस्यअपुत्रस्य १० अन्योभ्रात्रादिःएतद्वाक्यमाप्यमातरिस्नेयं ११ मातु
रिति सतिअसतिवापुत्रेमातुर्यौतकंपृथक्कृतंधनंनतुपित्रादिभिर्दत्तंविंहकालेवानसेपतत्स्वसुरादिभिर्दत्तंमत्रीवानवेदमितिपृथक्कृदत्तंकर्त्तनाद्यर्जितंवानत्सर्वंकु

असुरेष्वपिधर्मस्यप्रदानंधर्मआसुरः नानुशुश्रुमजात्वेतामिमांपूर्वेषुकर्मसु ८ भार्यापत्योर्हिसंबंधःस्त्रीपुंसोस्तुल्यएवतु रतिः
साधारणोधर्मइतिचाहसपार्थिव ९ युधिष्ठिरउ० अथकेनप्रमाणेनपुंसामादीयतेधनं पुत्रवद्धिपितुस्तस्यकन्याभवितुमर्हति १० भीष्म
उ० यथैवात्मातथापुत्रःपुत्रेणदुहितासमा तस्यामात्मनितिष्ठंत्यांकथमन्योधनंहरेत ११ मातुश्चयौतकंयत्स्यात्कुमारीभागएवसः दौहि
त्रएवतद्रिक्थमपुत्रस्यपितुर्हरेत १२ ददातिहिसपिंडान्वैपितुर्मातामहस्यच पुत्रदौहित्रयोरेवविशेषोनास्तिधर्मतः १३ अन्यत्रजाम
यासार्द्धंप्रजानांपुत्रईहते दुहितान्यत्रजातेनपुत्रेणापिविशिष्यते १४

मारीभागएवनपुत्राणामित्यर्थः। तद्रिक्थं तयोर्धनंपितुःमातामहस्य १२ अत्रहेतुमाह ददातीति यःपिंडान्मरिक्थहारीत्यर्थः।पिंडार्थेइतिपाठेपिंडःअर्थ्यतेस्मिनत्तत्रप्राद्दे
१३ पुत्रेति अन्यत्रपुत्रभागेधनेविभजनीयेजामयाकन्ययातामपेक्ष्येत्यर्थः यत्रकन्यापूर्वंपुत्रीकृतातत्तःपुत्रोपिजातस्तत्रपंचधाभक्तस्यधनस्यद्वौकन्यार्हतित्रीनपु
त्रःततश्चकन्यामपेक्ष्यपुत्रःसार्द्धंत्रींशांईहते अन्यत्रजातेनऔरसाद्न्येनदत्तकादिनास्वयंसंस्कृतेनपुत्रेणतमपेक्ष्यऔरसीकन्याविशिष्यतेअत्रापिपंचानामंशा
नांत्रीन्कन्याहरेत्द्वौपुत्रइत्यर्थः १४ ॥

श्रीरामः

अत्रव स्यमाणास्यलेकारणांनिमित्तं तदेवस्यलमाह विक्रीतास्विति अपमर्पः विक्रीतायाः कन्यायाः पुत्राऽनौरसेविपुत्रेसतिनदायभागपवतीति १५ आसुरातविवा
हात्कन्याक्रयपूर्वात् १६ अत्रात्रासुरविवाहनिंदायां १७ १८ कालसीकपेकालसत्रारम १९ २० अन्येषांवालात्कन्याहरणशीलानांराक्षसानां २१ एतानपि

दौहित्रकेणधर्म्मेण नात्रपश्यामिकारणं विक्रीतासुहियेपुत्राभवंतिपितुरेवतु १५ अस्यपवत्स्वधर्म्मिष्ठाः परस्वादापिनः शठाः आसुराद्धि
संभूताधर्मादिषमवृत्तयः १६ अत्रगाथापापमोद्गीताः कीर्तयंतिपुराविदः धर्म्मज्ञाधर्म्मशास्त्रेषुनिवद्धाधर्म्मसेतुषु १७ योमनुष्यः
स्वकंपुत्रंविक्रीयधनमिच्छति कन्यांवाजीवितार्थायपः शुल्केनप्रयच्छति १८ सप्तावरेमहाघोरेनिरयेकालसाह्वये स्वेदंमूत्रंपुरीषंचतस्मि
न्मूढः समश्नुते १९ आर्षेगोमिथुनंशुल्कंकेचिदाहुर्मृषैवतत् अल्पोवावहुवाराजन्विक्रयस्तावदेवसः २० यद्यप्याचरितः कैश्चिन्नैष
धर्म्मः सनातनः अन्येषामपिदृश्यंतेलोकतः संप्रवृत्तयः २१ वश्यांकुमारींवलतोयेतांसमुपभुंजते एतेपापस्यकर्त्तारस्तमस्यंधेचशेरते
२२ अन्योप्यथनविक्रेयोमनुष्यः किंपुनः प्रजाः अधर्म्ममूलैर्हिधनैस्तैर्न्नधर्मोथकश्चन २३ इतिदानधर्म्मविवाहधर्मेयमगाथा भीष्म
३० प्राचेतसस्यवचनंकीर्त्तयंतिपुराविदः यस्यांकिंचिन्नाददतेज्ञातयोनसविक्रयः १ अर्हणंतत्कुमारीणामानृशंस्यतमंचतत्
सर्वंचप्रतिदेयंस्यात्कन्यायैतदशेषतः २

निदतिवश्यामिति वलतोवश्यांनतुस्वच्छंदतइत्यर्थः २२ अन्योपिपश्वपि २३ इतिदानधर्मेषुविवाहधर्मेऽध्यायः प्राचेतसाद्दक्षस्यज्ञातयः कन्यापक्षीयाः स्वयंना
ददतेऽथचकन्यालंकारार्थमिच्छंतिसविक्रयोनभवतीत्यर्थः १ ॥ छ॥

दा०टी० ३ नर्योचेज्जनकामयेत नप्रमोदयेत्ताकामुकं नकुर्यात्प्रजनः संततिः ४४ सुल्पः ईषद्दायासेनअपनेयः कौपीनो गुह्यस्याच्छादनपटोयास्मं सद्योहार्य्योऽल्पर्षः सुहृ

१२०

पितृभिर्भ्रातृभिश्चापि श्वशुरैरथदेवरैः पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ३ यदि वैस्त्री नरोचेत पुमांसं न प्रमोदयेत् अ
प्रमोदात्पुनः पुंसः प्रजनो न प्रवर्द्धते ४ पूज्या लालयितव्याश्च स्त्रियो नित्यं जनाधिप स्त्रियो यत्र च पूज्यंते रमंते तत्र देवताः ५ अ
पूजिताश्च यत्रैताः सर्वास्तत्राफलाः क्रियाः तदा चैतत्कुलं नास्ति यदा शोचंति जामयः ६ जामीशप्तानि गेहानि निकृत्तानीव
कृत्यया नैव भांति न वर्द्धंते श्रिया हीनानि पार्थिव ७ स्त्रियः पुंसां परिददे मनुर्जिगमिषुर्दिवं अबलास्वल्पकौपीनाः सुहृदः सत्य
जिष्णवः ८ ईर्ष्यवो मानकामाश्च चंडा अ सुहृदो वुधाः स्त्रियस्तु मानमर्हंति ता मानयत मानवाः ९ स्त्रीप्रत्ययो हि वै धर्मो रतिभो
गाश्च केवलाः परिचर्यानमस्कारास्तदायत्ता भवंतु वः १० उत्पादनमपत्यस्य जातस्य परिपालनं प्रीत्यर्थं लोकयात्रायाः पश्य
त स्त्रीनिबंधनं ११ संमान्यमानाश्चैता हि सर्वकार्याण्यवाप्स्यथ विदेहराजदुहिता चात्र श्लोकमगायत १२ नास्ति यज्ञः स्त्रि
याः काचिन्न श्राद्धं नोपवासकं धर्मः स्वभर्तृशुश्रूषा तया स्वर्गं जयत्युत १३ पिता रक्षति कौमारे भर्ता रक्षति यौवने पुत्राश्च स्थावि
रे भावे न स्त्री स्वातंत्र्यमर्हति १४ श्रिय एताः स्त्रियो नाम सत्कार्या भूतिमिच्छता पालिता निगृहीता च श्रीः स्त्री भवति भारत १५
इति दानधर्मे विवाहधर्मेषु युधिष्ठिर उ० सर्वशास्त्रविधानज्ञ राजधर्मविदुत्तम अतीव संशयच्छेत्ता भवान्वै प्रथितः क्षितौ १

दः सौहार्दयुक्ता न वुधयंतस्यवुधाः ८ स्त्रीप्रत्ययः स्त्रीहेतुकः ९ १३ अत्र स्त्रीधर्मविषये १३ १६ अध्यायः सर्वेति १ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ए.न०

१२०

एवमप्यविगानमस्त्रीमुख्यमुक्त्वा धनमर्धर्यं दायविभागं प्रस्तौति ३ तिस्रइत्यत एव विहितानन्तु धर्मं शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं अपत्यं जनयित्वास्यां ब्राह्मणा
देवहायपत इति निंदा स्मरणात् ४ ५ किंयत्रनार्तां ६ ७ दृष्टांततः शास्त्रतः ८ अविहितमप्यनिषिद्धत्वेन त्रात्राह्मशूद्रामिति कृशंमोऽर्जुहवाद्योऽ प्रतइवमन्येतयथास्तेनोय
याश्रुणमहे वल्लेषमवतियोऽयौनौरेतः सिंचतीति क्षत्रियायां वैश्यायां वोत्पन्नस्य साक्षाद्वा कतिपयपुरुषव्यवधानाद्वा ब्राह्मण्यलाभोदृश्यत इति तयोरस्त्येयोनित्वमशूद्रायास्त्व

कश्चिन्नु संशयो मेऽस्ति तन्मे ब्रूहि पितामह जातेऽस्मिन्संशये राजन्नान्यं पृच्छेम कंचन २ यथा नरेण कर्त्तव्यं धर्म्ममार्गानुवर्त्तिना एतत्सर्वं म
हाबाहो भवान्व्याख्यातुमर्हति ३ चतस्रो विहिता भार्या ब्राह्मणस्य पितामह ब्राह्मणी क्षत्रिया वैश्या शूद्रा च रतिमिच्छतः ४ तत्र जातेषु पुत्रेषु सर्वा
सां कुरुसत्तम आनुपूर्व्येण कस्तेषां पित्र्यं दायाद्यमर्हति ५ केन वा किं ततो हार्यं पितृवित्तात्पितामह एतदिच्छामि कथितं विभागस्तेषु यः स्मृतः ६
भीष्म उ० ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः एतेषु विहितो धर्मो ब्राह्मणस्य युधिष्ठिर ७ वैषम्यादथवा लोभात्कामाद्वापि परंतप ब्राह्म
णासंभवेच्छूद्रान तु दृष्टांततः स्मृताः ८ शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं प्रायश्चित्तीयते चापि विधिदृष्टेन कर्मणा ९ तत्र जातेषु पुत्रेषु
द्विगुणं स्याद्युधिष्ठिर आपद्यमानं कृत्स्नं तु संप्रवक्ष्यामि भारत १० लक्षण्यं गोवृषो यानं यत्प्रधानतमं भवेत् ब्राह्मण्यास्तद्धरेत्पुत्र एकांशं वै पितु
र्धनात् ११ शेषं तु दशधा कार्यं ब्राह्मणस्वं युधिष्ठिर तत्र तेनैव हर्त्तव्याश्चत्वारोंऽशाः पितुर्धनात् १२ क्षत्रियायास्तु यः पुत्रो ब्राह्मणः सोप्यसंशयः
स तु मातुर्विशेषेण त्रीनंशान्हर्त्तुमर्हति १३ ॥ ॥

तथा वाद्ययोनित्वं ततस्तस्यां रेतःसेके प्रायश्चित्तीभवत्येव कृष्मांडैः यद्देवा देवहेलनमिति यजुर्वेदप्रसिद्धैर्मंत्रविशेषैः अनेनैव विधिनावेदेन दृष्टेन कर्मणा प्रायश्चित्तमात्म
नइच्छति प्रायश्चित्तीयते अन्यथाऽधोगतिं यातीत्यर्थः ९ द्विगुणं प्रायश्चित्तः १० एकांशं मुख्यांश ११ तेनैव ब्राह्मणीपुत्रेण १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दा०टी० १४ नित्यं सर्वथा अदेयधनमस्मान्नित्यादेयधनः अल्पापि अल्पएकांशः १५ १६ अब्राह्मणंत्विति दीर्घतमसः पुत्रेषु शूद्रायां जातेषु काक्षीवदादिषु ब्राह्मणदर्श
१२१ नादितिभावः एवं च तस्य अमंत्रकाः संस्कारा अपि भवंति त्रिषु क्षत्रियादिषु एतच्छूद्रापार्थं अवध्यत्वार्थं चोक्तं विमाता वैश्यायां शूद्रायां च जातस्य मातृजातीयत्व
सवक्ष्यमाणत्वात् १७ १८ समुत्पन्नं आनृशंस्यं २० यद्यपीति एतेन वंशेषु अमुत्रास्य पुत्रोऽधिकं भागमर्हतीति सूच्यते २१ वृथा यज्ञादिप्रयोजनं विना तस्मा

वर्णोत्तमेऽपि जातस्तु वैश्यायां ब्राह्मणादपि द्विरंशस्तेन हर्तव्यो ब्राह्मणस्वाद्युधिष्ठिर १४ शूद्रायां ब्राह्मणाज्जातो नित्यादेयधनः स्मृतः अल्पं वापि
प्रदातव्यं शूद्रापुत्राय भारत १५ दशधा प्रविभक्तस्य धनस्यैष भवेत्क्रमः सवर्णासु तु जातानां समान्भागान्प्रकल्पयेत् १६ अब्राह्मणं तु मन्यंते शूद्रापु
त्रमनैपुणात् त्रिषु वर्णेषु जातो हि ब्राह्मणाद्ब्राह्मणो भवेत् १७ स्मृतास्तु वर्णाश्चत्वारः पंचमो नाधिगम्यते हरेत्तु दशमं भागं शूद्रापुत्रः पितुर्ध
नात् १८ तत्तु दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति अवश्यं हि धनं देयं शूद्रापुत्राय भारत १९ आनृशंस्यं परो धर्म इति तस्मै प्रदीयते यत्र
तत्र समुत्पन्नो गुणायैवोपपद्यते २० यद्यप्येष सपुत्रः स्यादपुत्रो यदि वा भवेत् नाधिकं दशमाद्दद्याच्छूद्रापुत्राय भारत २१ त्रैवार्षिकाद्यदा
भक्तादधिकं स्याद्द्विजस्य तु यजेत तेन द्रव्येण न वृथा साधयेद्धनं २२ त्रिसहस्रः परो दायः स्त्रियै देयो धनस्य वै भर्त्रा तच्च धनं दत्तं यथार्हं भोक्तु
मर्हति २३ स्त्रीणां तु पतिदायाद्यमुपभोगफलं स्मृतं नापहारं स्त्रियः कुर्युः पतिवित्तात्कथंचन २४ स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं युधि
ष्ठिर ब्राह्मण्यास्तद्धरेत्कन्या यथा पुत्रस्तथा हि सा सा हि पुत्रसमा राजन्विहिता कुरुनंदन २५ एवमेव समुद्दिष्टो धर्मो वै भरतर्षभ एतं ध
र्ममनुस्मृत्य न वृथा साधयेद्धनं २६॥

वपेत् प्रतिग्रहादिना वा दायहरणेन वा न लिप्सेत् २१ त्रीति सहस्रत्रयाद्बहुवित्तवतापि स्त्रियै नाधिको दायो न देयः इत्यर्थः तदपि तत्पादत्तं चेत् भर्त्ता भोक्तुमर्हति
भोक्तुं नान्यस्य २३ कुर्युः पुत्राद्युत्तरोषः पतिवित्तात् यत्नाद्दत्तात् वित्तात् २४ २५ धर्मो विभागप्रकारः वृथा अन्यायेन साधितैर्द्रव्यैः कृतमपि यागादि नि

अग्राह्यमितितत्समाप्युक्तंनिषादेष्वधनत्वात्तद्धानंतेरैकदशमांशदानविधिनाविरुद्धमित्यर्थः २७ यदाक्षिप्तरणामपुत्राब्राह्मणीपूर्ववत्तदाकिमर्थमेषांभागवैषम्यमिति
द्वितीयआक्षेपः २८ २९ आदिपंक्तौत्रिवर्णार्थिभिरितिदारपदप्रवृत्तिनिमित्तं आदरः सचभोगार्थीयांशूद्रायामप्यस्तिअतस्तत्सुतोपिदायमर्हतीति यतस्तुभर्तुरादरस्ता
भिर्वर्णक्रमेणयथायोगंपंतारतम्यक्रमेणाक्षिप्यतइतितत्सुतानांभागवैषम्यंवास्त्रीत्वाभिप्रायवानाह।प्रोक्तेनैवेति।नामनिर्वचनमयेश्र्यौवायंविशेषोस्तीत्यर्थः ३०

युधिष्ठिरउवाच शूद्रायांब्राह्मणाज्जातोयद्यदेयधनःस्मृतः केनप्रतिविशेषेणदशमोप्यस्यदीयते २७ ब्राह्मण्यांब्राह्मणाज्जातो
ब्राह्मणःस्यान्नसंशयः क्षत्रियायांतथैवस्याद्वैश्यायामपिचैवहि २८ कस्मात्तुविषमंभागंभजेरन्नृपसत्तम यदासर्वेत्रयोवर्णास्त्वयो
क्ताब्राह्मणाइति २९ भीष्मउ० दाराइत्युच्यतेलोकेनाम्नैकेनपरंतप प्रोक्तेनचैवनाम्नायंविशेषःसुमहान्भवेत् ३० तिस्रःकृत्वापु
रोभार्याःपश्चाद्विंदेतब्राह्मणीं साज्येष्ठासाचपूज्यास्यात्साचभार्यागरीयसी ३१ स्नानंप्रसाधनंभर्तुर्दंतधावनमंजनं हव्यंकव्यंचयच्चा
न्यद्धर्मयुक्तंगृहेभवेत् ३२ नतस्यांजातुतिष्ठंत्यामन्यातत्कर्तुमर्हति ब्राह्मणीत्वेवकुर्याद्वाब्राह्मणस्ययुधिष्ठिर ३३ अन्नंपानंच
माल्यंचवासांस्याभरणानिच ब्राह्मण्यैतानिदेयानिभर्तुःसाहिगरीयसी ३४ मनुनाभिहितंशास्त्रंयच्चापिकुरुनंदन तत्राप्येषम
हाराजदृष्टोधर्मःसनातनः ३५ अथचेदन्यथाकुर्याद्यदिकामाद्युधिष्ठिर यथाब्राह्मणचांडालःपूर्वदृष्टस्तथैवसः ३६ ॥ ॥

विशेषमेवाहतिस्रइति।पश्चात्कारिणीतापिवयसाकनिष्ठापिपितृगौरवाद्ब्राह्मणीमेवसर्वेषुलौकिकेवैदिकेषुकार्येष्वाद्रियेतेत्यर्थः ३१ ३५ ब्राह्मणचंडालः
ब्राह्मणाक्षेत्रेशूद्राज्जातः पूर्वोक्तोमातंगस्तद्वत्सतेनकर्मणाश्वपच इत्यर्थः। कर्मणाजायते ख्यातिभंगेनख्यापतेकृतमितिन्यायात् ३६ ॥ ॥ ॥ ॥

३८ भूयोऽल्पेपिपित्र्यधिकमधिकंसंहार्यः संविभजनीयः ३९ ४५ उक्तां दायविभागादि नियम्य दायविभागो अत्रापि क्षत्रियस्यवैश्यपुत्रेषु वधनं विभ
ज्यैकैकांशहीनाइतरभागाउतविशेषोऽस्तीतिमधुच्छिंप्रायः ४६ क्षत्रियायांक्षत्रियपत्नीगांएषएवक्रमोभर्तुःस्नानादिप्रदानेनतस्यांसवर्णापासंसोऽहीनवा

ब्राह्मण्यांसदृशःपुत्रःक्षत्रियायाश्चयोभवेत् राजन्विशेषोपस्त्वत्रवर्णयोरुभयोरपि ३७ नतुजात्यासमालोकेब्राह्मण्याः
क्षत्रियाभवेत् ब्राह्मण्यःप्रथमस्पुत्रोभूयान्स्यादाज्जसत्तम ३८ भूयोऽभूयोपिसंहार्यःपितृवित्ताद्युधिष्ठिर यथानसदृशीजा
तुब्राह्मण्याःक्षत्रियाभवेत् ३९ क्षत्रियायास्तथावैश्यानजातुसदृशीभवेत् श्रीस्तुराज्यंचकोशश्चक्षत्रियाणांयुधिष्ठिर ४०
विहितंदृश्यतेराजन्सागरांताचमेदिनी क्षत्रियोहिस्वधर्मेणश्रियंप्राप्नोतिभूयसीं ४१ राजादंडधरोराजन्रक्षानान्य
त्रक्षत्रियात् ब्राह्मणाहिमहाभागदेवानामपिदेवताः ४२ तेषुराजन्प्रवर्तेतपूजयाविधिपूर्वकं प्रणीतमृषिभिर्ज्ञात्वाधर्मंशा
श्वतमव्ययं ४३ लुप्यमानंस्वधर्मेणक्षत्रियोह्येषरक्षति दस्युभिर्ह्रियमाणांचधनंदाराश्चसर्वशः ४४ सर्वेषामेववर्णानां
त्राताभवतिपार्थिवः भूयान्स्यात्क्षत्रियापुत्रोवैश्यापुत्रान्नसंशयः ४५ भूयस्तेनापिहर्तव्यंपितृवित्तात्युधिष्ठिर युधि
ष्ठिरउ॰ उक्तोतेविधिवद्राजन्ब्राह्मणस्यपितामह इतरेषांतुवर्णानांकथंवैनियमोभवेत् ४६ भीष्मउ॰ क्षत्रियस्यापि
भार्येद्वेविहितेकुरुनंदन तृतीयाचभवेच्छूद्रानतुदृष्टाऽनतःस्मृता ४७ एषएवक्रमोहिस्यात्क्षत्रियाणांयुधिष्ठिर अष्टधातु
भवेत्कार्यंक्षत्रियस्वंजनाधिप ४८ क्षत्रियायाहरेत्पुत्रश्चतुरोंशान्पितुर्धनात् युद्धावहारिकंयच्चपितुःस्यात्सहरेत्तुतत् ४९

गीनिन्नकुर्यादित्यर्थः ४८ युद्धेऽवह्रियतेतद्रथगजायुधकवचादिकंयुद्धावहारिकं ४९ ॥ ॥ ॥ ॥ ॥ ॥
६१

५४ शूद्रस्यैकपर्वन्नेवेहैतुस्त्रिभिर्वर्णैर्जातास्ति ५५ ६० दानधर्मेषु रिक्थविभागः ५७ एवमनुलोमजातिजानां पुत्राणां तारतम्यमुक्त्वा विलोमजातिजाना
मपि तदाह त्र्यध्यायेनत्र्यर्पदिति लोभात्कामाद्वा उत्तमवर्णास्त्री हीनवर्णानुगामिनी भवतीति प्रसिद्धं तेन गुह्योत्पत्तिसंभवात् वर्णानां निश्चयो न जायते न नु कर्मणा ज्ञायते ज्ञा

वैश्यापुत्रस्तु भागांस्त्रीन् शूद्रापुत्रस्तथाष्टमं सोपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ५० एकैव हि भवेद्भार्या वैश्यस्य कुरुनंदन द्वितीया
तु भवेच्छूद्रा न तु दृष्टांततः स्मृता ५१ वैश्यस्य वर्त्तमानस्य वैश्यायां भरतर्षभ शूद्रायां चापि कौंतेय तयोर्विनियमः स्मृतः ५२ पंचधा तु भवे
त्कार्यं वैश्यस्वं भरतर्षभ तयोरपत्ये वक्ष्यामि विभागं च जनाधिप ५३ वैश्यापुत्रेण हर्त्तव्याश्चत्वारोंशाः पितुर्धनात् पंचमस्तु स्मृतो भागः
शूद्रापुत्राय भारत ५४ सोपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति त्रिभिर्वर्णैः सदा जातः शूद्रोदपधनो भवेत् ५५ शूद्रस्य स्यात्सवर्णैव भा
र्या नान्या कथंचन समभागाश्च पुत्राः स्युर्यदि पुत्रशतं भवेत् ५६ जातानां समवर्णायाः पुत्राणामविशेषतः सर्वेषामेव वर्णानां
समभागो भवेत्स्मृतः ५७ ज्येष्ठस्य भागो ज्येष्ठः स्यादेकांशो यः प्रधानतः एष दायविधिः पार्थ पूर्वमुक्तः स्वयंभुवा ५८ समवर्णासु
जातानां विशेषोस्त्यपरो नृप विवाहवैशिष्ट्यकृतः पूर्वः पूर्वो विशिष्यते ५९ हरेज्ज्येष्ठः प्रधानांशमेकं तुल्यासुतेष्वपि मध्यमो मध्यमं
चैव कनीयांस्तु कनीयसं ६० सर्वजातिषु सर्वासु सवर्णाः श्रेष्ठतां गताः महर्षिरपि चैतद्वै मारीचः काश्यपोब्रवीत् ६१ इति दानधर्मे वि
वाहधर्मे रिक्थविभागः ५६ युधिष्ठिर उवाच अर्थाश्रयाद्वा कामाद्वा वर्णानां वाप्यनिश्चयात् अज्ञानाद्वापि वर्णानां जायते व
र्णसंकरः १

निरिति भिपुंक्ते रुच्यते एव निषेककाले दुर्मुहूर्त्तदुष्टवस्तुस्मरणादिना पि मिनिमित्तेन सम्यग्गमनत उत्पत्तिसंभवात् प्रच्छन्नविलोमजोप्यपिक्क ११
विसदाचारदर्शनेन वर्णानाम ज्ञानाद्वा वर्णसंकरो भवतीत्यर्थः १॥ ॥ ॥

दा०टी एतेनउक्तेनविधिनाप्रकारेण १ तत्रप्रथमंचत्वारएववर्णाःयज्ञार्थंसृष्टास्तत्र
१२३ आनन्तर्याद्ब्राह्मणस्यैवंक्षत्रियायामपिजायतइत्यर्थः स्त्रीष्वनंतरजातासुद्विजैरुत्पादितान्सुतान् सदृशानेवतानाहुर्मातृदो
षविगर्हितान् निनिमात्तजात्यैवैश्यायांवैश्यो ऽ बष्टोनामशूद्रायांशूद्रोनिषादोनामपारशवाख्योभवतिमनुर्ब्राह्मणाद्वैश्यकन्यायामंबष्टोनामजायते

तेषामेतेनविधिनाजातानांवर्णसंकरे कोधर्मःकानिकर्माणितन्मेब्रूहिपितामह १ भीष्मउ० चातुर्वर्ण्यस्यकर्माणिचातुर्वर्ण्यंच
केवलं असृजत्सहियज्ञार्थंपूर्वमेवप्रजापतिः २ भार्याश्चतस्रोविप्रस्यद्वयोरात्माप्रजायते आनुपूर्व्याद्वयोर्हीनौमातृजात्यौप्र
सूयतः ३ परंशवाद्ब्राह्मणस्यैषपुत्रःशूद्रापुत्रंपारशवंतमाहुः शुश्रूषकःस्वस्यकुलस्यसस्यात्स्वचारित्रंनित्यमथोनजह्यात् स
र्वानुपायानथसंप्रधार्यसमुद्धरेत्स्वस्यकुलस्यतंतुं ज्येष्ठोयवीयानपियोद्विजस्यशुश्रूषयादानपरायणःस्यात् ५ तिस्रःक्ष
त्रियस्यद्वयोरात्मास्यजायते हीनवर्णास्तुतौपापौशूद्रावुग्राइतिस्मृतिः ६ द्वेचापिभार्येवैश्यस्यद्वयोरात्मास्यजायते शू
द्राशूद्रस्यचाप्येकाशूद्रमेवप्रजायते ७ अतोविशिष्टस्त्वधमोगुरुदारप्रधर्षकः बाह्यंवर्णंजनयतिचातुर्वर्ण्यविगर्हितं ८ ॥

निषादःशूद्रकल्पःपापःपारशवउच्यतइति ४ एतन्नाचष्टेणमितिशवात्पपुत्रायुक्तस्तेनशानंपशुशूद्रइतिश्रुतेः। शवस्यानतुल्यात्शूद्रात्परंउत्कृष्ट
पत्नीपुत्रंयुपादस्युक्तेजगमंर्पशानंशूद्र इत्यर्थः ४ तंत्रउपकरणं वपसाज्येष्ठोपिपारसर्वोद्विजस्यत्रिवर्णजस्यकनीयानेवेतिसंबंधः ५ वैश्यायामपिक्ष
त्रियात्क्षत्रप्रभवतीत्याहद्वयोरिति उग्राःशूद्रविशेषाः ६ वैश्यात्शूद्रायामपिवैश्यएवभवतीत्याहद्वेइति ७ अतःस्वपितुरविशिष्टानधिकःसन्नधमः दान०
शूद्रोगुरुणांब्राह्मणादीनांदारप्रधर्षकस्वेत् बाह्यंचडालादि ८ ९ १२३

विप्रायामिति सूतः सारथिः जातितः कर्मतश्च सूतानामश्वसारथ्यमित्युक्तेः स्तोमक्रियापालोत्र कराणां वराजादीनां पयोत्रंसतः पौराणिकामताइति मोद्गल्यं स्त्री
कार्यं अतः पुरक्षणादितत्कारित्वं वैदेहिकानां स्त्रीकार्यमित्युक्तेः अपवर्तितं संस्कारेनेह ९ वधार्हाणां चोरादीनां शिरश्छेदादिकार्यकारिणां वधघ्नं १० वैदे
ति मागधानां वणिक्पथ इति मनुः वाक्प्रशंसा वसदृशीउक्तिप्रभृति निषादः क्षत्तानामायदाह मनुः शूद्रादायोगवः क्षत्ता चंडालश्चाधमो नृणां वैश्यरा
जन्यविप्रासुतार्थं तेवर्णसंकराइति अरण्यवृत्तिं मनुरन्यामाह क्षत्रुग्रपुल्कसानां तु बिलौकोवधबंधनमिति अत्र मनुना निषादोऽनुलोमजेषु क्षत्ता च प्रति

विप्रायां क्षत्रियोवाह्यः सूतःस्तोमक्रियापरः वैश्यो वैदेहकं चापि मौद्गल्यमपवर्जितं ९ शूद्रश्चांडालमत्युग्रं वधघ्नं बाह्यवासिनं
ब्राह्मण्यां संप्रजायंत इत्येते कुलपांसवाः एते मतिमतां श्रेष्ठ वर्णसंकरजाः प्रभो १० वैदेहात्तु जायते वैश्यान्मागधो वाक्यजीवनः
शूद्रान्निषादो मत्स्यघ्नः क्षत्रियायां व्यतिक्रमात् १० शूद्रादायोगवश्चापि वैश्यायां ग्रामधर्मिणः ब्राह्मणैरप्रतिग्राह्यस्तक्षा स्वध
नजीवनः ११ एतेपि सदृशान्वर्णाञ्जनयंति स्वयोनिषु मातृजात्यां प्रसूयंते ह्यवरा हीनयोनिषु १२ यथा चतुर्षु वर्णेषु द्वयोरा
त्मास्य जायते आनंतर्यात्प्रजायंते तथा बाह्याः प्रधानतः १३॥

लोमजेषूक्तः व्यासेन तु विपरीतमुक्तं विदुरे क्षत्तृशब्दं तत्रात्तत्र प्रयुंजानेन अत एव शूद्रायां निषादो जातः पारसवोपि वा क्षत्रियायां मागधं वैश्यात् शूद्रात् क्षत्तारमे
वेति याज्ञवल्क्यः अयं च वाशब्दं पठन्नन्येषां निषादत्वं क्षत्तृत्वं स्वस्वपतितेन विप्रात् शूद्रायां क्षत्ता प्रशूद्रात् क्षत्रियायां निषादत्वमपि साधु १० ग्रामधर्मिणः ग्रा
मधर्मो मैथुनं तत्र रतः तक्षा वर्द्धकिः ११ एते नव चांत्रं बहुधा शबोग्राः सूतवैदेहकचंडालाः मागधनिषादायोगवा नव तेषां स्वयोनौ अनंतरयोनौ वसात्मैव जा
यते पूर्ववत्तु अवहितनीचयोनौ तु मातृजातीया इति श्लोकद्वयार्थः १३॥

तेचापिसंकरसंकराज्जाअपिविगर्हितान्अधमादुत्तमायांउत्तमादधमायांवाजातान्वध्यादिवहिर्गर्हितांतेवर्जनयंतीत्यर्थः १७ १६ पंचदशबाह्याउक्तास्तान्व्याचष्टेबाह्यानामित्यादिना मागधेषुसैरंध्रमित्यनेनान्वयः सैरंध्रकर्मव्याचष्टेप्रसाधनेति प्रसाधनंराजादीनांपुंसांअलंकरणंपुरुषैःसैरंध्रैःराजस्त्रीणांवसैरंध्रीतिःउपचारःतेषांद्विधागणगाघर्षणेनमृत्वादिनाचसंतोषणं तदभिज्ञंअदासमितिसामान्येननपुंसकं १७ अतःअत्रमागधविशेषेसैरंध्रयोनौआयोगवंआयोगवस्यैवापत्यंसैरंध्रंनामसूतेपीदायोगस्यैव सैरंध्रंवागुरावृत्तिमितिमनुःतस्मादेवमागधंमैरेयकंनामतःमाधुकंमद्यकारंकर्मतस्यपुत्रंवैदेहःसूते १८ मद्गुरंमद्गुर

तेचापिसदृशंवर्णाञ्जनयंतिस्वयोनिषु परस्परस्यदारेषुजनयंतिविगर्हितान् १७ यथाशूद्रोपिब्राह्मण्यांजंतुंबाह्यंप्रसूयते एवंबाह्यतरंबाह्यश्चातुर्वर्ण्येप्रजायते प्रतिलोमंतुवर्तंतेबाह्याद्बाह्यतरान्पुनः १५ हीनाहीनाःप्रसूयंतेवर्णाःपंचदशैवतु आगम्यागमनाच्चैवजायंतेवर्णसंकरः १६ बाह्यानामनुजायंते सैरंध्रंमागधेषुच प्रसाधनोपचारज्ञमदासंदासजीवनं १७ अतस्त्वायोगवंसूतेवागुरावधजीवनं मैरेयकंचवैदेहःसंप्रसूतेथमाधुकं १८ निषादोमद्गुरंसूतेदासंनावोपजीवनं मृतपंचापिचांडालःश्वपाकमितिविश्रुतं १९ चतुरोमागधीसूतेक्रूरान्मायोपजीविनः मांसंस्वादुकरंक्षौद्रंसौगंधमितिविश्रुतं २० ॥ ॥ ॥

मीनविशेषान्हंतीत्याहत्रेतमद्गुरंदाससमामतःमृतपश्मशानाधिकारिणं १९ एतेमागधात्आयोगवादिभ्यःश्चतुर्भिःक्रमाज्जायंतेइत्युपसंहरतिचतुरइति एतेचत्वारोवागुरादिनाजीवंतीतिमायोपजीविनः अन्येपिचत्वारोमागधाविश्रुताःसजातीमाउत्पद्यंतेतेषांनामानिमांसमित्यादि मांसंमांसविक्रेतारं स्वादुकरंमांसस्यैवसंस्कारकं क्षौद्रंसूदंभृद्रमितिपाठत्रयेपिशपकायत्रपाककरं सौगंधंउक्तलक्षणंसैरंध्रं एककस्यैवमागधस्यैतद्वृत्तिचतुष्टयमुक्तमितिसेयं २० ॥

आयोगव्यां वैदेहकादिभ्यो जातांस्त्रीन्निमदानाहसार्द्धद्वयेन वैदिदेहकादिति २१ क्षुद्रइति निषाद्यां वैदेहात्क्षुद्रो भेदः अंध्रश्च आरण्यपशुहिंसको कारावारश्चर्मकारश्चेत्रयो भवतीत्यर्थः २३ चंडालात्तनिषाद्यामेवलवत्तारो वेणुः २४ आहिंडिकइति स्पष्टार्थी श्लोको २५ २६ इतीति अत्र मागध्यां आयोगववैदेहकनिषादचंडालैश्चत्वारः तैरेवायोगव्यांस्त्री पवर्ज्जितैस्त्रयः निषाद्यां चंडालवैदेहाभ्यां द्वौ वैदेह्यां चंडालनिषादा

वैदेहकाच्च पापिष्टं क्रूरं मायोपजीविनं निषादान्मद्गुमाभं च खरयानप्रयायिनं २१ चांडालात्पुल्कशं चापि खरा श्व गजभोजिनं मृतचैलप्रतिछन्नं भिन्नभाजनभोजिनं २२ आयोगवीषु जायंते हीनवर्णास्तु ते त्रयः क्षुद्रो वैदेहकादंध्रो बहिर्ग्रामप्रतिश्रयः २३ कारावरो निषाद्यां तु चर्मकारः प्रसूयते चंडालात्पांडुसोपाकस्त्वक्सारव्यवहारवान् २४ आहिंडको निषादेन वैदेह्यां संप्रसूयते चंडालेन तु सोपाको चंडालसमवृत्तिमान् २५ निषादी चापि चांडालात्पुत्रं मंतेवसापिनं श्मशानगोचरं सूते वाह्यैरपि वहिःकृतं २६ इत्येते संकराज्जाताः पितृमातृव्यतिक्रमात् प्रछन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः २७ ॥

भ्यां द्वौ निषाद्यां चंडालाद्वै कइति द्वादश भेदा उक्ताः शूद्राज्जातो निषाद्यां तु वै कुक्कुटकः स्मृतः वैदेहिकेन मंवष्ठ्यमुत्पन्नो वेन उच्यते इति वेदोद्विजात यःसवर्णासं जनयेत्पुत्रांस्तु यान् तान्सावित्रीपरिभ्रष्टान्व्रात्यानित्यभिनिर्दिशेदिति व्रात्याल्लजातो पारशक इत्येवं मनूक्तैः त्रिभिः सह पंचदशसंकर जाताः व्रात्यसापिधर्मसांकर्यादेते षिवगणान्न प्रछन्ना अज्ञातयोनयोपि पूर्वोक्तैः कर्मभिस्तेमुकयोनय इति वेदितव्याः २७ ॥ ॥

चातुर्वर्ण्यस्यैव धर्माः शास्त्रे विहिताः इतरेषां तु जातिभेदानां धर्मनियमः स्पष्टो नास्ति तथा हि चतुर्भ्यो वर्णेभ्यः षडनुलोमजाः षड्विलोमजाश्चेति द्वादश तेभ्योपि षट्षष्टिरनुलोमजाः षट्षष्टिर्विलोमजा इति द्वात्रिंशदधिकं शतं तेभ्य एवं प्रतिलोमानुलोमगणनायां तेभ्यस्तेभ्यश्चैवमनन्ताः भेदा भवन्ति

चातुर्वर्ण्यमेव वर्णानां धर्मो नान्यस्य विद्यते वर्णानां धर्महीनेषु संख्या नास्तीह कस्यचित् २८ यदृच्छयोपसम्पन्नैर्यज्ञसाधुवहिष्कृतैः
वाह्या वाह्यैस्तु जायन्ते यथावृत्ति यथाश्रयं २९ चतुःपथश्मशानानि शैलांश्चान्यान्वनस्पतीन् कार्ष्णायसमलंकारं परिगृह्य च नित्य
शः ३० वसेयुरेते विज्ञाता वर्त्तयन्तः स्वकर्म्मभिः युञ्जन्तो वाप्यलंकारांस्तथोपकरणानि च ३१ गोब्राह्मणाय साहाय्यं कुर्वाणा वै न संश
यः आनृशंस्यमनुक्रोशः सत्यवाक्यं तथा क्षमा ३२ स्वशरीरैरपि त्राणं वाह्यानां सिद्धिकारणं भवन्ति मनुजव्याघ्रास्तत्र मे ना
स्ति संशयः ३३ यथोपदेशं परिकीर्त्तितासु नरः प्रतीयेत विचार्य बुद्धिमान् निहीनयोनिर्हि सुतोवसादयेत्तितीर्षमाणो हि यथोप
लो जले ३४ अविद्वांसमलं लोके विद्वांसमपि वा पुनः नयन्ति ह्युत्पथं नार्यः कामक्रोधवशानुगं ३५ स्वभावश्चैव नारीणां
नराणामिह दूषणं अत्यर्थं न प्रसज्जन्ते प्रमदासु विपश्चितः ३६ ॥ ॥ ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

तिवसर्वेपि च दशस्वेवान्तर्भवन्तीति तेषां वपरिगणनं कृतमित्यर्थः २८ यदृच्छया जात्यनियमेन उपसम्पन्नैर्मिथुनीभावं गतैः यज्ञेभ्यः साधुभ्यश्च वहिष्कृतैः यथावृत्ति यथाश्रयं जीविकां जातिविशेषं च यदृच्छया तत्तत्कर्मणा प्राप्नुयादित्यर्थः २९ ३१ तेषां साधारणधर्मानाह गोविति ३२ ३३ यथे
तिनिहीनासु तैः सेकं न कुर्यादिति भावः ३४ तदर्थमेव चौरीभ्यः वस्त्रीभ्य आत्मानं रक्षेदित्याह द्वाभ्यां अविद्वांसमिति ३५ १२५

तावता ३

कलुषयोनिजं संकरयोनिजं आर्यगेहे जातत्वादार्यरूपमिवभासमानमपि उत्पत्तितोनार्यं ४० नानाभावैः आर्यैरस्पृष्टपस्पृताभिश्चेष्टाभिः समन्वितं
नरंसंकरयोनिजंजानीयात् ४१ अनार्यत्वादिषु एकैकमपिकलुषयोनित्वव्यंजकं किमुत द्वित्राणि सर्वाणि चेतिभावः ४२ प्रकृतिं योनिं नियच्छति

युधिष्ठिरउवाच वर्णापेतमविज्ञातंनरंकलुषयोनिजं आर्यरूपमिवानार्यंकथंविद्यामहेवयं ४० भीष्मउवाच योनिसं
कलुषेजातंनानाभावसमन्वितं कर्मभिःसज्जनाचीर्णैर्विज्ञेयायोनिशुद्धता ४१ अनार्यत्वमनाचारःक्रूरत्वंनिष्क्रियात्मता पुरु
षंव्यंजयंतीहलोकेकलुषयोनिजं ४२ पित्र्यंवाभजतेशीलंमातृजंवातथोभयं नकथंचनसंकीर्णःप्रकृतिंस्वांनियच्छति
४३ यथैवसदृशोरूपेमातापित्रोर्हिजायते व्याघ्रश्चित्रैस्तथायोनिंपुरुषःस्वांनियच्छति ४४ कुलेस्रोतसिसंछन्नेयस्यस्याद्यो
निसंकरः संश्रयत्येवतच्छीलंनरोल्पमथवाबहु ४५ ॥

ग्रहीतुंशक्नोतीत्यर्थः ४३ व्याघ्रस्तुपलक्षणं चित्रादेरपि यथातिर्यक्स्थावरादिकं बीजगुणाननतिवर्ततेएवंमनुष्योपीत्यर्थः ४४ संछन्ने सुगुप्तेपि
यस्तनमतीतिशेषः सतच्छीलंसंकरकर्तुःस्वभावं ४५